    3. टिप्पनी
    4. सूत्रम्
    5. टिप्पनी
    6. सूत्रम्
    7. टिप्पनी

8. सूत्रम्
9. टिप्पनी
10. सूत्रम्
11. टिप्पनी
12. सूत्रम्
13. प्रस्तावः
14. टिप्पनी
15. सूत्रम्
16. टिप्पनी
17. सूत्रम्
18. टिप्पनी
19. सूत्रम्
20. टिप्पनी
21. सूत्रम्
22. टिप्पनी
23. सूत्रम्
24. टिप्पनी
25. सूत्रम्
26. टिप्पनी
27. सूत्रम्
28. प्रस्तावः
29. टिप्पनी
30. सूत्रम्
31. प्रस्तावः
32. टिप्पनी
33. सूत्रम्
34. प्रस्तावः
35. टिप्पनी
36. सूत्रम्
37. प्रस्तावः
38. टिप्पनी
39. सूत्रम्
40. टिप्पनी
41. सूत्रम्
42. टिप्पनी
43. सूत्रम्
44. टिप्पनी
45. सूत्रम्
46. टिप्पनी
47. सूत्रम्
48. टिप्पनी
49. सूत्रम्
50. टिप्पनी

76. २२
    1. 01 तस्यारण्यमाच्छादनं विहितम्
        1. सूत्रम्
        2. टिप्पनी
        3. सूत्रम्
        4. टिप्पनी
        5. सूत्रम्
        6. टिप्पनी
        7. सूत्रम्
        8. टिप्पनी
        9. सूत्रम्
        10. टिप्पनी

11. सूत्रम्
12. टिप्पनी
13. सूत्रम्
14. प्रस्तावः
15. टिप्पनी
16. सूत्रम्
17. टिप्पनी
18. सूत्रम्
19. टिप्पनी
20. सूत्रम्
21. टिप्पनी
22. सूत्रम्
23. टिप्पनी
24. सूत्रम्
25. टिप्पनी
26. सूत्रम्
27. टिप्पनी
28. सूत्रम्
29. टिप्पनी
30. सूत्रम्
31. टिप्पनी
32. सूत्रम्
33. टिप्पनी
34. सूत्रम्
35. टिप्पनी
36. सूत्रम्
37. टिप्पनी
38. सूत्रम्
39. टिप्पनी
40. सूत्रम्
41. टिप्पनी
42. सूत्रम्
43. टिप्पनी
44. सूत्रम्
45. टिप्पनी
46. सूत्रम्
47. टिप्पनी
48. सूत्रम्
49. टिप्पनी

77. २३
    1. 01 भूयांसं वा नियममिच्छन्
        1. सूत्रम्
        2. टिप्पनी
        3. सूत्रम्
        4. प्रस्तावः
        5. टिप्पनी
        6. सूत्रम्
        7. प्रस्तावः
        8. टिप्पनी
        9. सूत्रम्
        10. टिप्पनी
        11. सूत्रम्
        12. टिप्पनी
        13. सूत्रम्
        14. टिप्पनी

15. सूत्रम्
16. प्रस्तावः
17. टिप्पनी
18. सूत्रम्
19. प्रस्तावः
20. टिप्पनी
21. सूत्रम्
22. टिप्पनी
23. सूत्रम्
24. प्रस्तावः
25. टिप्पनी
26. सूत्रम्
27. प्रस्तावः
28. टिप्पनी
29. सूत्रम्
30. प्रस्तावः
31. टिप्पनी

78. २४
    1. 01 अथाप्यस्य प्रजातिम् अमृतम्
        1. सूत्रम्
        2. प्रस्तावः
        3. टिप्पनी
        4. सूत्रम्
        5. प्रस्तावः
        6. टिप्पनी
        7. सूत्रम्
        8. प्रस्तावः
        9. टिप्पनी
        10. सूत्रम्
        11. टिप्पनी
        12. सूत्रम्
        13. टिप्पनी
        14. सूत्रम्
        15. टिप्पनी
        16. सूत्रम्
        17. टिप्पनी
        18. सूत्रम्
        19. टिप्पनी
        20. सूत्रम्
        21. प्रस्तावः
        22. टिप्पनी
        23. सूत्रम्
        24. प्रस्तावः
        25. टिप्पनी
        26. सूत्रम्
        27. टिप्पनी
        28. सूत्रम्
        29. टिप्पनी
        30. सूत्रम्
        31. प्रस्तावः
        32. टिप्पनी
        33. सूत्रम्
        34. टिप्पनी
79. २५
    1. 01 व्याख्याताः सर्ववर्णानां साधारणवैशेषिका

    1. सूत्रम्
    2. टिप्पनी
    3. सूत्रम्
    4. टिप्पनी
    5. सूत्रम्
    6. टिप्पनी
    7. सूत्रम्
    8. टिप्पनी
    9. सूत्रम्
    10. टिप्पनी
    11. सूत्रम्
    12. टिप्पनी
    13. सूत्रम्
    14. टिप्पनी
    15. सूत्रम्
    16. टिप्पनी
    17. सूत्रम्
    18. टिप्पनी
    19. सूत्रम्
    20. टिप्पनी
    21. सूत्रम्
    22. टिप्पनी
    23. सूत्रम्
    24. टिप्पनी
    25. सूत्रम्
    26. टिप्पनी
    27. सूत्रम्
    28. टिप्पनी
    29. सूत्रम्
    30. टिप्पनी
80. १०
81. २६
  1. 01 भृत्यानामनुपरोधेन क्षेत्रं वित्तञ्
    1. सूत्रम्
    2. टिप्पनी
    3. सूत्रम्
    4. टिप्पनी
    5. सूत्रम्
    6. टिप्पनी
    7. सूत्रम्
    8. टिप्पनी
    9. सूत्रम्
    10. टिप्पनी
    11. सूत्रम्
    12. टिप्पनी
    13. सूत्रम्
    14. टिप्पनी
    15. सूत्रम्
    16. टिप्पनी
    17. सूत्रम्
    18. टिप्पनी
    19. सूत्रम्
    20. टिप्पनी
    21. सूत्रम्
    22. टिप्पनी

        23. सूत्रम्
        24. टिप्पनी
        25. सूत्रम्
        26. टिप्पनी
        27. सूत्रम्
        28. टिप्पनी
        29. सूत्रम्
        30. टिप्पनी
        31. सूत्रम्
        32. टिप्पनी
        33. सूत्रम्
        34. टिप्पनी
        35. सूत्रम्
        36. टिप्पनी
        37. सूत्रम्
        38. टिप्पनी
        39. सूत्रम्
        40. टिप्पनी
        41. सूत्रम्
        42. टिप्पनी
        43. सूत्रम्
        44. टिप्पनी
        45. सूत्रम्
        46. टिप्पनी
        47. सूत्रम्
        48. टिप्पनी
82. २७
    1. 01 चरिते यथापुरं, धर्माद्धि
        1. सूत्रम्
        2. टिप्पनी
        3. सूत्रम्
        4. प्रस्तावः
        5. टिप्पनी
        6. सूत्रम्
        7. प्रस्तावः
        8. टिप्पनी
        9. सूत्रम्
        10. प्रस्तावः
        11. टिप्पनी
        12. सूत्रम्
        13. प्रस्तावः
        14. टिप्पनी
        15. सूत्रम्
        16. प्रस्तावः
        17. टिप्पनी
        18. सूत्रम्
        19. टिप्पनी
        20. सूत्रम्
        21. टिप्पनी
        22. सूत्रम्
        23. टिप्पनी
        24. सूत्रम्
        25. टिप्पनी
        26. सूत्रम्
        27. टिप्पनी

        28. सूत्रम्
        29. टिप्पनी
        30. सूत्रम्
        31. टिप्पनी
        32. सूत्रम्
        33. टिप्पनी
        34. सूत्रम्
        35. टिप्पनी
        36. सूत्रम्
        37. टिप्पनी
        38. सूत्रम्
        39. टिप्पनी
        40. सूत्रम्
        41. टिप्पनी
        42. सूत्रम्
        43. टिप्पनी
        44. सूत्रम्
        45. टिप्पनी
        46. सूत्रम्
        47. टिप्पनी
83. ११
84. २८
    1. 01 क्षेत्रम् परिगृह्योत्थानाभावात्फलाभावे यः
        1. सूत्रम्
        2. टिप्पनी
        3. सूत्रम्
        4. टिप्पनी
        5. सूत्रम्
        6. टिप्पनी
        7. सूत्रम्
        8. टिप्पनी
        9. सूत्रम्
        10. टिप्पनी
        11. सूत्रम्
        12. टिप्पनी
        13. सूत्रम्
        14. टिप्पनी
        15. सूत्रम्
        16. टिप्पनी
        17. सूत्रम्
        18. टिप्पनी
        19. सूत्रम्
        20. टिप्पनी
        21. सूत्रम्
        22. टिप्पनी
        23. सूत्रम्
        24. टिप्पनी
        25. सूत्रम्
        26. टिप्पनी
        27. सूत्रम्
        28. टिप्पनी
85. २९
    1. 01 प्रयोजयिता मन्ता कर्तेति
        1. सूत्रम्
        2. प्रस्तावः

        3. टिप्पनी
        4. सूत्रम्
        5. टिप्पनी
        6. सूत्रम्
        7. प्रस्तावः
        8. टिप्पनी
        9. सूत्रम्
        10. टिप्पनी
        11. सूत्रम्
        12. टिप्पनी
        13. सूत्रम्
        14. टिप्पनी
        15. सूत्रम्
        16. प्रस्तावः
        17. टिप्पनी
        18. सूत्रम्
        19. टिप्पनी
        20. सूत्रम्
        21. प्रस्तावः
        22. टिप्पनी
        23. सूत्रम्
        24. टिप्पनी
        25. सूत्रम्
        26. टिप्पनी
        27. सूत्रम्
        28. टिप्पनी
        29. सूत्रम्
        30. टिप्पनी
        31. सूत्रम्
        32. सूत्रम्
        33. टिप्पनी
        34. सूत्रम्
        35. टिप्पनी
86. Appendix - +Dyugangā द्युगङ्गा
    1. Goals ध्येयानि
        1. संस्कृतानुवादः
        2. Contribution दानम्

**१①**

**०१①**

# ०१①

## 01 अथातः सामयाचारिकान्धर्मान्व्याख्यास्यामः④

अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः १

▼

### ⑤

>
▼ Bühler

1. Now, therefore, we will declare the acts productive of merit which form part of the customs of daily life, as they have been settled by the agreement (of those who know the law). 1

▼ हरदत्त-टीका

2प्रणिपत्य महादेव हरदत्तेन धीमता।
धर्माख्यप्रश्नयोरेषा क्रियते वृत्तिरुज्ज्वला ॥१॥

### सूत्रम्⑥

अथातस्सामयाचारिकान् धर्मान् व्याख्यास्यामः ॥ १॥

### टिप्पनी⑥

अथशब्द आनन्तर्ये । अतश्शब्दो हेतौ । उक्तानि श्रौतानि गार्ह्याणि च कर्माणि । तानि च वक्ष्यमाणान्धर्मानपेक्षन्ते । कथम् ? आ चान्तेन कर्म कर्तव्यं, शुचिना कर्तव्यमिति वचनादाचमनशौचादीनपेक्षन्ते ।

3 'सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु'। इति वचनात् सन्ध्यावन्दनम् । एवं 'अशुचिकरनिर्वेषः, 4 'द्विजातिकर्मभ्यो हानिः पतनम्' इति वचनात् ब्रह्महत्यादिप्रायश्चित्तानि च । एवमन्येष्वपि यथासम्भवमपेक्षा द्रष्टव्या । अतस्तदनन्तरं सामयाचारिकान् धर्मान् व्याख्यास्यामः । पौरुषेयी व्यवस्था समयः । स च त्रिविधः-विधिर्नियमः प्रतिषेधश्चेति ।

तत्र प्रवृत्तिप्रयोजनो विधिः-5 सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्चेत्यादिः । निवृत्तिप्रयोजनावितरौ।

6 'प्राङ् मुखोऽन्नानि भुञ्जीते'ति नियमविधिः । क्षुदुपघातार्था भोजने प्रवृत्तिः । शक्यं च 7यत्किञ्चिद्दिङ्मुखेनापि भुञ्जानेन क्षुदुपहन्तुम् । तत्र नियमः क्रियते-प्राङ्मुख एव भुञ्जीत, न दक्षिणादिमुख इति । 8परिसङ्ख्या तु नियमस्यैव कियानपि भेदः । एवं द्रव्यार्जने रागात्प्रवृत्तं प्रति नियमः क्रियते- याजनाध्यापनप्रतिग्रहैरेव ब्राह्मणो द्रव्यमार्जयेत्, न कृषिवाणिज्यादिने'ति । 9 ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जये'दित्यादिः प्रतिषेधः । समयमूला आचारास्समयाचाराः तेषु भवाः सामयाचारिकाः । एवम्भूतान् धर्मानिति । 10कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः । तद्धेतुभूत कर्मव्याख्यानमेव तद्व्याख्यानम् । तत्र विधिषु तावद्विषयानुष्ठानाद्धर्म इति नास्ति विप्रतिपत्तिः। नियमेष्वपि 11नियमानुष्ठानाद्धर्मः, प्रतिषेधेष्वपि12नञर्थानुष्ठानाद्धर्म इति केचित् । अतएव धर्मानित्यविशेषेणाह ।

अन्ये तु-विधिष्वेव धर्मः, इतरयोस्तु विपरीतानुष्ठानादधर्मः केवलम्, न तु विषयानुष्ठानात् कश्चिद्धर्मः । न ह्यप्रतिगृह्णन्नपिबन्वा सुरां धार्मिक इति लोके प्रसिद्धः । सूत्रे तु धर्मग्रहणमधर्मस्याप्युपलक्षणमिति स्थितिः-इति ॥ १॥
कि भोः समयोऽपि प्रमाणम्, ? 13यदि स्यादिदमपि प्रमाणं भवितुमर्हति-'चैत्यं वन्देत स्वर्गकामः । प्रगे भुञ्जीत । केशानुल्लुँञ्छेत् ।

#### 02 धर्मज्ञसमयः प्रमाणम्

धर्मज्ञ-समयः **प्रमाणम्** २

▼

### ⑤

>
▼ Bühler

> 2. The authority (for these duties) is the agreement of those who know the law, 14

▼ हरदत्त-टीका

## सूत्रम्⑥

धर्मज्ञसमयः प्रमाणम् ॥ २ ॥

## प्रस्तावः⑥

तिष्ठन् भुञ्जीत । न स्नायादिति । तमाह—

## टिप्पनी⑥

न हि ब्रूमः समयमात्रं प्रमाणामिति । किं तर्हि ? धर्मज्ञाः ये मन्वादयस्तेषां समयः प्रमाणं धर्माधर्मयोः ॥२॥
कथं पुनरिद15मवगतं मन्वादयो धर्मज्ञा न बुद्धादय इति ? यद्युच्यते-बुद्धादीनामतीन्द्रियेऽर्थे ज्ञानं न सम्भवतीति, तन्मन्वादिष्वपि समानम् । अथ तेषां धर्मज्ञानातिशयादतीन्द्रियेऽपि ज्ञानं सम्भवतीति, तत् बुद्धादिष्वपि समानम् ।
यथाऽऽहुः —

> 16 सुगतो यदि धर्मज्ञः कपिलो नेति का प्रमा।
> तावुभौ यदि धर्मज्ञौ मतभेदः कथं तयोः ॥ इति ।

#### 03 वेदाश्च

वेदाश् च ३

▼

### ⑤

>
▼ Bühler

> 3. And (the authorities for the latter are) the Vedas alone.

▼ हरदत्त-टीका

## सूत्रम्⑥

वेदाश्च ॥ ३॥

## प्रस्तावः⑥

वक्तव्यो वा विशेष , तमाह—

## टिप्पनी⑥

चोऽवधारणे । वेदा एव मूलप्रमाणं धर्माधर्मयोः । 17न च नित्यनिर्दोषेषु वेदेषूक्तोपालम्भसम्भवः । 18स्वतःप्रमाणस्य हि शब्दस्य न वक्तृदोषनिबन्धनमप्रामाण्यम् । तदिहास्मदादीनां धर्मज्ञसमयः प्रमाणम्, धर्मज्ञानां तु वेदाः प्रमाणम् ।

मनुरप्याह—

> 19वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
> आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

गौतमोऽपि-20

> 'वेदो धर्ममूलं, तद्विदां च स्मृतिशीले ।' इति ।

यद्यप्यप्रत्यक्षो वेदो मूलभूतोऽस्मदादिभिर्नोपलभ्यते । तथापि 21मन्वादय उपलब्धवन्तः इत्यनुमीयते ।
वक्ष्यति-
22तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते' इति ॥३॥

#### 04 चत्वारो वर्णो ब्राह्मणक्षत्रियवैश्यशूद्राः

चत्वारो **वर्णा** ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः ४

▼

## ⑤

>
▼ Bühler

4. (There are) four castes--Brāhmaṇas, Kṣatriyas, Vaiśyas, and Śūdras.

▼ हरदत्त-टीका

## सूत्रम्⑥

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः॥ ४ ॥

## टिप्पनी⑥

ब्राह्मणाद्याश्चत्वारो वर्णसंज्ञिकाः । ते च सामयाचारिकैर् धर्मा अधिक्रियन्ते । 23चतुर्णामेवोपदेशेऽपि पुनश्चतुर्ग्रहणं 24यथाकथञ्चित् चतुर्धन्तर्भूतानामपि ग्रहणार्थम् । ततश् च25 'ब्राह्मणः क्षत्रियो वैश्य' इति बौधायनादिभिरुक्तानामनुलोमादीनामप्यत्र ग्रहणं मतम् । तथा च गौतमः प्रतिलोमानामेव धर्मेऽनधिकारमाह-26 "प्रतिलोमास्तु धर्महीना" इति ॥४॥

#### 05 तेषाम् पूर्वस्पूर्वो जन्मतः

तेषां पूर्वस्-पूर्वो जन्मतः श्रेयान् ५

▼

## ⑤

>
▼ Bühler

5. Amongst these, each preceding (caste) is superior by birth to the one following.

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषां पूर्वः पूर्वो जन्मतश्श्रेयान् ॥५॥

## टिप्पनी⑥

जन्मत इति वचनात् सद्वृत्तादपि शूद्राद्वैश्यब्रुवोऽपि श्रेयान् । एव वैश्यात् क्षत्रियः, क्षत्रियात् ब्राह्मणः ॥५॥

#### 06 अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयम् फलवन्ति

अशूद्राणाम् अदुष्टकर्मणाम् उपायनं वेदाध्ययनम् अग्न्याधेयं **फलवन्ति च कर्माणि** ६

▼

## ⑤

>
▼ Bühler

6. (For all these), excepting Śūdras and those who have committed bad actions, (are ordained) the initiation, the study of the Veda, and the kindling of 27 the sacred fire; and (their) works are productive of rewards (in this world and the next).

▼ हरदत्त-टीका

## सूत्रम्⑥

अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि ॥ ६ ॥

## टिप्पनी⑥

शूद्रवर्जितानां त्रयाणां वर्णानाम् अदुष्टकर्मणाम् उपायनादयो धर्माः । **उपायनम्** उपनयनम् ।

नात्र त्रैवर्णिकानाम् उपनयादि विधीयते, प्राप्तत्वात् ।
नापि शूद्राणां प्रतिषिध्यते, प्राप्त्यभावात् ।
तथा हि-उपनयन तावद् गृह्ये 28
'गर्भाष्टमेषु ब्राह्मणमुपनयीते'त्यादिना त्रैवर्णिकानामेव विहितम् । इहापि तथैव विधास्यते ।

अध्ययनमपि 29'उपेतस्याचार्यकुले ब्रह्मचारिवास' इत्यारभ्य विधानात्
अनुपनीतस्य शूद्रस्याप्राप्तमेव ।

किं च 30 'श्मशानवच्छूद्रपतिता'विति 31अध्ययननिषेधो वक्ष्यते ।
32यस्य समीपे नाध्येयं स कथं स्वयमध्येतुमर्हति ।

अग्न्याधेयम् अपि33'वसन्ता ब्राह्मण' इत्यादि त्रैवर्णिकानामेव विहितम्।

**फलवन्ति** चाग्निहोत्रादीनि **कर्माणि** 34
'स त्रयाणां वर्णाना'मित्युक्तत्वात् त्रैवर्णिकानामेव नियतानि ।
विद्याग्न्यभावाच् च शूद्राणाम् अप्रसक्तानि ।
उक्तो विद्याग्न्यभावः।

तस्माद् **दुष्ट-कर्म**-प्रतिषेधार्थं सूत्रम् । यथा शास्त्रान्तरे-35

> 'द्विजातिकर्मभ्यो हानिः पतनम्'

इति ।

अप्रतिषेधे तु दुष्ट-कर्मणाम् अप्य् अधिकारो भवत्य् एव ।*(5)*
'फलवन्ति च कर्माणी'त्य् अभिधानात्,
क्रियते इति कर्मेति निर्वचनात् । 36

'प्रागुपनयनात् कामचारवादभक्ष' इति गौतमस्मरणं
ब्रह्महत्यादि-महापातक-व्यतिरिक्त-विषयम् इत्य्
अनुपेतस्यापि दुष्टकर्मत्व-सम्भवात्
अदुष्टकर्मणा37मित्युक्तम् । शूद्रप्रतिषेधस्तु प्राप्तानुवादः ॥ ६ ॥

▼ सत्यशर्मा

Between 1200-1400 CE, a different version of Āpastambadharmasūtra 1.1.6 'अशूद्राणामदुष्टकर्मणामुपायनं..' emerged with the omission of 'अ' of 'अशूद्राणाम्'.

Screenshots from Smṛtikaumudī and Harihara's comm. on Pāraskaragṛhyasūtra. Both take 'शूद्राणाम्' to denote Rathakāra.

#### 07 शुश्रूषा शूद्रस्येतरेषां वर्णानाम्

**शुश्रूषा** शूद्रस्येतरेषां वर्णानाम् *(फलवत् कर्म)*७

▼

## ⑤

>
▼ Bühler

7. To serve the other (three) castes (is ordained) for the Śūdra. 38

▼ हरदत्त-टीका

## सूत्रम्⑥

शुश्रूषा शूद्रस्येतरेषां वर्णानाम् ॥ ७ ॥

## प्रस्तावः⑥

यथा ब्राह्मणादीनामुपनयनादयो धर्माः प्रधानभूताः तादृशं शूद्रस्य कर्माऽऽह—

## टिप्पनी⑥

इतरेषां ब्राह्मणादीनां वर्णानां या शुश्रूषा सा शूद्रस्य परमो धर्मः ॥ ७ ॥

#### 08 पूर्वस्मिन्पूर्वस्मिन्वर्णे निःश्रेयसम्भूयः

*(शूद्र-कृत-सेवा)* पूर्वस्मिन् पूर्वस्मिन् वर्णे निःश्रेयसम् भूयः ८

▼

## ⑤

>

▼ Bühler

8. The higher the caste (which he serves) the greater is the merit.

▼ हरदत्त-टीका

## सूत्रम्⑥

पूर्वस्मिन्पूर्वस्मिन्वर्णे निश्श्रेयसं भूयः ॥ ८ ॥

## प्रस्तावः⑥

39तत्र विशेषमाह—

## टिप्पनी⑥

सर्वप्रकारं कृताया अपि वैश्यशुश्रूषायाः' मात्रयापि कृता क्षत्रियशुश्रूषा बहुतरं फलं साधयति । एवं क्षत्रियशुश्रूषाया ब्राह्मणशुश्रूषा ॥८॥

#### 09 उपनयनं विद्यार्थस्य श्रुतितः

**उपनयनं** विद्यार्थस्य श्रुतितः संस्कारः ९

▼

### ⑤

>
▼ Bühler

9. The initiation is the consecration in accordance with the texts of the Veda, of a male who is desirous of (and can make use of) sacred knowledge. 40

▼ हरदत्त-टीका

## सूत्रम्⑥

उपनयनं विद्यार्थस्य श्रुतितस्संस्कारः ॥ ९ ॥

## प्रस्तावः⑥

उपायनं वेदाध्ययनमित्यादि यदुक्तं अस्मिन् क्रमे उपनयने विशेषमाह—

## टिप्पनी⑥

विद्या अर्थः प्रयोजनं यस्य स विद्यार्थः । तस्यायं श्रुतिविहितस्संस्कारः उपनयनं नाम । 'विद्यार्थस्ये'ति वचनात् मूकादेर्न भवति । तथा च शङ्खलिखितौ 41 'नोन्मत्तमूकान् संस्कुर्यात्' इति । 42लिङ्गस्य विवक्षितत्वात् स्त्रिया अपि न भवति यद्यपि तस्याः 43 'अग्ने गृहपते' इत्यादिकया विद्यया अर्थः । 'श्रुतित' इति वचनं तदतिक्रमे श्रौतातिक्रमप्रायश्चित्तप्राप्त्यर्थम् ॥ ९ ॥

#### 10 "सर्वेभ्यो वेदेभ्यः सावित्र्

"सर्वेभ्यो वेदेभ्यः **सावित्र्** अनूच्यत" इति हि ब्राह्मणम् १०

▼

### ⑤

>
▼ Bühler

10. A Brāhmaṇa declares that the Gāyatrī is learnt for the sake of all the (three) Vedas. 44

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वेभ्यो वै वेदेभ्यस्सावित्र्यनूच्यत इति हि ब्राह्मणम् ॥१०॥

## प्रस्तावः⑥

अनेकवेदाध्यायिनां वेदव्रतवदुपनयनमपि प्रतिवेदं भेदेन कर्तव्यमिति प्राप्ते उच्यते—

## टिप्पनी⑥

> 45'त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
> तदित्यृचोऽस्यास्सावित्र्याः परमेष्ठी प्रजापतिः॥' इति 46मनुः ।

ततश्चोपनयने यत्सावित्र्या अनुवचनं तन्मुखेन सर्वे वेदा अनूक्ता भवन्तीत्यगृह्यमाणविशेषत्वादेकमेवोपनयन सर्वार्थमिति । अस्मिन्नर्थे ब्राह्मणमपि भवति 47ब्राह्मणमेव वा पठितम् । आथर्वणस्य वेदस्य पृथगुपनयनं कर्तव्यम् । तथा च तत्रैव श्रुतम्—48नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयते'ति ॥ १०॥

#### 11 तमसो वा एष

तमसो वा एष *(आगत्य)* तमः प्रविशति - यम् अविद्वान् उपनयते, यश् चाविद्वान् - इति हि ब्राह्मणम् ११

▼

## ⑤

>
▼ Bühler

11. (Coming) out of darkness, he indeed enters darkness, whom a man unlearned in the Vedas, initiates, and (so does he) who, without being learned in the Vedas, (performs the rite of initiation.) That has been declared in a Brāhmaṇa.

▼ हरदत्त-टीका

## सूत्रम्⑥

तमसो वा एष तमः प्रविशति यमविद्धानुपनयते यश्चाऽविद्वानिति हि ब्राह्मणम् ॥ ११ ॥

## प्रस्तावः⑥

विद्वानेवोपनेताऽभिगम्यत इति विधातुमविदुषो निन्दामाह—

## टिप्पनी⑥

यथा कश्चित् तमसस्सकाशात्तम एव प्रविष्टो न किञ्चिज्जानाति एवमेवैषः य माणवकमविद्वानुपनयते, तथा यश्चाविद्वान् । उपनीयते इत्यपेक्ष्यते । यश्च स्वयमविद्वान् सन्नुपनीयते सोऽपि तमस एव तम प्रविशति । अस्मिन्नर्थे ब्राह्मणमपि भवतीति ।॥ ११ ॥

#### 12 तस्मिन्नभिजनविद्यासमुदेतं समाहितं संस्कर्तारमीप्सेत्

तस्मिन्न् अभिजन-विद्यासमुदेतं समाहितं संस्कर्तारम् ईप्सेत् १२

▼

## ⑤

>
▼ Bühler

12. As performer of this rite of initiation he shall seek to obtain a man in whose family sacred learning is hereditary, who himself possesses it, and who is devout (in following the law).

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्मिन्नभिजनविद्यासमुदेतं समाहितं संस्कारमीप्सेत् ॥ १२ ॥

## प्रस्तावः⑥

कीदृशस्तर्ह्युपनेताऽभिगम्यः ? तमाह—

## टिप्पनी⑥

अविच्छिन्न49वेदवेदिसम्बन्धे कुले जन्म अभिजन । षड्भिरङ्गैस्सहैव यथावदर्थज्ञानपर्यन्तमधीतो वेदो विद्या । सर्वासम्भवे वेद एव वा । तस्मिन्नुपनयने कर्तव्ये ताभ्यां अभिजनविद्याभ्यां समुदेतं सम्पन्नम्, समाहितविहितप्रतिषिद्धेष्ववहितमनसम्, संस्कर्तारमाचार्यमीप्सेत् । इच्छया करणं लक्ष्यते । आप्नुयादभिगच्छेदिति ॥ १२ ॥

#### 13 तस्मिंश्चैव विद्याकर्मान्तमविप्रतिपन्ने धर्मेभ्यः

तस्मिंश् चैव विद्या-कर्म +आन्तम् अविप्रतिपन्ने धर्मेभ्यः १३

▼

## ⑤

>
▼ Bühler

13. And under him the sacred science must be 50 studied until the end, provided (the teacher) does not fall off from the ordinances of the law.

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्मिंश्चैव विद्याकर्माऽऽन्तमविप्रतिपन्ने धर्मेभ्यः ॥१३॥

## टिप्पनी⑥

तस्मिन्नेव चोपनेतरि विद्याकर्म विद्याग्रहणं कर्तव्यम् । आन्तमासमाप्तेः, अविप्रतिपन्ने धर्मेम्यः यद्यसावाचार्यो धर्मभ्यो न प्रच्युतो भवति । प्रच्युते तु तस्मिन्नसम्पर्कार्हे अन्यतोऽपि विद्याकर्म भवत्येव ।

- *येषां चाचार्यकरणविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यते । कथम् ? उपनीयाध्यापनेनाचार्यकं भावयेदिति । सकृदुपनीतस्य माणवकस्य न पुनरुपनयनसंस्कारः सम्भवति । तं कथमन्योऽध्यापयेत् ? एतेन मध्ये आचार्यमरणे माणवकस्य तदध्ययनं नाचार्यान्तरात् सम्भवतीति द्रष्टव्यम् **॥ १३॥

*. एतचिह्नान्तर्गतो भागः प्रक्षिप्त इति Mysore पुस्तके । परन्तु क ग पुस्तकयोरुपलभ्यते पाठः । एतच्च गुरुमतानुसारेण । गुरवो हि "अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत' इति विधिनाऽऽचार्यत्वसिध्यर्थमध्यापन विदधताऽध्ययनमपि प्रयुज्यते, अतो ऽध्यापनान्यथानुपपत्यैव सिध्यदध्ययनं न स्वविधिना "स्वाध्यायोऽध्येतव्य" इत्यनेन विधीयते इति ब्रुवते । अतस्तन्मतखण्डनमिदम् ।

#### 14 यस्माद्धर्मानाचिनोति स आचार्यः

यस्माद् धर्मान् आचिनोति स **आचार्यः** १४*(5)*

▼

## ⑤

>

▼ Bühler

14. He from whom (the pupil) gathers (ācinoti) (the knowledge of) his religious duties (dharmān) (is called) the Ācārya (teacher). 51

▼ हरदत्त-टीका

## सूत्रम्⑥

यस्माद्धर्मानाचिनोति स आचार्यः ॥ १४॥.

## प्रस्तावः⑥

52आचार्यशब्दं निराह—

## टिप्पनी⑥

यस्मात्पुरुषादयं माणवकः धर्मानाचिनोति आत्मनः प्रचिनोति शिक्षते स आचार्यः । 53 'अप्यक्षरसाम्यान्निर्ब्रूयादि'ति चकारमात्रेणेदं निर्वचनम् । अनेन प्रकारेण माणवकमाचार्यः शौचाचारांश्च शिक्षयेदित्युक्तं भवति ॥१४॥

#### 15 तस्मै न द्रुह्येत्कदाचन

तस्मै न द्रुह्येत् कदाचन १५

▼

## ⑤

>
▼ Bühler

15. Him he should never offend. 54

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्मै न द्रुह्येत्कदाचन ॥ १५ ॥

## टिप्पनी⑥

तस्मै एवंभूताचार्याय कदाचन कदाचिदपि न द्रुह्येत् तद्विषयमपकारं न कुर्यात् ॥ १५॥

#### 16 स हि विद्यातस्तञ्

स हि विद्यातस् तं जनयति १६

▼

## ⑤

>
▼ Bühler

16. For he causes him (the pupil) to be born (a second time) by (imparting to him) sacred learning. 55

▼ हरदत्त-टीका

## सूत्रम्⑥

स हि विद्यातस्तं जनयति ॥ १६ ॥

## प्रस्तावः⑥

कस्मादित्यत आह—

## टिप्पनी⑥

स ह्याचार्यः माणवकं विद्यातो जनयति, यथा पिता मातृतः।

> 56अत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥ इति शास्त्रान्तरम् ॥ १६ ॥

#### 17 तच्छ्रेष्ठञ् जन्म

तच् +छ्रेष्ठं जन्म १७

▼

## ⑤

>
▼ Bühler

17. This (second) birth is the best. 57

▼ हरदत्त-टीका

## सूत्रम्⑥

तच्छ्रेष्ठं जन्म ॥१७॥

## टिप्पनी⑥

तद्विद्यातो जन्म श्रेष्ठं प्रशस्ततमम्, अभ्युदयनिःश्रेयसहेतुत्वात् ॥१७॥

#### 18 शरीरमेव मातापितरौ जनयतः

शरीरम् एव माता-पितरौ जनयतः १८

▼

## ⑤

>
▼ Bühler

18. The father and the mother produce the body only. 58

▼ हरदत्त-टीका

## सूत्रम्⑥

शरीरमेव मातापितरौ जनयतः ॥ १८ ॥

## प्रस्तावः⑥

मातापितृभ्यामाचार्यः श्रेष्ठ इत्याह—

## टिप्पनी⑥

मातापितरौ शरीरमात्रमेव काष्ठकुड्यादिसमं जनयतः । आचार्यस्तु सर्वपुरुषार्थक्षमरूपं जनयति । 59"आचार्यः श्रेष्ठो गुरूणा"मिति गौतमः ॥ १८॥

#### 19 वसन्ते ब्राह्मणम् उपनयीत,

**वसन्ते** ब्राह्मणम् उपनयीत, **ग्रीष्मे** राजन्यं शरदि वैश्यं,
**गर्भाष्टमेषु** ब्राह्मणं, **गर्भैकादशेषु** राजन्यं, गर्भ-द्वादशेषु वैश्यम् १९

▼

## ⑤

>
▼ Bühler

19. Let him initiate a Brāhmaṇa in spring, a Kṣatriya in summer, a Vaiśya in autumn, a Brāhmaṇa in the eighth year after conception, a Kṣatriya in the eleventh year after conception, (and) a Vaiśya in the twelfth after conception. 60

▼ हरदत्त-टीका

## सूत्रम्⑥

वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यं, गर्भाष्टमेषु ब्राह्मणं, गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यम् ॥ १९ ॥

## टिप्पनी⑥

61वसन्ते ब्राह्मणमित्यादि गृह्ये गतम् ॥ १९ ॥

#### 20 अथ काम्यानि

अथ *(उपनयन-विषये)* काम्यानि २०

▼

### ⑤

>
▼ Bühler

20. Now (follows the enumeration of the years to be chosen) for the fulfilment of some (particular) wish,

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ काम्यानि ॥ २० ॥

## टिप्पनी⑥

कामनिमित्तान्युपनयनानि वक्ष्यन्ते ॥ २० ॥

#### 21 सप्तमे ब्रह्मवर्चसकामम्

सप्तमे ब्रह्म-वर्चस-कामम् २१

▼

### ⑤

>
▼ Bühler

21. (Let him initiate) a person desirous of excellence in sacred learning in his seventh year, 62

▼ हरदत्त-टीका

## सूत्रम्⑥

63सप्तमे ब्रह्मवर्चसकामम् ॥ २१ ॥

## टिप्पनी⑥

'ब्रह्मवर्चसकाम'मित्यादीनि षट् सूत्राणि स्पष्टार्थानि । सर्वत्रोपनयीतेत्यपेक्ष्यते ॥ २१-२६ ॥

#### 22 अष्टम आयुष्कामम्

अष्टम आयुष्-कामम् २२

▼

⑤

>
▼ Bühler

22. A person desirous of long life in his eighth year, 64

▼ हरदत्त-टीका

## सूत्रम्⑥

अष्टम आयुष्कामम् ॥ २२ ॥

#### 23 नवमे तेजस्कामम्

नवमे तेजस्-कामम् २३

▼

⑤

>
▼ Bühler

23. A person desirous of manly vigour in his ninth year,

▼ हरदत्त-टीका

## सूत्रम्⑥

नवमे तेजस्कामम् ॥ २३ ॥

#### 24 दशमेऽन्नाद्यकामम्

दशमे ऽन्नाद्य-कामम् २४

▼

⑤

>
▼ Bühler

24. A person desirous of food in his tenth year,

▼ हरदत्त-टीका

## सूत्रम्⑥

दशमेऽन्नाद्यकामम् ॥ २४॥

#### 25 एकादश इन्द्रियकामम्

एकादश इन्द्रिय-कामम् २५

▼

## ⑤

>
▼ Bühler

25. A person desirous of strength in his eleventh year,

▼ हरदत्त-टीका

## सूत्रम्⑥

एकादश इन्द्रियकामम् ॥ २५ ॥

#### 26 द्वादशे पशुकामम्

द्वादशे पशु-कामम् २६

▼

## ⑤

>
▼ Bühler

26. A person desirous of cattle in his twelfth year.

▼ हरदत्त-टीका

## सूत्रम्⑥

द्वादशे पशुकामम् ॥ २६ ॥

#### 27 आ षोडशाद् ब्राह्मणस्यानात्यय,

आ षोडशाद् ब्राह्मणस्यानात्यय, आ द्वाविंशात् क्षत्रियस्य+ आ चतुर्विंशाद् वैश्यस्य - यथा व्रतेषु समर्थः स्याद् यानि वक्ष्यामः २७

▼

⑤

>
▼ Bühler

27. There is no dereliction (of duty, if the initiation takes place), in the case of a Brāhmaṇa before the completion of the sixteenth year, in the case of a Kṣatriya before the completion of the twenty-second year, in the case of a Vaiśya before the completion of the twenty-fourth year. (Let him be initiated at such an age) that he may be able to perform the duties, which we shall declare below. 65

▼ हरदत्त-टीका

## सूत्रम्⑥

आषोडशाद्ब्राह्मणस्यानात्यय आद्वाविंशात्क्षत्रियस्याऽऽचतुर्विंशाद्वैश्यस्य यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः॥ २७ ॥

## प्रस्तावः⑥

66 'आचार्याधीनस्स्या'दित्यादीनि यानि ब्रह्मचारिणो व्रतानि वक्ष्यन्ते तेष्वसमर्थानां कुमाराणां वर्णक्रमेणानुकल्पमाह—

## टिप्पनी⑥

आकारोऽभिविधौ । अत्ययोऽतिक्रमः । स एवाऽऽत्ययः तदभावोऽनात्ययः । यादृच्छिको दीर्घः, आङो वा प्रश्लेषः । प्रकरणादुपनयनकालस्येति गम्यते । यथा व्रतेषु समर्थः स्यात् तथैतावान् कालः प्रतीक्ष्यः । पूर्वमेव तु सामर्थ्ये सत्यष्टमवर्षाद्यतिक्रमे वक्ष्यमाण प्रायश्चित्तमेव भवति । एवं षोडशादिभ्य ऊर्ध्वं कियन्तञ्चित्कालमसमर्थानां पश्चात्सामर्थ्ये सति प्रायश्चित्तं भवत्येव ॥ २७ ॥

#### 28 अतिक्रान्ते सावित्र्याः काल

अतिक्रान्ते सावित्र्याः काल*(यृ)*, ऋतुं *(यावत्)* त्रैविद्यकं ब्रह्मचर्यं *(अग्नि-परिचर्याम् अध्ययनं गुरु-शुश्रूषाम् इति परिहाप्य)* चरेत् २८

▼

⑤

>
▼ Bühler

28. If the proper time for the initiation has passed, he shall observe for the space of two months 67 the duties of a student, as observed by those who are studying the three Vedas.

▼ हरदत्त-टीका

## सूत्रम्⑥

अतिक्रान्ते सावित्र्याः ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् ॥ २८ ॥

## प्रस्तावः⑥

तदानीं प्रायश्चित्तमाह—

## टिप्पनी⑥

यस्य यः **सावित्र्याः** काल उक्तः तद्-अतिक्रमे
**त्रैविद्यकं** - त्र्य्-अवयवा विद्या ताम् अधीयते ये ते त्रैविद्याः, तेषामिदं **त्रैविद्यकम्** । 68 'गोत्रचरणाद् वुञ् । 'चरणाद्धर्माम्नाययोरि'ति वुञ् ।
एवंभूतं **ब्रह्मचर्यं**, अग्नि-परिचर्याम् अध्ययनं गुरु-शुश्रूषाम् इति परिहाप्य, सकल ब्रह्मचारि-धर्मं चरेत् ।
कियन्तं कालम् ? **ऋतुं**, 'कालाध्वनो'रिति द्वितीया। ऋतुम् इति वचनाद् ऋत्वारम्भे प्रायश्चित्तारम्भम् इच्छन्ति ॥ २८ ॥

#### 29 अथोपनयनम्

अथोपनयनम् २९

▼

## ⑤

>
▼ Bühler

29. After that he may be initiated.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथोपनयनम् ॥ २१ ॥

## टिप्पनी⑥

एवं चरितव्रत उपनेतव्यः ॥ २९ ॥

#### 30 ततः संवत्सरम् उदकोपस्पर्शनम्

ततः संवत्सरम् उदकोपस्पर्शनम् ३०

▼

## ⑤

>
▼ Bühler

30. After that he shall bathe (daily) for one year. 69

▼ हरदत्त-टीका

## सूत्रम्⑥

ततस्संवत्सरमुदकोपस्पर्शनम् ॥ ३०॥

## टिप्पनी⑥

ततः उपनयनादारभ्य सम्वत्सरमुदकोपस्पर्शनं स्नानं कर्तव्यम् । शक्तस्य त्रिषवणं स्नानम्70 अशक्तस्य यथाशक्ति ॥ ३० ॥

#### 31 अथाध्याप्यः

अथाध्याप्यः ३१

▼

## ⑤

>
▼ Bühler

31. After that he may be instructed.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाऽध्याप्यः॥ ३१ ॥

## टिप्पनी⑥

एवं चरितव्रतः पश्चादध्याप्यः ॥३१॥

#### 32 अथ यस्य पिता

अथ यस्य पिता पितामह इति अनुपेतौ स्यातां - ते ब्रह्म-ह-संस्तुताः ३२

▼

### ⑤

>
▼ Bühler

32. He, whose father and grandfather have not been initiated, (and his two ancestors) are called 'slayers of the Brahman.' 71

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ यस्य पिता पितामह इत्यनुपेतौ स्यातां ते ब्रह्महसंस्तुताः ॥ ३२ ॥

## टिप्पनी⑥

यस्य माणवकस्य पिता पितामहश्चानुपेतौ स्यातां स्वयं च, ते तथाविधास्स माणवका ब्रह्महसस्तुताः ब्रह्महण इत्येव कीर्तिताः ब्रह्मवादिभिः। अतस्मिन् तच्छब्दयोगस्तद्धर्मप्राप्त्यर्थः । एवं च 72 'श्मशानवच्छूद्रपतिता'वित्यध्ययननिषेधप्रकरणे वक्ष्यते । ततश्च ब्रह्मा यथा ब्रह्महसमीपे नाध्येयमेवमेषामपीति ॥ ३२ ॥

#### 33 तेषाम् अभ्यागमनम् भोजनं

तेषाम् अभ्यागमनं भोजनं विवाहम् इति च वर्जयेत् ३३

▼

### ⑤

>
▼ Bühler

33. Intercourse, eating, and intermarriage with them should be avoided. 73

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत् ॥३३॥

## टिप्पनी⑥

तेषामेतेषामभ्यागमनमाभिमुख्येन गमनम्, मातापितृपुत्रदारशरीररक्षणार्थमपि वर्जयेत् । यद्यपि भिक्षा सर्वतः प्रतिग्राह्येति वक्ष्यते भोजनमुद्यतमपि वर्जयेत् 74 'अपि दुष्कृतकारिण' इति सत्यपि वचने । विवाहं च वर्जयेत् यद्यपि 75 'स्त्रीरत्नं दुष्कुलादपी'ति मानवस्मरणम् ॥ ३३ ॥

#### 34 तेषाम् इच्छताम् प्रायश्चित्तम्

तेषाम् इच्छतां प्रायश्चित्तम् ३४

▼

⑤

>
▼ Bühler

34. If they wish it (they may perform the following) expiation;

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषामिच्छतां प्रायश्चित्तम् ॥ ३४ ॥

## टिप्पनी⑥

इच्छतामिति वचनान्न बलात्कारेण प्रायश्चित्तं कारयितव्यम् ॥ ३४ ॥

#### 35 यथा प्रथमे ऽतिक्रम

यथा प्रथमे ऽतिक्रम ऋतुर् एवं संवत्सरः ३५

▼

⑤

>
▼ Bühler

35. In the same manner as for the first neglect (of the initiation, a penance of) two months (was) prescribed, so (they shall do penance for) one year. 76

▼ हरदत्त-टीका

## सूत्रम्⑥

यथा प्रथमेऽतिक्रम ऋतुरेवं सम्वत्सरः ॥ ३५ ॥

## टिप्पनी⑥

यथा प्रथमेऽतिक्रमे ब्रह्मचर्यस्य ऋतुः कालः एषमन्यस्मिन्नतिक्रमे संवत्सरः कालः ॥ ३५॥

#### 36 अथोपनयनं, तत उदकोपस्पर्शनम्

अथोपनयनं, तत उदकोपस्पर्शनम् ३६

▼

## ⑤

>
▼ Bühler

36. Afterwards they may be initiated, and then they must bathe (daily),

▼ हरदत्त-टीका

## सूत्रम्⑥

अथोपनयनम् ॥३६॥
तत उदकोपस्पर्शनम् ॥ ३७ ॥

## टिप्पनी⑥

गते ॥ ३६॥ ३७॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने प्रथमा 77कण्डिका।

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. आप० ध० १.३०.८.↩

6. आप० ध० १. ३१. १.↩

7. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

8. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

> विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
> तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

9. आप० ध० १ ३१. ६.↩

10. इदं च तर्किकादिमतमनुसृत्य प्रभाकरमतञ्च । भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणां चोदनालक्षणानां धर्मत्वाङ्गीकारात् । उक्तं हि भट्टपादैः-

    > श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः ।
    > चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥ इति । श्लो. वा. १२. १९१.

    ↩

11. पक्षेऽप्राप्तांशस्य पूरणकरणादित्यर्थः ।↩

12. तत्तन्निषेध्यक्रियाप्रागभावपरिपालनादिति यावत् ।↩

13. यदि प्रमाणमिदमपि प्रमाणम् इति क० पु० ॥↩

14. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

17. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

18. आप० ध० १.३०.८.↩

19. मनु० स्मृ० २.६↩

20. गौ० ध० १. १, २↩

21. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

22. आप० ध० १ १२.१०.↩

23. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

24. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

25. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

26. आप० ध० १.३०.८.↩

27. Manu II, 35.↩

28. मनु० स्मृ० २.६↩

29. गौ० ध० १. १, २↩

30. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

31. आप० ध० १ १२.१०.↩

32. यस्य यस्य, स सः इति द्विरुक्ति. क० पु० ।↩

33. तै० ब्रा० १. १ २.↩

34. आप० परि० १.२↩

35. गौ० ध० २१. ४.↩

36. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

37. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

38. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

39. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

40. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

41. आप० ध० १.३०.८.↩

42. मनु० रमृ० २.६↩

43. गौ० ध० १. १, २↩

44. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

45. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

46. आप० ध० १ १२.१०.↩

47. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

48. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

49. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

50. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

51. Manu II, 69; Yājñ. I, 15.↩

52. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

53. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

54. Manu II, 144.↩

55. Manu II, 146-148.↩

56. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

57. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

58. Manu II, 147.↩

59. आप० ध० १.३०.८.↩

60. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

61. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

62. Manu II, 37.↩

63. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

64. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

65. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

66. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

67. The meaning is, he shall keep all the restrictions imposed upon a student, as chastity, &c, but that he shall not perform the fire-worship or service to a teacher, nor study. Manu II, 39; XI. 192, Yājñ. I, 38; Weber, Ind. Stud. X, 101.↩

68. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

69. 'If he is strong, he shall bathe three times a day--morning, midday, and evening.'--Haradatta.↩

70. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

71. Brahman, apparently, here means 'Veda,' and those who neglect its study may be called metaphorically 'slayers of the Veda.'↩

72. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

73. Manu II, 40; Āśv. Gṛ. Sū. I, 19, 8, 9; Weber, Ind. Stud. X, 21.↩

74. आप० ध० १.३०.८.↩

75. मनु० स्मृ० २.६↩

76. Compare above, I, 1, 1, 28.↩

77. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

# ०२①

## 01 प्रतिपूरुषं सङ्ख्याय संवत्सरान्④

प्रति-पूरुषं संख्याय संवत्सरान् यावन्तो ऽनुपेताः स्युः १

▼

### ⑤

>
▼ Bühler

1. For as many years as there are uninitiated persons, reckoning (one year) for each ancestor (and the person to be initiated himself),

▼ हरदत्त-टीका

### सूत्रम्⑥

प्रतिपूरुषं संख्याय संवत्सरान् यावन्तोऽनुपेताः स्युः ॥ १ ॥

### टिप्पनी⑥

यदि पितैवानुपेतः ततस्संवत्सरमेकम् । अथ पितामहोऽपि, ततो द्वौ । अथ स्वयमपि यथाकालमनुपेतः, ततः संवत्सरानिति ॥१॥

#### 02 सप्तभिः पावमानीभिर् यदन्ति

सप्तभिः पावमानीभिर् "यदन्ति यच् च दूरक" इति एताभिर्, यजुष्-पवित्रेण, साम-पवित्रेणाङ्गिरसेणेति*(→ वामदेव्यम्)* २

### पावमान्यः⑤

य॑द् अ॑न्ति य॑च् च दूरके॑
भयं॑ विन्द॑ति मा॑म् इह॑
प॑वमान वि॑ त॑ज् जहि

प॑वमानः सो॑ अद्य॑ नः
पवि॑त्रेण वि॑चर्षणिः
यः॑ पोता॑ स॑ पुनातु नः

य॑त् ते पवि॑त्रम् अर्चि॑षि
अ॑ग्ने वि॑ततम् अन्त॑र् आ॑
ब्र॑ह्म ते॑न पुनीहि नः

य॑त् ते पवि॑त्रम् अर्चिव॑द्*(=अर्चिष्मत्)*
अ॑ग्ने ते॑न पुनीहि नः ।
ब्रह्म-सवैः॑ पुनीहि नः ॥

उभा"भ्यां देव सवितः
पवि"त्रेण सवे"न च
मा"म् पुनीहि विश्व"तः

त्रिभि"ष् - ट्वं" देव सवितर्
व"र्षिष्ठैः, सोम धा"मभिः ।
अ"ग्ने द"क्षैः - पुनीहि नः ॥

पुन"न्तु मां" देव-जनाः"
पुन"न्तु व"सवो धिया" ।
वि"श्वे देवाः पुनीत" मा
जा"तवेदः पुनीहि" मा ॥

## यजुष्-पवित्रम्⑤

'आपो अस्मान्मातरः शुन्धन्त्वि'त्यनेन Taitt. Saṃh. I, 2, 1, 1 *(पूरणीयम्??)*

## साम-पवित्रम्⑤

## ऋक्⑥

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ 12-1:0682 ॥

क"या नश् चित्र" *(→इन्द्रः)* **आ" भुवद्**
**ऊती"** *(=रक्षणम्/ तर्पणम् [तेन])*, सदा"-वृधः *(=वर्धमानः)* स"खा ।
क"या श"चिष्ठया *(=प्रज्ञावता)* वृता" *(=वर्तनेन)* १

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु ॥ 12-2:0683 ॥

क"स् त्वा सत्यो" म"दानां
मं"हिष्ठो *(=पूज्यः)* **मत्सद्** *(=मादयेद्)* अ"न्धसः*(= भोज्यः (→[सोमः]))* ।
दृळ्हा" *(=ढम्)* चिद् **आरु"जे** *(=सम्भङ्क्तुम्)* व"सु २

अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतये ॥ 12-3:0684 ॥॥12(टा)॥

अभी" षु" णः स"खीनाम्
**अविता"** जरितॄणा"म् *(=स्तोतॄणाम्)*।
शतं" **भवास्य्** ऊति"भिः *(=रक्षाभिः)*३

*(अभिभवसि = सम्मुखो भवसि)*

## साम - वामदेव्यम्।⑥

- पारम्परिक-गान-मूलम् अत्र।

वामदेव्यम् ।

का*([टा]%)*याअ । न*([धु])*श्चा*(३)*अइत्रा*(३)*आ*(["])* भुवात*(v)*।
ऊ*([त]%३)*ती*([गो]--%३)*। सादा*(["])*, वृधस्, सा*(३--%)*खा*([त]३--%)*।

औ([पे])हो("३)हाइ।
क([तः])या(--%३)अ +शचाइ,,ष([टि])यौ(")हो।
ओ हिं([ता])म्मा([प्रे])अ।
वा("३[फ])आर्तो("), ओ(")हाइ ।।

का(%)स्([टा]) त्वा(")अ। स([धू])त्यो(")ओ, मा(%)दा(%)ना(")अम् ।
मा([त]%)ं,हि([गो])ष्ठो(["])ओ, मात्साद्, अन्धा(३--%),, सा([त]--%३)।
औ([पे])हो("३)हाइ।
दृ([तः])ढा(--%३)अ चिदा। रु([टी])जौ(["])हो(["])।
ओ हिं([ता])म्मा([प्रे])अ।
वा("३)आ([फ])सो, ओ(")हाइ॥

आ([टा]%)भि(")इ । षु([धू]) णा(")अ, स्सा(%)खि(%)ना(")अम्।
आ([त]%)वि([घि])ता(["])अ, जराइत्री(["])इणा(--%३)म्([त]) ।
औ([पे])हो("३)हाइ।
श([तः])ता(--%३)अम् भव,,सि([टी]) यौ(["]) हो।
ओ हिं([ता])म्मा([प्रे])अ। [ऊ](v)ता([फ]"३)आयो, ओ(")हाइ ।।

▼

⑤

>

▼ Bühler

2. (They should bathe daily reciting) the seven 1 Pāvamānīs, beginning with 'If near or far,' the Yajuṣpavitra, ('May the waters, the mothers purify us,' &c.) the Sāmapavitra, ('With what help assists,' &c.), and the Āṅgirasapavitra ('A swan, dwelling in purity'),

▼ हरदत्त-टीका

## सूत्रम्⑥

सप्तभिः पावमानीभि"र्यदन्ति यच्च दूरक" इत्येताभिर् यजुष्पवित्रेण सामपवित्रेणाऽऽङ्गिरसेनेति ॥ २॥

## प्रस्तावः⑥

अथोदकोपस्पर्शने मन्त्राः —

## टिप्पनी⑥

पवमानः सोमो देवता यासां ताः 2पावमान्यः ।

यजुष्पवित्रेण3 'आपो अस्मान्मातरः शुन्धन्त्वि'त्यनेन, सामपवित्रेण 'कया नश्चित्र आभुवदि'त्यादिगीतेन वामदेव्येन साम्ना, आङ्गिरसेन4 'हंसाशुचिषदि'त्यनेन एतैरञ्जलिना शिरस्यपोऽवसिञ्चेत् ॥ २ ॥

#### 03 अपि वा व्याहृतीभिर्

अपि वा व्याहृतीभिर् एव ३

▼

⑤

>
▼ Bühler

3. Or also reciting the Vyāhṛtis (om, bhūḥ, bhuvaḥ, suvaḥ).

▼ हरदत्त-टीका

अपि वा व्याहृतीभिर् एव ३

#### 04 अथाध्याप्यः

अथाध्याप्यः ४

▼

⑤

>
▼ Bühler

4. After that (such a person) may be taught (the Veda).

▼ हरदत्त-टीका

अथाध्याप्यः ४

#### 05 अथ यस्य प्रपितामहादि

अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं - ते श्मशान-संस्तुताः ५

▼

⑤

>
▼ Bühler

5. But those whose great-grandfather's (grandfather's and father's) initiation is not remembered, are called 'burial-grounds.'

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं ते श्मशानसंस्तुताः ॥ ५ ॥

## टिप्पनी⑥

प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं च यथाकालमिति । ते तथाविधा माणवकाः श्मशानसंस्तुताः । एतेन 5 'श्मशाने सर्वतः शम्याप्रासा' दित्यध्ययननिषेध एषामपि सन्निधौ भवति ॥ ५॥

#### 06 तेषाम् अभ्यागमनम् भोजनं

तेषाम् अभ्यागमनं भोजनं विवाहम् इति च वर्जयेत्। तेषामिच्छतां प्रायश्चित्तं - द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेद् । अथोपनयनं तत उदकोपस्पर्शनं पावमान्यादिभिः ६

▼

## ⑤

>
▼ Bühler

6. Intercourse, dining, and intermarriage with them should be avoided. For them, if they like, the (following) penance (is prescribed). (Such a man) shall keep for twelve years the rules prescribed for a student who is studying the three Vedas. Afterwards he may be initiated. Then he shall bathe, reciting the Pāvamānīs and the other (texts mentioned above, I, 1, 2, 2).

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं6तत उदकोपस्पर्शनं पावमान्यादिभिः ॥ ६ ॥

## टिप्पनी⑥

गतम् । पावमान्यादिभिरित्यनेनैव प्रतिपूरुषं सङ्ख्याय सम्बत्सरानित्येतदपि द्रष्टव्यम् ॥ ६ ॥

#### 07 अथ गृहमेधोपदेशनम्

अथ गृहमेधोपदेशनम् ७

▼

## ⑤

>
▼ Bühler

7. Then he may be instructed in the duties of a householder.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ गृहमेधोपदेशनम् ॥ ७ ॥

## टिप्पनी⑥

गृहमेधो गृह्यशास्त्रं गृहस्थधर्मो वा ॥ ७॥

#### 08 नाध्यापनम्

नाध्यापनम् ८

▼

## ⑤

>

▼ Bühler

8. He shall not be taught (the whole Veda), but only the sacred formulas required for the domestic ceremonies.

▼ हरदत्त-टीका

## सूत्रम्⑥

नाध्यापनम् ॥ ८॥

## टिप्पनी⑥

नाध्यापनं कृत्स्नस्य वेदस्य । किं तु गृह्यमन्त्राणामेवेति ॥ ८॥

#### 09 ततो यो निर्वर्तते

ततो यो निर्वर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे ९

▼

## ⑤

>

▼ Bühler

9. When he has finished this (study of the Gṛhya-mantras), he may be initiated (after having performed the penance prescribed) for the first neglect (I, 1, 1, 28).

▼ हरदत्त-टीका

## सूत्रम्⑥

ततो यो निवर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे ॥९॥

## टिप्पनी⑥

ततः एवं कृतप्रायश्चित्तात् गृहस्थीभूताद्यो निवर्तते उत्पद्यते तस्योपनयनसंस्कारः कर्तव्यः । कथम् ? यथा प्रथमेऽतिक्रमे ऋतुं त्रैविद्यकं ब्रह्मचर्यं चारयित्वेत्यर्थः ॥९॥

#### 10 तत ऊर्ध्वम् प्रकृतिवत्

तत ऊर्ध्वं प्रकृतिवत् १०

▼

## ⑤

>
▼ Bühler

10. Afterwards (everything is performed) as in the case of a regular initiation. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

तत ऊर्ध्वं प्रकृतिवत् ॥ १० ॥

## टिप्पनी⑥

ततः यो निवर्तते तस्य प्रकृतिवत् यथा प्राप्तमुपनयनं कर्तव्यमिति । यस्य तु प्रपितामहस्थ पितुरारभ्य नानुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तम्, धर्मज्ञैरूहितव्यम् ॥ १०॥

#### 11 उपेतस्याचार्यकुले ब्रह्मचारिवासः

उपेतस्याचार्यकुले ब्रह्मचारिवासः ११

▼

## ⑤

>
▼ Bühler

## सूत्रम्⑥

उपेतस्याऽऽचार्यकुले ब्रह्मचारिवासः ॥ ११ ॥

## प्रस्तावः⑥

एवं ततः पूर्वेष्वपि निरूपितमुपनयनम् , अथाऽध्ययनविधिः—

## टिप्पनी⑥

एवं यथाविध्युपेतस्य ब्रह्मचारिणस्सत आचार्यकुले वासो भवति । ब्रह्म वेदस्तदर्थं व्रतं चरतीति ब्रह्मचारी। अध्ययनाङ्गानि व्रतानि चरता आचार्यकुले वस्तव्यमित्युक्तं भवति ॥ ११ ॥

▼ हरदत्त-टीका

He who has been initiated shall dwell as a religious student in the house of his teacher, 8

#### 12 अष्टाचत्वारिंशद्वर्षाणि

अष्टाचत्वारिंशद्वर्षाणि १२

▼

## ⑤

>
▼ Bühler

12. For forty-eight years (if he learns all the four Vedas), 9

▼ हरदत्त-टीका

## सूत्रम्⑥

10अष्टाचत्वारिंशद्वर्षाणि ॥ १२ ॥

## प्रस्तावः⑥

तत्र कालः—

## टिप्पनी⑥

चतुर्णां वेदानामध्ययनकाल एषः । प्रतिवेदं द्वादश ॥ १२ ॥

#### 13 पादूनम्

पादूनम् १३

▼

## ⑤

>
▼ Bühler

13. (Or) a quarter less (i.e. for thirty-six years),

▼ हरदत्त-टीका

## सूत्रम्⑥

पादूनम् ॥ १३ ॥

## टिप्पनी⑥

स एव कालः पादून वा प्रत्येतव्यः । पादेनोनं पादूनम् । पररूपं 11कतन्तवत् । षट्त्रिंशद्वर्षाणि । प्रतिवेदं नव ॥ १३ ॥

#### 14 अर्धेन

अर्धेन १४

▼

## ⑤

>
▼ Bühler

14. (Or) less by half (i.e. for twenty-four years),

▼ हरदत्त-टीका

## सूत्रम्⑥

अर्धेन ॥ १४॥

## टिप्पनी⑥

ऊनमिति12 समस्तमप्यपेक्षते। चतुर्विंशतिर्वर्षाणि। प्रतिवेदं षट् ॥१४॥

#### 15 त्रिभिर्वा

त्रिभिर्वा १५

▼

## ⑤

>
▼ Bühler

15. (Or) three quarters less (i.e. for twelve years),

▼ हरदत्त-टीका

## सूत्रम्⑥

त्रिभिर्वा ॥ १५॥

## टिप्पनी⑥

पादैरूनमिति प्रकरणाद्गम्यते । द्वादशवर्षाणि प्रतिवेदं त्रीणि ॥१५॥

#### 16 द्वादशावरार्ध्यम्

द्वादशावरार्ध्यम् १६

▼

## ⑤

>
▼ Bühler

16. Twelve years (should be) the shortest time (for his residence with his teacher). 13

▼ हरदत्त-टीका

## सूत्रम्⑥

द्वादशावरार्ध्यम् ॥ १६ ॥

## टिप्पनी⑥

अवरार्ध्यशब्दोऽवरमात्रेत्येतस्मिन्नर्थे वर्तते । द्वादशवर्षाणि अवरमात्रा यथा भवति तथा ब्रह्मचारिणा गुरुकुले वस्तव्यम् । पूर्वेणैव सिद्धे यो ब्रह्मचार्यतिमेधावितया चतुरोऽपि वदानितोऽल्पीयसा कालेन गृह्णाति तेनाप्येतावन्तं कालं गुरुकुले वस्तव्यम् । 14 'विद्यया स्नाती'त्येतस्मिन्नपि पक्षे नातित्वरितेन स्नातव्यमित्येवमर्थमिदमारभ्यते । एतेन एकस्य वेदस्य त्रीणि वर्षाणि ब्रह्मचर्यमवश्यं15 भावीत्यर्थात्सिद्धम् ।
मनुरप्याह—

> 16षट्त्रिंशदाब्दिक चर्थ गुरौ विद्यकं व्रतम् ।
> तदाधिक पादिकं वा ग्रहणान्तिकमेव वा ॥ इति ॥

त्रयाणां वेदानां षट् त्रिंशत् ; एकैकस्य द्वादश । तदर्धिकं त्रयाणामष्टादश; एकैकस्य षट् । पादिकं वा त्रयाणां नव, एकैकस्य त्रीणि । ग्रहणान्तिकमेव वेति एकैकस्य त्रिभ्य ऊर्ध्वमनियमः, न प्रागित्यर्थो द्रष्टव्यः॥१६॥

#### 17 न ब्रह्मचारिणो विद्यार्थस्य

न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति १७

▼

## ⑤

>
▼ Bühler

17. A student who studies the sacred science shall not dwell with anybody else (than his teacher). 17

▼ हरदत्त-टीका

## सूत्रम्⑥

न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति ।। १७ ।।

## टिप्पनी⑥

ब्रह्मचारिविद्यार्थशब्दयोरर्थ उक्तः । यो ब्रह्मचारी विद्यार्थो भवति न तेन दिवसमात्रमपि परस्य समीपे वस्तव्यम्। आचार्यस्य समीप एव वस्तव्यमित्युक्तं भवति । विद्यार्थस्येति वचनात् नैष्ठिकस्य कदाचिदन्यत्र 18वासेऽपि न दोषः । यद्वा भोजननिवृत्तिरेवोपवासः । परलोकार्थ उपवासः परोपवासः स विद्यार्थस्य न भवति। नैष्ठिकस्य तु19 दोषः। अत्र पक्षे 20 आहिताग्निरनड्वानि'ति विद्यार्थब्रह्मचारिविषयम् ॥१७॥

#### 18 अथ ब्रह्मचर्यविधिः

अथ ब्रह्मचर्यविधिः १८

▼

## ⑤

>
▼ Bühler

18. Now (follow) the rules for the studentship.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ ब्रह्मचर्यविधिः ॥ १८ ॥

## टिप्पनी⑥

ब्रह्म वेदस्तदर्थं यद्व्रत चरितव्यं तद्ब्रह्मचर्यं तदधिक्रियते ॥ १८ ॥

#### 19 आचार्याधीनः स्यादन्यत्र पतनीयेभ्यः

आचार्याधीनः स्यादन्यत्र पतनीयेभ्यः १९

▼

## ⑤

>
▼ Bühler

19. He shall obey his teacher, except (when ordered to commit) crimes which cause loss of caste. [21]

▼ हरदत्त-टीका

## सूत्रम्⑥

आचार्याधीनस्स्यादन्यत्र पतनीयेभ्यः ॥ १९ ॥

## टिप्पनी⑥

"आचार्याधीनो भवे"त्युपनयनान्ते यत् संशासनं तत्सिद्धैवाचार्याधीनताऽनूद्यते 'अन्यत्र पतनीयेभ्य' इति विशेषं वक्ष्यामीति।[22]पतनीय इति करणे कृत्प्रत्ययः । [23]अमुमरातिं ब्राह्मणमित्थं व्यापादयेत्याचार्येण चोदितोऽप्येवमादि न कुर्यादिति ॥ १९ ॥

#### 20 हितकारी गुरोरप्रतिलोमयन्वाचा

हितकारी गुरोरप्रतिलोमयन्वाचा २०

▼

⑤

>
▼ Bühler

20. He shall do what is serviceable to his teacher, he shall not contradict him. 24

▼ हरदत्त-टीका

## सूत्रम्⑥

हितकारी गुरोरप्रतिलोमयन्वाचा ॥ २० ॥

## टिप्पनी⑥

आचार्येण प्रयुक्तोऽप्यप्रयुक्तोऽपि तस्मै हितमेव कुर्यात्, वाचा 25प्रातिलोम्यमकुर्वन् ॥ २० ॥

#### 21 अधासनशायी

अधासनशायी २१

▼

⑤

>
▼ Bühler

21. He shall always occupy a couch or seat lower (than that of his teacher). 26

▼ हरदत्त-टीका

## सूत्रम्⑥

अधासनशायी ॥ २१ ॥

## टिप्पनी⑥

शयनं शायः । 27 'कृत्यल्युटो बहुल'मिति बहुलवचनात् घञ् । अधः आसनशायो यस्य सः अधासनशायी । गुरुसन्निधावध आसीत अधश्शयीतेत्युक्तं भवति । अधश्शदस्य सवर्णदीर्घश्छान्दसः, अपपाठो वा। तृणेषु प्रस्तरेषु चासनशयने शिष्टाचारसिद्धे ॥ २१ ॥

#### 22 नानुदेश्यम् भुञ्जीत

नानुदेश्यं भुञ्जीत २२

▼

### ⑤

>
▼ Bühler

22. He shall not eat food offered (at a sacrifice to the gods or the Manes),

▼ हरदत्त-टीका

## सूत्रम्⑥

नानुदेश्यं भुञ्जीत ।। २२॥

## टिप्पनी⑥

अनुदेश्यं श्राद्धार्थं देवतार्थं वा उद्दिष्टं न भुञ्जीत ॥ २२ ॥

#### 23 तथा क्षारलवणमधुमांसानि

तथा क्षार-लवण-मधु-मांसानि *(गृह्यसूत्र उपनयनप्रकरणे क्षार-लवणयोर् त्र्यहं नियमनात् मध्वादेरेव त्र्यहादूर्ध्वं नित्यो निषेधः। )* २३

▼

### ⑤

>
▼ Bühler

23. Nor pungent condiments, salt, honey, or meat. 28

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा क्षारलवणमधुमांसानि ॥ २३ ॥

## टिप्पनी⑥

न भुञ्जीतेत्येव । 29क्षारादीनि गृह्ये गतानि ॥ २३ ॥

#### 24 अदिवास्वापी

अदिवास्वापी २४

▼

### ⑤

>
▼ Bühler

24. He shall not sleep in the day-time.

▼ हरदत्त-टीका

## सूत्रम्⑥

अदिवास्वापी ॥ २४ ॥

## टिप्पनी⑥

न दिवा स्वप्यात् ॥ २४ ॥

#### 25 अगन्धसेवी

अगन्धसेवी २५

▼

### ⑤

>
▼ Bühler

25. He shall not use perfumes. 30

▼ हरदत्त-टीका

## सूत्रम्⑥

अगन्धसेवी ॥ २५ ॥

## टिप्पनी⑥

चन्दनादीनि गन्धद्रव्याणि न सेवेत ॥ २५ ॥

#### 26 मैथुनन् न चरेत्

मैथुनं न चरेत् २६

▼

### ⑤

>
▼ Bühler

26. He shall preserve chastity. 31

▼ हरदत्त-टीका

## सूत्रम्⑥

मैथुनं न चरेत् ॥ २६ ॥

## टिप्पनी⑥

उपचारक्रिया केली स्पर्शो 32भूषणवाससाम् ।
एकशय्यासनं क्रीडा चुम्बनालिङ्गने तथा ॥ इत्यादेस्सर्वस्योपलक्षणं मैथुनग्रहणम् ॥ २६ ॥

#### 27 उत्सन्नश्लाघः

उत्सन्न-श्लाघः २७

▼

### ⑤

>
▼ Bühler

27. He shall not embellish himself (by using ointments and the like). 33

▼ हरदत्त-टीका

## सूत्रम्⑥

उत्सन्नश्लाघः॥२७॥

## टिप्पनी⑥

श्लाघा शोभा सा उत्सन्ना यस्य स उत्सन्नश्लाघः । एवंभूतो भवेत् । 34स्नक्षणादिना मुखादिकं उज्वलं न कुर्यात् इति ॥ २७ ॥

#### 28 अङ्गानि न प्रक्षालयीत

अङ्गानि न प्रक्षालयीत २८

▼

### ⑤

>
▼ Bühler

28. He shall not wash his body (with hot water for pleasure).

▼ हरदत्त-टीका

## सूत्रम्⑥

अङ्गानि न प्रक्षालयीत ॥ २८ ॥

## टिप्पनी⑥

35विना शिरसा सुखार्थमुष्णोदकादिना शरीरं न प्रक्षालयेत् ॥२८॥

#### 29 प्रक्षालयीत त्वशुचिलिप्तानि गुरोर्

प्रक्षालयीत त्वशुचिलिप्तानि गुरोर् असन्दर्शे २९

▼

### ⑤

>
▼ Bühler

29. But, if it is soiled by unclean things, he shall clean it (with earth or water), in a place where he is not seen by a Guru. 36

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रक्षालयीत त्वशुचिलिप्तानि37 गुरोरसन्दर्शे ॥२९॥

## टिप्पनी⑥

यानि तु मूत्रपुरीषाद्यशुचिलिप्तान्यङ्गानि तानि कामं38 मृदाद्भिः प्रक्षालयेत् यावद्गन्धो लेपश्चापैति । तदपि गुरोरसन्दर्शे39 यत्र स्थितं गुरुर्न पश्यति तत्र। आचार्यप्रकरणे गुरुग्रहणात् पित्रादीनामपि ग्रहणम् ॥ २९ ॥

#### 30 नाप्सु श्लाघमानः स्नायाद्

नाप्सु श्लाघमानः स्नायाद् - यदि स्नायाद् दण्डवत् ३०

▼

⑤

>
▼ Bühler

30. Let him not sport in the water whilst bathing; let him swim (motionless) like a stick. 40

▼ हरदत्त-टीका

## सूत्रम्⑥

41 नाप्सु श्लाघमानः स्नायाद्यदि स्नायाद्दण्डवत्प्लवेत् ॥ ३० ॥

## टिप्पनी⑥

स्नाने प्राप्त न श्लाघमानः स्नायात् । किं तु दण्डवत्प्लवेदित्युक्तम् । स्नानीयैर्मलापकर्षणं श्लाघा; क्रीडा वा जले । अपरं आह-'अङ्गानि न प्रक्षालयीते'(सू.२८)त्यासमावर्तनान्नित्यस्नानस्य प्रतिषेधः । 'प्रक्षालयीत त्वशुचिलिप्तानी'(सू.२९)ति नैमित्तिकस्य विधिः। 'नाप्सु श्लाघमानः स्नाया'(सू. ३०)दिति तत्रैव श्लाघाप्रतिषेध इति ॥३०॥

#### 31 जटिलः

जटिलः ३१

▼

⑤

>
▼ Bühler

31. He shall wear all his hair tied in one braid. 42

▼ हरदत्त-टीका

## सूत्रम्⑥

जटिलः ॥ ३१॥

## टिप्पनी⑥

सर्वानेव केशान् जटां कृत्वा बिभृयात् ॥ ३१ ॥

#### 32 शिखाजटो वा वापयेद्

शिखाजटो वा वापयेद् इतरान् ३२

▼

## ⑤

>
▼ Bühler

32. Or let him make a braid of the lock on the crown of the head, and shave the rest of the hair.

▼ हरदत्त-टीका

## सूत्रम्⑥

शिखाजटो वा वापयेदितरान् ॥ ३२ ॥

## टिप्पनी⑥

अथवा शिखामेव जटां कृत्वा इतरान्केशान् वापयेत् नापितेन ॥ ३२ ॥

#### 33 मौञ्जी मेखला त्रिवृद्

- मौञ्जी मेखला त्रिवृद् ब्राह्मणस्य, शक्तिविषये दक्षिणावृत्तानाम् ३३

▼

## ⑤

>
▼ Bühler

33. The girdle of a Brāhmaṇa shall be made of Muñja grass, and consist of three strings; if possible, (the strings) should be twisted to the right. 43

▼ हरदत्त-टीका

## सूत्रम्⑥

मौञ्जी मेखला त्रिवृद्ब्राह्मणस्य शक्तिविषये दक्षिणावृत्तानाम् ॥ ३३ ॥

## टिप्पनी⑥

श्रुतर्षयस्तु भवन्ति केचित्कर्मफलशेषेण पुनस्सम्भवे ॥ ५ ॥

## प्रस्तावः⑥

कथं तर्ह्यद्यतना अतिक्रामन्तोऽपि नियमानल्पेनैव यत्नेन चतुरो वेदान गृह्णन्ति? युगान्तरे सम्यगनुष्ठितस्य नियमकर्मणः फलशेषेणेत्याह—

## टिप्पनी⑥

पुनस्सम्भवः पुनर्जन्म ॥ ५ ॥

#### 06 यथा श्वेतकेतुः

यथा श्वेतकेतुः ६

▼

### ⑤

>
▼ Bühler

6. Like Śvetaketu. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

यथा श्वेतकेतुः ॥ ६ ॥

## प्रस्तावः⑥

अत्रोदाहरणम्—

## टिप्पनी⑥

श्वेतकेतुर्ह्यल्पेनैव कालेन चतुरो वेदाञ्जग्राह। तथा च छान्दोग्यम्— 8"श्वेतकेतुर्हारुणेय आस । तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं, न वै सोम्यास्मत्कुलीलोऽननूच्य ब्रह्मबन्धूरिव भवतीति। स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षस्सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाये"ति ॥ ६ ॥

#### 07 यत्किञ् च समाहितो

यत्किं च समाहितो ऽब्रह्माप्य् आचार्याद् उपयुङ्क्ते ब्रह्मवद् एव तस्मिन् फलं भवति ७

▼

### ⑤

>
▼ Bühler

7. And whatever else besides the Veda, (a student) who obeys the rules learns from his teacher, that brings the same reward as the Veda. 9

▼ हरदत्त-टीका

## सूत्रम्⑥

यत्किञ्च समाहितोऽब्रह्मप्याचार्यादुपयुङ्क्ते ब्रह्मवदेव तस्मिन् फलं भवति ॥ ७ ॥

## प्रस्तावः⑥

एवं नियमातिक्रमे देषमुक्त्वा तदनुष्ठाने सिद्धिमाह —

## टिप्पनी⑥

अब्रह्मपि अब्रह्मापि । पररूपम्, कतन्तवत् । अपेर्वाऽकारलोपः, पिहितपिनद्धादिवत् । वेदव्यतिरिक्तमपि यत्किञ्चित् विप्रमन्त्रादि समाहितो नियमवान् भूत्वा आचार्यादुपयुङ्क्ते गृह्णाति तस्मिन् वेदव्यतिरिक्ते ब्रह्मवदेव फलं भवति ॥ ७ ॥

#### 08 अथो यत्किञ् च

अथो यत्किञ् च मनसा वाचा चक्षुषा वा सङ्कल्पन् ध्यायत् आहाभिविपश्यति वा तथैव तद्भवतीत्युपदिशन्ति ८

▼

## ⑤

>
▼ Bühler

8. Also, if desirous to accomplish something (be it good or evil), he thinks it in his mind, or pronounces it in words, or looks upon it with his eye, even so it will be; thus teach (those who know the law).

▼ हरदत्त-टीका

## सूत्रम्⑥

अथो यत्किञ्च मनसा वाचा चक्षुषा वा सङ्कल्पयन् ध्यायत्याहाऽभिविपश्यति वा तथैव तद्भवतीत्युपदिशन्ति ॥ ८ ॥

## प्रस्तावः⑥

निग्रहानुग्रहशक्तिरप्यस्य भवतीत्याह—

## टिप्पनी⑥

अथो अपि च यत्किञ्च निग्रहात्मकं अनुग्रहात्मकम् वा सङ्कल्पयन् चिकीर्षन्मनसा निर्दयेन शिवेन वा ध्यायति— इत्थमिदमस्याऽस्त्विति, तथैव तद्भवति। तथा यत्किञ्च सङ्कल्पयन्वाचा 10क्रूरया मधुरया वा आह— इत्थमिदमस्यास्त्विति तथैव तद्भवति। एवं यत्किञ्च सङ्कल्पयन् चक्षुषा घोरेण वा मैत्रेण वा अभिविपश्यति तथैव तद्भवतीत्युपदिशन्ति धर्मज्ञाः ॥ ८ ॥

#### 09 गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्तिरिति

गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्तिरिति ९

▼

### ⑤

>
▼ Bühler

9. (The duties of a student consist in) acts to please the spiritual teacher, the observance (of rules) conducive to his own welfare, and industry in studying. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्ति12रिति ॥ ९॥
######प्रस्तावः अवश्यं धर्मयुक्तेनाध्येतव्यमित्युक्तम् । इदानीं ते धर्मा लक्षणतस्त्रिविधा इत्याह—

## टिप्पनी⑥

यैरनुष्ठितैः गुरु प्रसीदति तानि गुरुप्रसादनीयानि पादप्रक्षालनादीनि कर्माणि । स्वस्तीत्यविनाशिनाम । तत्प्राप्तिसाधन स्वस्त्ययनम् । तच्च त्रिविधं दृष्टार्थमदृष्टार्थमुभयार्थं चेति । दृष्टार्थं बाहुनदीतरणादिनिषेधः । अदृष्टार्थं क्षारादिनिषेधः । उभयार्थं भिक्षाचरणादि । अध्ययनसम्वृत्तिरधीतस्य वेदस्याऽभ्यासः ॥ ९ ॥

#### 10 अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणः

अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणः कर्माणि १०

▼

### ⑤

>
▼ Bühler

10. Acts other than these need not be performed by a student. 13

▼ हरदत्त-टीका

## सूत्रम्⑥

अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणः कर्माणि ॥ १० ॥

## टिप्पनी⑥

एतेभ्यः अन्यानि कर्माणि निवर्तन्ते ब्रह्मचारिणो, न कर्तव्यानीत्यर्थः ॥ १० ॥

#### 11 स्वाध्यायधृग् धर्मरुचिस्तप्स्व्यृजुर्मृदुः सिध्यति

स्वाध्यायधृग् धर्मरुचिस्तप्स्व्यृजुर्मृदुः सिध्यति ब्रह्मचारी ११

▼

## ⑤

>
▼ Bühler

11. A religious student who retains what he has learned, who finds pleasure in the fulfilment of the law, who keeps the rules of studentship, who is upright and forgiving, attains perfection. 14

▼ हरदत्त-टीका

## सूत्रम्⑥

स्वाध्यायधृग्धर्मरुचिस्तपस्व्यृजुर्मृदुस्सिद्ध्यति ब्रह्मचारी ॥ ११ ॥

## टिप्पनी⑥

स्वाध्यायधृक् अधीतस्य15वेदस्य धारयिता अविस्मर्ता । धर्मे रुचि यस्य स धर्मरुचिः । तपस्वी नियमेषु तपशब्दः तद्वान् । ऋजुः अमायावी। मृदु । क्षमावान् । एवंभूतो ब्रह्मचारी सिद्ध्यति सिद्धिं प्राप्नोति । उक्ता सिद्धिः 16 'अथो यत्किञ्च मनसे'ति । तत्रोक्तानां पुनर्वचनमादरार्थम् । तदनुष्ठाने फलभूमा, अतिक्रमे च दोषभूमेति तात्पर्यम् ॥ ११ ॥

#### 12 सदा महान्तमपररात्रमुत्थाय गुरोस्तिष्ठन्प्रातरभिवादमभिवादयीतासावहम्

सदा महान्तम् अपररात्रम् उत्थाय
गुरोस् तिष्ठन्
प्रातर् अभिवादम् अभिवादयीत - "असाव् अहं भो" इति १२

▼

## ⑤

>
▼ Bühler

12. Every day he shall rise in the last watch of the night, and standing near his teacher, salute him with (this) salutation: I, N. N., ho! (salute thee.) 17

▼ हरदत्त-टीका

## सूत्रम्⑥

सदा महान्तमपररात्रमुत्थाय गुरोस्तिष्ठन्प्रातरभिवादनमभिवादयीताऽसावहं भो, इति ॥ १२ ॥

## टिप्पनी⑥

सदा प्रतिदिनं महान्तमपररात्रं रात्रे पश्चिमे याम उत्तिष्ठेत् । उत्थाय च समीपे तिष्ठन् गुरोः प्रातरभिवादनमभिवादयीत-'असावहं भो' इति न । असावित्यत्राऽऽत्मनो नामनिर्देशः, यथा-'अभिवादये यज्ञशर्माऽहं भो' इति ॥ १२ ॥

#### 13 समानग्रामे च वसतामन्येषामपि

समान-ग्रामे च वसताम् अन्येषाम् अपि वृद्धतराणां प्राक् प्रातर्-आशात् १३

▼

## ⑤

>

▼ Bühler

13. And (he shall salute) before the morning meal also other very aged (learned Brāhmaṇas) who may live in the same village.

▼ हरदत्त-टीका

## सूत्रम्⑥

समानग्रामे च वसतामन्येषामपि वृद्धतराणां प्राक्प्रातराशात् ॥ १३ ॥

## टिप्पनी⑥

अन्येषामप्याचार्यव्यतिरिक्तानाम् प्राक्प्रातराशात् प्रातर्भोजनात्माक् प्रातरभिवादनमभिवादयीत, ते चेत् समानग्रामे वसन्ति ॥ १३ ॥

#### 14 प्रोष्य च समागमे

प्रोष्य च समागमे १४

▼

## ⑤

>

▼ Bühler

14. If he has been on a journey, (he shall salute 18 the persons mentioned) when he meets them on his, return.

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रोष्य च समागमे ॥ १४ ॥

## टिप्पनी⑥

यदा स्वयं प्रोष्य समागतो भवति, आचार्यादयो वा तदाऽप्यभिवादयीत । इदं नैमित्तिकम् । पूर्वं नित्यम् ॥ १४ ॥

#### 15 स्वर्गमायुश्चेप्सन्

स्वर्गम् आयुश् चेप्सन् १५

▼

## ⑤

>
▼ Bühler

15. (He may also salute the persons mentioned at other times), if he is desirous of heaven and long life.

▼ हरदत्त-टीका

## सूत्रम्⑥

स्वर्गमायुश्चेप्सन् ॥ १५ ॥

## प्रस्तावः⑥

अथ काम्यम् —

## टिप्पनी⑥

अभिवादयीतेत्येव ॥ १५ ॥

#### 16 दक्षिणम्बाहुं श्रोत्रसमम् प्रसार्य

दक्षिणम् बाहुं श्रोत्र-समं प्रसार्य ब्राह्मणोऽभिवादयीत उरःसमं
राजन्यो मध्यसमं
वैश्यो नीचैः
शूद्रः प्राञ्जलि १६

▼

⑤

>
▼ Bühler

16. A Brāhmaṇa. shall salute stretching forward his right arm on a level with his ear, a Kṣatriya holding it on a level with the breast, a Vaiśya holding it on a level with the waist, a Śūdra holding it low, (and) stretching forward the joined hands. 19

▼ हरदत्त-टीका

## सूत्रम्⑥

दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयीतोरस्समं राजन्यो मध्यसमं वैश्यो 20नीचैश्शुद्रः प्राञ्जलि ॥ १६ ॥

## प्रस्तावः⑥

अभिवादनप्रकारं वर्णानुपूर्व्येणाऽऽह—

## टिप्पनी⑥

ब्राह्मणोऽभिवादयमानः आत्मनो दक्षिण बाहु श्रोत्रसम प्रसार्याभिवादयीत । उरस्समं राजन्यः । दक्षिणं प्रसार्याभिवायीतेत्यत्रानुवर्तते । एवमुत्तरयोरपि । मध्यसममुदरसमम् । ऊरुसममित्यन्ये । नीचैः पादसमं शूद्रोऽभिवादयीत । प्राञ्जलि यथा भवति तथा अभिवादयति । अञ्जलिं कृत्वेत्यर्थः । प्राञ्जलिरिति युक्तः पाठः ॥१६॥

#### 17 प्लावनञ् च नाम्नोऽभिवादनप्रत्यभिवादने

प्लावनं च नाम्नो *(ऽन्तिमस्वरस्य)* ऽभिवादन*(सम्बद्ध)*-प्रत्यभिवादने च पूर्वेषां वर्णानाम् १७

▼

⑤

>
▼ Bühler

17. And when returning the salute of (a man belonging) to the first (three) castes, the (last syllable of the) name (of the person addressed) is produced to the length of three moras. 21

▼ हरदत्त-टीका

## सूत्रम्⑥

प्लावनं च नाम्नोऽभिवादनप्रत्यभिवादने च पूर्वेषां वणानाम् ॥ १७ ॥

## टिप्पनी⑥

अभिवादनस्य यत्प्रत्यभिवादनं तत्राभिवादयितुर्नाम्नः प्लावनं कर्तव्यम् प्लुतः कर्तव्य इत्यर्थः। पूर्वेषां वर्णानां शूद्रर्जितानामभिवादयमानानाम् ।

22प्रत्यभिवादेऽशूद्र' इति पाणिनीयस्मृतिः। तत्र 23 वाक्यस्य टे'रित्यनुवृत्तेः प्रत्यभिवादवाक्यस्यान्ते नामप्रयोगः तस्य टेः प्लुतः । 'आयुष्मान् भव सौम्या३ इति प्रयोक्तव्यः । स्मृत्यन्तरवशानाम्नश्च पश्चादकारः। तथा च मनुः —

> 24आयुष्मान् भव सौम्येति
> वाच्यो विप्रोऽभिवादने । अकारश्चास्य नाम्नोऽन्ते
> वाच्यः पूर्वाक्षरः प्लुतः ॥”

इति ।

'आयुष्मान् भव सौम्य देवदत्त ३ अ' इति प्रयोगः । शम्भुर्विष्णुः पिनाकपाणिश्चक्रपाणिरित्यादीनां नाम्नां सम्बुद्धौ गुणे कृते 'एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' इत्ययं विधिर्भवति । अन्ते अकारः । 25 'तयोर्य्वावचि संहितायाम्' इति यकारवकारौ च भवतः शम्भा३व, विष्णा३व, पिनाकपाणा३य, चक्रपाणा३य, इति । अत्र सूत्रे 'प्रत्यभिवादने चे'ति चकारस्यार्थं न पश्यामः।

अपर आह- 'अभिवादने प्रत्यभिवादने च प्लावन'मिति । अस्मिन्नपि पक्षे द्वन्द्वेनाभिहितत्वाच्चशब्दोऽनर्थक एव । अभिवादने च शास्त्रान्तरे न क्वापि प्लुतो विहितः । तस्मादनर्थक एव चकारः। अनर्थकाश्च निपाता बहुलं प्रयुज्यन्ते ॥ १७ ॥

#### 18 उदिते त्वादित्य आचार्येण

उदिते त्वादित्य आचार्येण समेत्योपसङ्ग्रहणम् १८

▼

## ⑤

>

▼ Bühler

18. But when he meets his teacher after sunrise (coming for his lesson), he shall embrace (his feet). 26

▼ हरदत्त-टीका

## सूत्रम्⑥

उदिते त्वादित्य आचार्येण समेत्योपसंग्रहणम् ॥१८॥

## टिप्पनी⑥

उदिते त्वादित्ये आचार्येण अध्ययनार्थं समेत्य वक्ष्यमाणेन विधिनोपसंग्रहणं कुर्यात् ॥ १८ ॥

#### 19 सदैवाभिवादनम्

सदैवाभिवादनम् १९

▼

## ⑤

>
▼ Bühler

19. On all other occasions he shall salute (him in the manner described above).

▼ हरदत्त-टीका

## सूत्रम्⑥

सदैवाऽभिवादनम् ॥ १९ ॥

## टिप्पनी⑥

अन्यदा सर्वदा पूर्वोक्तप्रकारेणाभिवादनमेव । अयमनुवाद उत्तरविवक्षया ॥ १९ ॥

#### 20 उपसङ्ग्राह्य आचार्य इत्येके

उपसंग्राह्य आचार्य इत्येके २०

▼

## ⑤

>
▼ Bühler

20. But some declare that he ought to embrace the (feet of his) teacher (at every occasion instead of saluting him).

▼ हरदत्त-टीका

## सूत्रम्⑥

उपसंग्राह्य आचार्य इत्येके ॥२०॥

## टिप्पनी⑥

अभिवादनप्रसङ्गे सदैव उपसंग्राह्य आचार्य इत्येके मन्यन्ते ॥ २० ॥

#### 21 दक्षिणेन पाणिना दक्षिणम्

दक्षिणेन पाणिना दक्षिणं पादम्
अधस्ताद् अभ्यधिमृश्य सकुष्ठिकम् उपसंगृह्णीयात् २१

▼

## ⑤

>
▼ Bühler

21. Having stroked the teacher's right foot with his right hand below and above, he takes hold of it and of the ankle.

▼ हरदत्त-टीका

## सूत्रम्⑥

दक्षिणेन पाणिना दक्षिणं पादमधस्तादभ्यधिमृश्य सकुष्ठिकमुपसंगृह्णीयात् ॥ २१ ॥

## प्रस्तावः⑥

ननु किमिदमुपसंग्रहणम् ? तदाह—

## टिप्पनी⑥

आत्मनो दक्षिणेन पाणिना आचार्यस्य दक्षिणं पादं अधस्तादभ्यधिमृश्य, अधिशब्द उपरिमाचे, अधस्ताच्चोपरिष्टाच्चाभिमृश्य । सकुष्ठिकं सगुल्फम् । साङ्गुष्ठमित्यन्ये । उपसंगृह्णीयात् । इदमुपसंग्रहणम् । एतत्कुर्यात् ॥ २१ ॥

#### 22 उभाभ्यामेवोभावभिपीडयत उपसङ्ग्राह्याव् इत्येके

उभाभ्याम् एवोभाव् अभिपीडयत
उपसंग्राह्याव् इत्य् एके २२

▼

## ⑤

>
▼ Bühler

22. Some say, that he must press both feet, each with both hands, and embrace them. 27

▼ हरदत्त-टीका

## सूत्रम्⑥

उभाभ्यामेवोभावभिपीडयत उपसंग्राह्यावित्येके ॥२२॥

## टिप्पनी⑥

उभाभ्यां पाणिभ्यां उभावेवाऽऽचार्यस्य पादौ अभिपीडयतो माणवकस्य उपसंग्राह्यावित्येके मन्यन्ते । अभिपीडयत इति 28कृत्यानां कतरि"इति कर्तरि षष्ठी । अत्र मनुः— 29 व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥ इति ॥ २२ ॥

#### 23 सर्वाह्णं सुयुक्तोऽध्ययनादनन्तरोऽध्याये

सर्वाह्णं सुयुक्तो ऽध्ययनाद् अनन्तरोऽध्याये २३

▼

## ⑤

>

▼ Bühler

23. He shall be very attentive the whole day 30 long, never allowing his mind to wander from the lesson during the (time devoted to) studying.

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वाह्णं सुयुक्तोऽध्ययनादनन्तरोऽध्याये ॥ २३ ॥

## टिप्पनी⑥

सर्वं च तदहश्च सर्वाह्णम् । 31 राजाहस्सखिभ्यष्टच् ।' 32 'अह्नोऽह्न एतेभ्य' इत्यहादेशः । 33 'अह्नोदन्ता'दिति णत्वम् । अत्यन्तसंयोगे द्वितीया।' सर्वाह्ण सदा सुयुक्तः सुसमाहितः अनन्यचित्तः । अध्ययनादनन्तरः नान्तरयतीत्यनन्तरः । अध्ययनाद्यथा आत्मानं नान्तरयति यथा अध्ययनान्न विच्छिद्येत तथा स्यात् । अध्याये स्वाध्यायकाले। अध्याय इत्यनुवादः । 34 'मनसा चानध्याय' इति विशेषविधानात् । 'अध्याये'दिति प्रायेण पठन्ति । तत्र तकारोऽपपाठश्छान्दसो वा ॥ २३ ॥

#### 24 तथा गुरुकर्मसु

तथा गुरु-कर्मसु २४

▼

⑤

>
▼ Bühler

24. And (at other times he shall be attentive) to the business of his teacher.

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा गुरुकर्मसु ॥ २४ ॥

## टिप्पनी⑥

गुरुकर्मसु च तथा स्यात् सुयुक्तोऽनन्तरश्च स्यात् ॥ २४॥

#### 25 मनसा चानध्याये

मनसा चानध्याये २५

▼

⑤

>
▼ Bühler

25. And during the time for rest (he shall give) his mind (to doubtful passages of the lesson learnt).

▼ हरदत्त-टीका

## सूत्रम्⑥

मनसा चाऽनध्याये ॥ २५ ॥

## टिप्पनी⑥

अनध्यायकाले मनसा च अध्यायादनन्तरः स्यात् । सन्देहस्थानानि मनसा निरूपयेत् । अध्ययनविषयामेव चिन्तां कुर्यात् ॥ २५ ॥

#### 26 आहूताध्यायी च स्यात्

आहूताध्यायी च स्यात् २६

▼

⑤

>

▼ Bühler

26. And he shall study after having been called by the teacher (and not request the teacher to begin the lesson). 35

▼ हरदत्त-टीका

## सूत्रम्⑥

आहूताध्यायी च स्यात् ॥ २६ ॥

## टिप्पनी⑥

आचार्येणाहूतस्सन्नधीयीत, नाध्यापने स्वयं प्रवर्तयेत् ॥ २६ ॥

॥ इत्यापस्तम्बीये धर्मसूत्रे पञ्चमी कण्डिका ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. Manu II, 35.↩
6. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
7. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
11. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he

(the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

12. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

13. Manu II, 69; Yājñ. I, 15.↩

14. Manu II, 144.↩

15. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

16. आप० ध० १.३०.८.↩

17. Manu II, 146-148.↩

18. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

19. Manu II, 147.↩

20. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

21. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

24. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

25. आप० ध० १.३०.८.↩

26. Manu II, 37.↩

27. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

28. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

29. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

30. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

31. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

32. आप० ध० १.३०.८.↩

33. मनु० रमृ० २.६↩

34. गौ० ध० १. १, २↩

35. The meaning is, he shall keep all the restrictions imposed upon a student, as chastity, &c, but that he shall not perform the fire-worship or service to a teacher, nor study. Manu II, 39; XI. 192, Yājñ. I, 38; Weber, Ind. Stud. X, 101.↩

# ०६①

## 01 सदा निशायाङ् गुरुं④

सदा निशायां गुरुं संवेशयेत्तस्य पादौ प्रक्षाल्य संवाह्य १

▼

## ⑤

>
▼ Bühler

1. Every day he shall put his teacher to bed after having washed his (teacher's) feet and after having rubbed him. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

सदा निशायां गुरुं संवेशपेत्तस्य पादौ प्रक्षाल्य संवाह्य ॥ १ ॥

## टिप्पनी⑥

सदा प्रत्यहं निशायां अतिक्रान्ते प्रदोषे गुरु संवेशयेत् । कथम् ? तस्य गुरोः पादौ प्रक्षाल्य संवाह्य च । संवाहनं मर्दनम् ॥ १॥

#### 02 अनुज्ञातः संविशेत्

अनुज्ञातः संविशेत् २

▼

## ⑤

>
▼ Bühler

2. He shall retire to rest after having received (the teacher's permission). 2

▼ हरदत्त-टीका

## सूत्रम्⑥

अनुज्ञातः संविशेत् ॥ २ ॥

## टिप्पनी⑥

3गुरुणाऽनुज्ञातस्तु स्वयं संविशेत् शयीत ॥२॥

#### 03 न चैनमभिप्रसारयीत

न चैनमभिप्रसारयीत ३

▼

## ⑤

>
▼ Bühler

3. And he shall not stretch out his feet towards him.

▼ हरदत्त-टीका

## सूत्रम्⑥

न चैनमभिप्रसारयीत ॥ ३ ॥

## टिप्पनी⑥

एनमाचार्यं प्रति पादौ न प्रसारयेत् ॥ ३ ॥

#### 04 न खट्वायां सतोऽभिप्रसारणमस्तीत्येके

न खट्वायां सतोऽभिप्रसारणमस्तीत्येके ४

▼

## ⑤

>
▼ Bühler

4. Some say, that it is not (sinful) to stretch out the feet (towards the teacher), if he be lying on a bed. 4

▼ हरदत्त-टीका

## सूत्रम्⑥

न खट्वायां सतोऽभिप्रसारणमस्तीत्येके ॥ ४ ॥

## टिप्पनी⑥

यदा तु गुरुः खटवाया शेते तदा तं प्रति पादयोः प्रसारणं न दोषायेत्येके मन्यन्ते, स्वपक्षस्तु तत्रापि दोष इति ॥ ४ ॥

#### 05 न चास्य सकाशे

न चास्य सकाशे संविष्टो भाषेत् ५

▼

## ⑤

>
▼ Bühler

5. And he shall not address (the teacher), whilst he himself is in a reclining position. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

न चाऽस्य सकाशे संविष्टो भाषेत ॥ ५ ॥

## टिप्पनी⑥

अस्याऽऽचार्यस्य सकाशे स्वयं संविष्ट. शयानो न भाषेत ! कार्यावेदनादावुत्थायैव भाषेत ॥५॥

#### 06 अभिभाषितस्त्वासीनः प्रतिब्रूयात्

अभिभाषितस्त्वासीनः प्रतिब्रूयात् ६

▼

## ⑤

>
▼ Bühler

6. But he may answer (the teacher) sitting (if the teacher himself is sitting or lying down). 6

▼ हरदत्त-टीका

## सूत्रम्⑥

अभिभाषितस्त्वासीनः प्रतियात् ॥ ६॥ .

## टिप्पनी⑥

आचार्येणा7भिभाषितस्त्वासीनः प्रतिब्रूयात् । एतदाचार्य आसीने शयाने वा ॥६॥

#### 07 अनूत्थाय तिष्ठन्तम्

अनूत्थाय तिष्ठन्तम् ७

▼

## ⑤

>
▼ Bühler

7. And if (the teacher) stands, (he shall answer him,) after having risen also.

▼ हरदत्त-टीका

## सूत्रम्⑥

अनुत्थाय तिष्ठन्तम् ॥ ७॥

## टिप्पनी⑥

यदा त्वाचार्यस्तिष्ठन् ब्रूते तदा तमनूत्थाय प्रतिब्रूयात् । उत्तरे द्वे सूत्रे स्पष्टार्थे ॥७॥

#### 08 गच्छन्तमनुगच्छेत्

गच्छन्तमनुगच्छेत् ८

▼

## ⑤

>
▼ Bühler

8. He shall walk after him, if he walks.

▼ हरदत्त-टीका

## सूत्रम्⑥

गच्छन्तमनुगच्छेत् ॥ ८ ॥

## टिप्पनी⑥

*(अग्रे १० सूत्रे व्याख्यातम्।)*

#### 09 धावन्तमनुधावेत्

धावन्तमनुधावेत् ९

▼

## ⑤

>
▼ Bühler

9. He shall run after him, if he runs.

▼ हरदत्त-टीका

## सूत्रम्⑥

धावन्तमनुधावेत् ॥ ९॥

## टिप्पनी⑥

*(अग्रे १० सूत्रे व्याख्यातम्।)*

#### 10 न सोपानःवेष्टितशिरा अवहितपाणिर्वासीदेत्

न सोपानःवेष्टितशिरा अवहितपाणिर्वासीदेत् १०

▼

## ⑤

>
▼ Bühler

10. He shall not approach (his teacher) with shoes on his feet, or his head covered, or holding (implements) in his hand.

▼ हरदत्त-टीका

## सूत्रम्⑥

न सोपानद्वेष्टितशिरा अवहितपाणिर्वासीदेत् ॥ १० ॥

## टिप्पनी⑥

उत्तरत्रोपानत्-प्रतिषेधान् 'न सोपान'द् इत्य् अनुवादः 'अध्वापन्नस् त्व् इति प्रतिप्रसोतुम् ।

आचार्यं न सोपानत्क आसीदेत् । नापि वेष्टितशिराः । अवहितपाणि - दात्रादिहस्तः

एवंभूतोऽपि नासीदेत् ॥ ८-१० ॥

#### 11 अध्वापन्नस्तु कर्मयुक्तोवासीदेत्

अध्वापन्नस् तु कर्म-युक्तो ऽवासीदेत् ११

▼

## ⑤

>
▼ Bühler

11. But on a journey or occupied in work, he may approach him (with shoes on, with his head covered, or with implements in his hand),

▼ हरदत्त-टीका

## सूत्रम्⑥

अध्वापन्नस्तु कर्मयुक्तो वाऽऽसीदेत् ॥ ११ ॥

## टिप्पनी⑥

अध्वानं प्राप्तोऽध्वापन्नः कर्मणि दात्रादिसाध्ये प्रवृत्तः कर्मयुक्तः एवंभूतस्तु सोपानत्कोऽप्यासीदेत् ॥ ११ ॥

#### 12 न चेदुपसीदेत्

न चेद् उपसीदेत् १२

▼

## ⑤

>
▼ Bühler

12. Provided he does not sit down quite near (to his teacher).

▼ हरदत्त-टीका

## सूत्रम्⑥

न चेदुपसीदेत् ॥ १२॥

## टिप्पनी⑥

8 न चेदाचार्यस्समीपे, उपसीदेत् उपविशेत् । यदि तूपविशेदध्वापन्नः कर्मयुक्तो वा तदोपानत्प्रभृतीनि विहायोपविशेत् ॥ १२ ॥

#### 13 देवमिवाचार्यमुपासीताविकथयन्न् अविमना वाचं

देवम् इवाचार्यम् उपासीताविकथयन्न् अविमना वाचं शुश्रूषमाणोऽस्य १३

▼

## ⑤

>

▼ Bühler

13. He shall approach his teacher with the same reverence as a deity, without telling idle stories, attentive and listening eagerly to his words.

▼ हरदत्त-टीका

## सूत्रम्⑥

देवमिवाचार्यमुपासीताऽविकथयन्नविमना वाचं शुश्रूषमाणोऽस्य ॥ १३ ॥

## टिप्पनी⑥

यो यं देवं भजते स तद्भावनया तमिवाऽऽचार्यमुपासीत । अविकथयन् 9व्यर्थां कथामकुर्वन् । अविमनाः अविक्षिप्तमनाः । अस्याऽऽचार्यस्य वाचं शुश्रूषमाणः ॥ १३ ॥

#### 14 अनुपस्थकृतः

अनुपस्थकृतः १४

▼

## ⑤

>

▼ Bühler

14. (He shall not sit near him). with his legs crossed.

▼ हरदत्त-टीका

## सूत्रम्⑥

अनुपस्थकृतः ॥१४॥

## टिप्पनी⑥

10उपस्थकरणं प्रसिद्धम् । तत्कृत्वा नोपासीत ॥ १४॥

#### 15 अनुवाति वीतः

अनुवाति वीतः १५

▼

## ⑤

>
▼ Bühler

15. If (on sitting down) the wind blows from the pupil towards the master, he shall change his place. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

अनुवाति12 वाते वीतः ॥१५॥

## टिप्पनी⑥

वाते अनुवाति सति वीतः विपर्ययेणेतः उपासीत । प्रतिवातं तु वक्ष्यमाणेन प्रतिषिध्यते । मनुरप्याह— 13 प्रतिवातेऽनुवाते च नासीत गुरुणा सहेति ॥ १५ ॥

#### 16 अप्रतिष्टब्धः पाणिना

अप्रतिष्टब्धः पाणिना १६

▼

⑤

>
▼ Bühler

16. (He shall sit) without supporting himself with his hands (on the ground),

▼ हरदत्त-टीका

## सूत्रम्⑥

अप्रतिष्टब्धः पाणिना ॥ १६ ॥

## टिप्पनी⑥

पाणिना प्रतिष्टब्धो न स्यात् पाणितलं भूमौ कृत्वा पाण्यवलम्बनो नाऽऽसीत ॥१६॥

#### 17 अनपश्रितोऽन्यत्र

अनपश्रितोऽन्यत्र १७

▼

⑤

>
▼ Bühler

17. Without leaning against something (as a wall or the like).

▼ हरदत्त-टीका

## सूत्रम्⑥

अनपाश्रितोऽन्यत्र ॥१७॥

## टिप्पनी⑥

अन्यत्र कुड्याद्यपाश्रितो न स्यात् । कुड्याद्यपाश्रितो नासीत ॥१७॥

#### 18 यज्ञोपवीती द्विवस्त्रः

यज्ञोपवीती द्विवस्त्रः १८

▼

### ⑤

>
▼ Bühler

18. If the pupil wears two garments, he shall wear the upper one after the fashion of the sacred thread at the sacrifices. 14

▼ हरदत्त-टीका

## सूत्रम्⑥

यज्ञोपवीती द्विवस्त्रः॥ १८ ॥

## टिप्पनी⑥

यदा द्विवस्त्रस्तदा वाससाऽन्यतरेण यज्ञोपवीती स्यात् । 15 "अपि वा सूत्रमेवोपवीतार्थ" इत्येष कल्पस्तदा न भवति ॥१८॥

#### 19 अधोनिवीतस्त्वेकवस्त्रः

अधोनिवीतस्त्वेकवस्त्रः १९

▼

### ⑤

>
▼ Bühler

19. But, if he wears a (lower) garment only, he shall wrap it around the lower part of his body.

▼ हरदत्त-टीका

## सूत्रम्⑥

अधोनिवीतस्त्वेकवस्त्रः ॥ १९ ॥

## टिप्पनी⑥

यदा त्वेकवस्त्रो भवति तदा अधोनिवीतः स्यात् । न तस्य दीर्घस्याप्येकदेशेनोत्तरीयं कुर्यात् ॥ १९ ॥

#### 20 अभिमुखोऽनभिमुखम्

अभिमुखोऽनभिमुखम् २०

▼

⑤

>
▼ Bühler

20. He shall turn his face towards his teacher though the latter does not turn his towards him. 16

▼ हरदत्त-टीका

## सूत्रम्⑥

अभिमुखोऽनभिमुखम् ॥ २० ॥

## टिप्पनी⑥

स्वयमाचार्याभिमुखः आत्मानं प्रत्यनभिमुखमाचार्यमुपासीत । 17स्वयमाचार्यमपश्यन् आचार्यस्य पुरत आर्जवे नाऽऽसीत ॥ २० ॥

#### 21 अनासन्नोऽनतिदूरे

अनासन्नोऽनतिदूरे २१

▼

⑤

>
▼ Bühler

21. He shall sit neither too near to, nor too far (from the teacher),

▼ हरदत्त-टीका

## सूत्रम्⑥

अनासन्नोऽनतिदूरे18 च ॥ २१ ॥

## टिप्पनी⑥

अत्यासन्नो न स्यादतिदूरे च न स्यात् ॥ २१ ॥

#### 22 यावदासीनो बाहुभ्याम्प्राप्नुयात्

यावदासीनो बाहुभ्याम्प्राप्नुयात् २२

▼

⑤

>
▼ Bühler

22. (But) at such a distance, that (the teacher) may be able to reach him with his arms (without rising).

▼ हरदत्त-टीका

## सूत्रम्⑥

यावदासीनो बाहुभ्यां प्राप्नुयात् ॥ २२ ॥

## टिप्पनी⑥

यावत्यन्तराले आसीन आचार्यं बाहुभ्यां प्राप्तुं शक्नुयात् तावत्यासीत ॥२२॥

#### 23 अप्रतिवातम्

अप्रतिवातम् २३

▼

⑤

>
▼ Bühler

23. (He shall not sit in such a position) that the wind blows from the teacher, towards himself. 19

▼ हरदत्त-टीका

## सूत्रम्⑥

अप्रतिवातम् ॥ २३ ॥

## टिप्पनी⑥

आचार्यस्य 20प्रतिवाते नाऽऽसीत् ॥ २३ ॥

#### 24 एकाध्यायी दक्षिणम् बाहुम्

एकाध्यायी दक्षिणं बाहुं प्रत्युपसीदेत् २४

▼

⑤

>
▼ Bühler

24. (If there is) only one pupil, he shall sit at the right hand (of the teacher).

▼ हरदत्त-टीका

## सूत्रम्⑥

एकाध्यायी दक्षिणं बाहुं प्रत्युपसीदेत् ॥ २४ ॥

## टिप्पनी⑥

यदा एक एवाऽधीते तदा आचार्यस्य दक्षिणं बाहुं प्रति दक्षिणे पार्श्व उपसीदेत् उपविशेत् ॥ २४ ॥

#### 25 यथावकाशम् बहवः

यथावकाशं बहवः २५

▼

⑤

>
▼ Bühler

25. (If there are) many, (they may sit) as it may be convenient.

▼ हरदत्त-टीका

## सूत्रम्⑥

यथावकाशं बहवः ॥ २५ ॥

## टिप्पनी⑥

बहवस्तु शिष्या यथावकाशमुपसीदेयुः ॥ २५ ॥

#### 26 तिष्ठति च नासीतानासनयोगविहिते

तिष्ठति च नासीतानासनयोगविहिते २६

▼

## ⑤

>
▼ Bühler

26. If the master (is not honoured with a seat and) stands, the (pupil) shall not sit down.

▼ हरदत्त-टीका

## सूत्रम्⑥

तिष्ठति च नाऽऽसीताऽनासनयोगविहिते ॥ २६ ॥

## टिप्पनी⑥

आसनयोग आसनकल्पना। आसनयोगेन विहितस्सम्भावित आसनयोगविहितः । आसनयोगेनाऽसम्भाविते आचार्ये तिष्ठति सति स्वयं नाऽऽसीत् ॥ २६ ॥

#### 27 आसीने च न

आसीने च न संविशेत् २७

▼

## ⑤

>
▼ Bühler

27. (If the master is not honoured with a couch) and sits, the (pupil) shall not lie down on a couch.

▼ हरदत्त-टीका

## सूत्रम्⑥

आसीने च न संविशेत् ॥ २७ ॥

## टिप्पनी⑥

21 'अशयनयोगविहिते' इति पूर्वानुसारेण गम्यते । शयनयोगेनासम्भावित आचार्ये आसीने स्वयं न संविशेत् न शयीत ॥ २७ ॥

#### 28 चेष्टति च चिकीर्षन्तच्छक्तिविषये

चेष्टति च चिकीर्षन्तच्छक्तिविषये २८

▼

⑤

>
▼ Bühler

28. And if the teacher tries (to do something), then (the pupil) shall offer to do it for him, if it is in his power.

▼ हरदत्त-टीका

## सूत्रम्⑥

चेष्टति च चिकीर्षंस्तच्छक्तिविषये ॥ २८ ॥

## टिप्पनी⑥

व्यत्ययेन परस्मैपदम् । आचार्ये चेष्टति सति स्वयमपि तच्चिकीर्षन् स्यात् । किमविशेषेण, ? शक्तिविषये । यद्याचार्येण क्रियमाणमात्मनश्शक्तेर्विषयो भवति । 'चिकीर्ष'न्निति सन्प्रयोगादिच्छामेव प्रदर्शयेत् नाच्छिद्य कुर्यात् । प्रदर्शितायां त्विच्छायामाचार्यश्चेदनुजानीयात्, कुर्यात् । अशक्तिविषये तु नेच्छापि प्रदर्शयितव्या । चिकीर्षेदिति युक्तः पाठः ॥२८॥

#### 29 न चास्य सकाशेऽन्वक्स्थानिनमुपसङ्गृह्णीयात्

न चास्य सकाशेऽन्वक्स्थानिनमुपसंगृह्णीयात् २९

▼

⑤

>
▼ Bühler

29. And, if his teacher is near, he shall not embrace (the feet of) another Guru who is inferior (in dignity), 22

▼ हरदत्त-टीका

## सूत्रम्⑥

न चास्य सकाशेऽन्वक्स्थानिन उपसङ्ग्रह्णीयात् ॥ २९ ॥

## टिप्पनी⑥

आचार्यव्यतिरिक्ता गुरवोऽन्वक्स्थानिन इति स्मार्तो व्यवहारः । आचार्यः श्रेष्ठो गुरूणाम् । तमपेक्ष्यान्वक्यानं पदमेषामिति कृत्वा । आचार्यस्य सन्निधौ अन्वक्स्थानिनं नोपसंगृह्णीयात् ॥ १९ ॥

#### 30 गोत्रेण वा कीर्तयेत्

गोत्रेण वा कीर्तयेत् ३०

▼

## ⑤

>
▼ Bühler

30. Nor shall he praise (such a person in the teacher's presence) by (pronouncing the name of) his family.

▼ हरदत्त-टीका

## सूत्रम्⑥

गोत्रेण वा कीर्तयेत् ॥ ३० ॥

## टिप्पनी⑥

न चैनमन्वक्स्थानिनं गोत्रेण अभिजनकुलादिना वा कीर्तयेत् न स्तुवीत भार्गवोऽयं महाकुलप्रसूत इति ॥ ३० ॥

#### 31 न चैनम् प्रत्युत्तिष्ठेदनूत्तिष्ठेद्वा

न चैनं प्रत्युत्तिष्ठेदनूत्तिष्ठेद्वा ३१

▼

## ⑤

>
▼ Bühler

31. Nor, shall he rise to meet such an (inferior Guru) or rise after him, 23

▼ हरदत्त-टीका

## सूत्रम्⑥

न चैनं प्रत्युत्तिष्ठेदनुत्तिष्ठेवा24पि चेत्तस्य - गुरुः स्यात् ॥ ३१ ॥

## टिप्पनी⑥

प्रत्युत्थानमप्यस्य न कर्तव्यमाचार्यस्य सकाशे । यदा पुनरसावाचार्यसकाशे त्वासित्वा गमनायोत्तिष्ठति तदाऽनूत्थानमपि न कर्तव्यम् । यद्यप्यसौ तस्य25आचार्यस्य मातुलादिः गुरुः स्यात् । 26 आचार्य-प्राचार्यसन्निपात' इति वक्ष्यति। तेनैव ग्यायेन27मातुलादिष्वपि प्रसङ्गे इदमुक्तम् ॥ ३१ ॥

#### 32 अपि चेत्तस्य गुरुः

अपि चेत्तस्य गुरुः स्यात् ३२

▼

## ⑤

>
▼ Bühler

32. Even if he be a Guru of his teacher.

▼ हरदत्त-टीका

## सूत्रम्⑥

अपि चेत्तस्य गुरुः स्यात् ॥ ३२ ॥

## टिप्पनी⑥

यद्यप्यसौ तस्य28आचार्यस्य मातुलादिः गुरुः स्यात् । 29 आचार्य-प्राचार्यसन्निपात' इति वक्ष्यति। तेनैव ग्यायेन30मातुलादिष्वपि प्रसङ्गे इदमुक्तम् ॥ ३१ ॥

#### 33 देशात्त्वासनाच्च संसर्पेत्

देशात्त्वासनाच्च संसर्पेत् ३३

▼

## ⑤

>
▼ Bühler

33. But he shall leave his place and his seat, (in order to show him honour.)

▼ हरदत्त-टीका

## सूत्रम्⑥

देशात्वासनाच संसर्पेत् ॥ ३३॥

## टिप्पनी⑥

किं तु देशादासनाच्च संसर्पेत्तस्य सम्मानार्थम् ॥ ३३ ॥

#### 34 नाम्ना तदन्तेवासिनङ् गुरुमप्यात्मन

नाम्ना तदन्तेवासिनं गुरुमप्यात्मन इत्येके ३४

▼

## ⑤

>
▼ Bühler

34. Some say, that (he may address) a pupil of his teacher by (pronouncing) his name, if he is also one of his (the pupil's) own Gurus. 31

▼ हरदत्त-टीका

## सूत्रम्⑥

नाम्ना तदन्तेवासिनं गुरुमप्यात्मन इत्येके ॥ ३४ ॥

## टिप्पनी⑥

तस्याचार्यस्यान्तेवासिनं नाम्नैव कीर्तयेत् 'यज्ञशर्मन्नि'ति । यद्यप्यसा. वात्मनो गुरुभवति इत्येवमेके मन्यन्ते । स्वपक्षस्तु गुरोर्नामग्रहणं न कर्तव्यमिति ॥ ३४ ॥

#### 35 यस्मिंस्त्वनाचार्यसम्बन्धाद्गौरवं वृत्तिस्तस्मिन्न् अन्वक्स्थानीये

यस्मिंस्त्वनाचार्यसंबन्धाद्गौरवं वृत्तिस्तस्मिन्न् अन्वक्स्थानीये ऽप्याचार्यस्य ३५

▼

## ⑤

>
▼ Bühler

35. But towards such a person who is generally revered for some other reason than being the teacher (e.g. for his learning), the (student) should behave as towards his teacher, though he be inferior in dignity to the latter.

▼ हरदत्त-टीका

## सूत्रम्⑥

यस्मिंस्त्वनाचार्यसम्बन्धाद्गौरवं वृत्तिस्तस्मिन्नन्वक्स्थानीये ऽप्याचार्यस्य ॥ ३४ ॥

## टिप्पनी⑥

यस्मिंस्तु पुरुषे शिष्याचार्यभावमन्तरेणापि विद्याचारित्र्यादिना लौकिकानां गौरवं तस्मिन्नन्वक्स्थानीये ऽप्याचार्ये या वृत्तिस्सा कर्तव्या। अन्वक्स्थानीयोऽप्यनन्वक्स्थान्येव ॥ ३४ ॥

#### 36 भुक्त्वाचार्यस्य सकाशे नानूत्थायोच्छिष्टम्

भुक्त्वाचार्यस्य सकाशे नानूत्थायोच्छिष्टं प्रयच्छेत् ३६

▼

## ⑤

>

▼ Bühler

36. After having eaten in his (teacher's) presence, he shall not give away the remainder of the food without rising. 32

▼ हरदत्त-टीका

## सूत्रम्⑥

भुक्त्वा चास्य सकाशे नानूत्थायोच्छिष्टं प्रयच्छेत् ॥ ३५ ॥

## टिप्पनी⑥

आचार्यस्य भुञानस्याऽभुञ्जानस्य वा सकाशे भुक्त्वा अनूत्थाय छान्दसो दीर्घः। उत्थानमकृत्वा उच्छिष्टं न प्रयच्छेत् 33 आर्याय वा पर्यवदध्यादिति यद्विहितम् ॥ ३५ ॥

#### 37 आचामेद्वा

आचामेद्वा ३७

▼

### ⑤

>
▼ Bühler

37. Nor shall he sip water (after having eaten in the presence of his teacher without rising).

▼ हरदत्त-टीका

## सूत्रम्⑥

आचामेद्वा ।। ३६ ॥

## टिप्पनी⑥

आचमनमप्यनुत्थाय न कुर्यात् ।। ३६ ।।

#### 38 किङ् करवाणीत्य् आमन्त्र्य

किं करवाणीत्य् आमन्त्र्य ३८

▼

### ⑤

>
▼ Bühler

38. (He shall rise) addressing him (with these words), 'What shall I do?'

▼ हरदत्त-टीका

## सूत्रम्⑥

किं करवाणीत्यामन्त्र्य ॥ ३७॥

## टिप्पनी⑥

आचम्य किं करवाणीति गुरुमामन्त्र्य ॥ ३७॥

इस्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने षष्ठी कण्डिका ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. Manu II, 35.↩
5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
6. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
7. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
10. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
11. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
12. आप० ध० १.३०.८.↩
13. मनु० रमृ० २.६↩
14. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
16. Manu II, 69; Yājñ. I, 15.↩
17. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
18. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
19. Manu II, 144.↩
20. आप० ध० १.३०.८.↩
21. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
22. Manu II, 146-148.↩

23. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

24. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

25. आप० ध० १. ३१. १.↩

26. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

27. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

> विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
> तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

28. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

29. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

30. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

31. Manu II, 147.↩

32. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

33. आप० ध० १.३०.८.↩

## ०७①

## 01 उत्तिष्ठेत् तूष्णीं वा④

उत्तिष्ठेत् तूष्णीं वा १

▼

## ⑤

>
▼ Bühler

1. Or he may rise silently.

▼ हरदत्त-टीका

## सूत्रम्⑥

उत्तिष्ठेतूष्णीं वा ॥१॥

## टिप्पनी⑥

उत्तिष्ठेत् तूष्णीं वा। विकल्पः । आमन्त्र्येति लिङ्गात् 1 उत्थायाप्याचामन्नाचार्यसकाश एवाऽऽचामेत् ॥ १॥

#### 02 नापपर्यावर्तेत गुरोः प्रदक्षिणीकृत्यापेयात्

नापपर्यावर्तेत गुरोः प्रदक्षिणीकृत्यापेयात् २

▼

## ⑤

>
▼ Bühler

2. Nor shall he (in going away) move around his teacher with his left hand turned towards him; he shall go away after having walked around him with his right side turned towards him.

▼ हरदत्त-टीका

## सूत्रम्⑥

नापपर्यावर्तेत गुरोः प्रदक्षिणीकृत्याऽपेयात् ॥ २॥

## टिप्पनी⑥

उत्थाय कार्यवत्तया गन्तुमिच्छन् गुरोरप अपसव्यं न पर्यावर्तेत । किं तु प्रदक्षिणीकृत्याऽपेयात् ॥ २॥

#### 03 न प्रेक्षेत नग्नां

न प्रेक्षेत नग्नां स्त्रियम् ३

▼

## ⑤

>
▼ Bühler

3. He shall not look at a naked woman. 2

▼ हरदत्त-टीका

## सूत्रम्⑥

न प्रेक्षेत नग्नां स्त्रियम् ॥ ३॥

## टिप्पनी⑥

यां प्रेक्षमाणस्य मनसो विकारो भवति तां नग्नां स्त्रियं नेक्षेत ॥३॥

#### 04 ओषधिवनस्पतीनाम् आच्छिद्य नोपजिघ्रेत्

ओषधि-वनस्पतीनाम् आच्छिद्य नोपजिघ्रेत् ४

▼

## ⑤

>
▼ Bühler

4. He shall not cut the (leaves or flowers) of herbs or trees, in order to smell at them. 3

▼ हरदत्त-टीका

## सूत्रम्⑥

4ओषधिवनस्पतीनामाच्छिद्य नोपजिघ्रेत् ॥ ४ ॥

## टिप्पनी⑥

ओषधयः फलपाकान्ताः । वनस्पतयो ये पुष्पैर्विना फलन्ति । वीरुद्वृक्षाणामप्युपलक्षणम् । तेषां पत्रपुष्पाण्याच्छिद्य नोपजिघ्रेत् । 'आच्छिद्ये'तिवचना5द्यादृच्छिकाघ्राणे न दोषः ॥ ४ ॥

#### 05 उपानहौ छत्रं यानम्

उपानहौ छत्रं यानम् इति च वर्जयेत् ५

▼

## ⑤

>
▼ Bühler

> 5. He shall avoid (the use of) shoes, of an umbrella a chariot, and the like (luxuries). 6

▼ हरदत्त-टीका

## सूत्रम्⑥

उपानहौ छत्रं यानमिति वर्जयेत् ॥ ५ ॥

## टिप्पनी⑥

यानं शकटादि । इतिशब्द एवंप्रकाराणामुपलक्षणार्थः । तत्र गौतमः— 7वर्जयेन्मधुमांसगन्धमाल्यदिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकाम-क्रोधलोभमोहवादवादनस्नानदन्तधावनहर्षनृत्तगीतपरिवादभयानीति ॥ ५ ॥

#### 06 न स्मयेत

न स्मयेत ६

▼

## ⑤

>
▼ Bühler

> 6. He shall not smile.

▼ हरदत्त-टीका

## सूत्रम्⑥

न स्मयेत ॥६॥

## टिप्पनी⑥

स्मितं न कुर्यात् ॥ ६॥

#### 07 यदि स्मयेतापिगृह्य स्मयेतेति

यदि स्मयेतापिगृह्य स्मयेतेति हि ब्राह्मणम् ७

▼

## ⑤

>
▼ Bühler

7. If he smiles, he shall smile covering (the mouth with his hand); thus says a Brāhmaṇa.

▼ हरदत्त-टीका

## सूत्रम्⑥

यदि स्मयेताऽपिगृह्य स्मयेतेति हि ब्राह्मणम् ॥७॥

## टिप्पनी⑥

यदि हर्षातिरेकं धारयितुं न शक्यते अपिगृह्य हस्तेन मुखं पिधाय स्मयेत इति ब्राह्मणं 'न स्मयेते'त्यारभ्य ॥ ७ ॥

#### 08 नोपजिघ्रेत् स्त्रियम् मुखेन

नोपजिघ्रेत् स्त्रियं मुखेन ८

▼

## ⑤

>
▼ Bühler

8. He shall not touch a woman with his face, in order to inhale the fragrance of her body.

▼ हरदत्त-टीका

## सूत्रम्⑥

8नोपजितघ्रेत् स्त्रियं मुखेन ॥ ८॥

## टिप्पनी⑥

स्नाता9मनुलिप्तां वा स्त्रियं बालामपि मुखेन नोपजिघ्रेत् । 'मुखेने'ति वचनाद्यादृच्छिके गन्धाघ्राणे न दोषः ॥ ८॥

- १. पञ्च ह वा एते ब्रह्मचारिण्यग्नयो धीयन्ते द्वौ पृथग्घस्तयोर्मुखे हृदये उपस्थ एव पञ्चमः । स यद्दक्षिणेन पाणिना स्त्रियं न स्पृशति तेनाहरहर्याजिनां लोकमवरुन्धे, यत्सव्येन तेन प्रव्राजिनाम् , यन्मुखेन, तेनाग्निप्रस्कन्दिनां, यद्धृदयेन तेन शूराणां, यदुपस्थेन तेन गृहमेधिनां, तैश्चेत् स्त्रियं पराहरत्यनग्निरिव शिष्यते ॥ इति गो० ब्रा० १.२. ४.

#### 09 न हृदयेन प्रार्थयेत्

न हृदयेन प्रार्थयेत् ९

▼

## ⑤

>
▼ Bühler

9. Nor shall he desire her in his heart.

▼ हरदत्त-टीका

## सूत्रम्⑥

न हृदयेन प्रार्थयेत् ॥ ९ ॥

## टिप्पनी⑥

हृदयेन मनसा स्त्रियं न प्रार्थयेत्—अपीयं मम स्यादिति ॥ ९ ॥

#### 10 नाकारणाद् उपस्पृशेत्

नाकारणाद् उपस्पृशेत् १०

▼

## ⑤

>
▼ Bühler

10. Nor shall he touch (a woman at all) without a particular reason. 10

▼ हरदत्त-टीका

## सूत्रम्⑥

नाकारणादुपस्पृशेत् ॥ १० ॥

## टिप्पनी⑥

कारणेन विना स्त्रियं नोपस्पृशेत् । कारणं योक्त्रसन्नहनविमोचनविषम-पतनधारणादि ॥१०॥

#### 11 रजस्वलो रक्तदन् सत्यवादी

रजस्वलो रक्तदन् सत्यवादी स्याद् इति हि ब्राह्मणम् ११

▼

## ⑤

>
▼ Bühler

11. A Brāhmaṇa declares, 'He shall be dusty, be shall have dirty teeth, and speak the truth.' 11

▼ हरदत्त-टीका

## सूत्रम्⑥

रजस्वलो रक्तदन्सत्यवादी स्यादिति हि ब्राह्मणम् ॥११॥

## टिप्पनी⑥

रजस्वलो मलिनगात्रः । रक्ता दन्ता यस्य स रकदन् । छान्दसो दन्नादेशः । पङ्किलदन्त इत्यर्थः । एतदुभय'मुत्सन्नश्लाघ'(१-१-२७) इत्यनेन गतमपि पुनरुच्यते12श्रौतप्रायश्चित्तप्राप्त्यर्थम् । अनृतं वोक्त्वे(२-१-२७)ति प्रायश्चित्तं वक्ष्यति । सत्यवादी स्यादिति ब्राह्मणम् ॥ ११ ॥

#### 12 यां विद्याङ् कुरुते

यां विद्यां कुरुते गुरौ तेऽप्यस्याचार्या ये तस्यां गुरोर्वंश्याः १२

▼

## ⑤

>
▼ Bühler

12. Those teachers, who instructed his teacher in that science which he (the pupil) studies with him, (are to be considered as) spiritual teachers (by the pupil). 13

▼ हरदत्त-टीका

## सूत्रम्⑥

यां विद्यां कुरुते गुरौ तेऽप्यस्याऽऽचार्या ये तस्यां गुरोर्वंश्याः ॥ १२ ॥

## टिप्पनी⑥

आत्मीये गुरौ यां विद्यां कुरुते अधीते तस्यां विद्यायां गुरोर्वंश्या आचार्यास्तेऽप्यस्य माणवकस्याचार्याः । यद्यपि साक्षात्तेभ्यो न गृह्यते विद्या तथापि आचार्यवदुपचरितव्याः। 'तस्या'मिति वचनाद्विद्यान्तरे ये वंश्यास्तेषु नायं विधिः ॥ १२ ॥

#### 13 यानन्यान्पश्यतोऽस्योपसङ्गृह्णीयात् तदा त्वेत

यानन्यान्पश्यतोऽस्योपसंगृह्णीयात् तदा त्वेत उपसंग्राह्याः १३

▼

## ⑤

>
▼ Bühler

13. But if (a teacher), before the eyes of his (pupil), embraces the feet of any other persons, then he (the pupil also) must embrace their feet, (as long as he remains) in that (state of studentship). 14

▼ हरदत्त-टीका

## सूत्रम्⑥

यानन्यान् पश्यतोऽस्योपसङ्ग्रहीयात्तदात्वे त उपसङ्ग्राह्याः ॥ १३ ॥

## टिप्पनी⑥

अस्य माणवकस्य पश्यत अस्मिन् माणवके पश्यति यानन्यानाचार्य उपसङ्गृहीयात्ते माणवकस्याऽप्युपसङ्ग्राह्याः । किं सदा ? नेत्याह-तदात्वे तस्यां दशायाम् । अपर आह—तदा प्रभृति त उपसङ्ग्राह्याः । तुशब्दात् समावृत्तेनापि ॥ १३ ॥

#### 14 गुरुसमवाये भिक्षयामुत्पन्नायां यमनुबद्धस्तदधीना

गुरुसमवाये भिक्षयामुत्पन्नायां यमनुबद्धस्तदधीना भिक्षा १४

▼

## ⑤

>
▼ Bühler

14. If (a pupil) has more than one teacher, the alms (collected by him) are at the disposal of him to whom he is (just then) bound. 15

▼ हरदत्त-टीका

## सूत्रम्⑥

गुरुसमवाये भिक्षायामुत्पन्नायां यमनुबद्धस्तदधीना भिक्षा ॥ १४ ॥

## टिप्पनी⑥

यदा द्वितीयं तृतीयं वा वेदमधीयानस्य माणवकस्य गुरुसमवायो भवति गुरवः समवेता भवन्ति, तदा भिक्षायामुत्पन्नायां य गुरुमिदानीमनुबद्धो माणवकः यतोऽधीते तदधीना भिक्षा, यच्च यावच्च लब्धं तत्तस्मै निवेदनीयम् । 16तदुक्तश्च विनियोगः ॥ १४ ॥

#### 15 समावृत्तो मात्रे दद्यात्

समावृत्तो मात्रे दद्यात् १५

▼

## ⑤

>
▼ Bühler

15. When (a student) has returned home (from his teacher), he shall give (whatever he may obtain by begging or otherwise) to his mother.

▼ हरदत्त-टीका

## सूत्रम्⑥

समावृत्तो मात्रे दद्यात् ॥ १५ ॥

## टिप्पनी⑥

कृतसमावर्तनो विवाहात्प्रागर्जितं मात्रे दद्यात् ॥ १५ ॥

#### 16 माता भर्तारङ् गमयेत्

माता भर्तारं गमयेत् १६

▼

⑤

>
▼ Bühler

16. The mother shall give it to her husband;

▼ हरदत्त-टीका

## सूत्रम्⑥

माता भर्तारं गमयेत् ॥ १६ ॥

## टिप्पनी⑥

माता पतिं प्रापयेत् ॥ १६ ॥

#### 17 भर्ता गुरुम्

भर्ता गुरुम् १७

▼

⑤

>
▼ Bühler

17. (And) the husband to the (student's) teacher.

▼ हरदत्त-टीका

## सूत्रम्⑥

मतो गुरुम् ॥ १७॥

## टिप्पनी⑥

17 प्रापयेत् । माणवकस्य गुरुम् , माणवकार्जितं द्रव्यं तद्गामि युक्तम् ॥ १७॥

#### 18 धर्मकृत्येषु वोपयोजयेत्

धर्मकृत्येषु वोपयोजयेत् १८

▼

### ⑤

>
▼ Bühler

18. Or he may use it for religious ceremonies. 18

▼ हरदत्त-टीका

## सूत्रम्⑥

धर्मकृत्येषु वोपयोजयेत् ॥ १८ ॥

## टिप्पनी⑥

धर्मकृत्यानि विवाहादीनि । तेषु वोपयोजयेत् । गुरोरभावे भर्ता, तदभावे माता, सर्वेषामभावे समावृत्तस्स्वयमेव वा ॥ १८ ॥

#### 19 कृत्वा विद्यां यावतीं

कृत्वा विद्यां यावतीं शक्नुयाद्वेददक्षिणामाहरेद्धर्मतो यथाशक्ति १९

▼

### ⑤

>
▼ Bühler

19. After having studied as many (branches of) sacred learning as he can, he shall procure in a righteous manner the fee for (the teaching of) the Veda (to be given to his teacher), according to his power. 19

▼ हरदत्त-टीका

## सूत्रम्⑥

कृत्वा विद्यां यावतीं शक्नुयात् वेददक्षिणामाहरेद्धर्मतो यथाशक्ति ॥ १९ ॥

## टिप्पनी⑥

यावतीं विद्यां कर्तुं शक्नुयात् वेदं वेदौ वेदान्वा तावतीं कृत्वा अधीत्य गुरवे दक्षिणामाहरेत् दद्यात् । यथाशक्ति धर्मत उपलब्धां न्यायार्जिताम् ॥१९॥

#### 20 विषमगते त्वाचार्य उग्रतः

विषमगते त्वाचार्य उग्रतः शूद्र तो वाहरेत् २०

▼

#### ⑤

>
▼ Bühler

20. But, if the teacher has fallen into distress, he may take (the fee) from an Ugra or from a Śūdra. 20

▼ हरदत्त-टीका

### सूत्रम्⑥

विषमगते त्वाचार्य उग्रतः शुद्रतो वाऽऽहरेत् ॥२०॥

### प्रस्तावः⑥

धर्मत इत्यस्यापवादः-

### टिप्पनी⑥

यदा त्वाचार्यो विषमगतः आपद्गतः तदा उग्रतः शूद्रतो वाऽपि प्रतिगृह्य दक्षिणामाहरेत् । वैश्याच्छूद्रायां जात उग्रः, उग्रकर्मा वा द्विजातिः ॥२०॥

#### 21 सर्वदा शूद्रत उग्रतो

सर्वदा शूद्रत उग्रतो वाचार्यार्थस्याहरणं धार्म्यमित्येके २१

▼

#### ⑤

>
▼ Bühler

21. But some declare, that it is lawful at any time to take the money for the teacher from an Ugra or from a Śūdra.

▼ हरदत्त-टीका

### सूत्रम्⑥

सर्वदा शूद्रत उग्रतो वाऽऽचार्यार्थस्याहरणं धर्म्यमित्येके ॥२१॥

## टिप्पनी⑥

सर्वदा आपद्यनापदि च, आचार्यार्थस्याचार्याय यो देयोऽर्थः तस्य, उग्रतः शूद्रतो वाऽऽहरणं धर्म्यं धर्मादनपेतमित्येके मन्यन्ते । 'धार्म्य'मिति पाठे स्वार्थे ष्यञ् ॥२१॥

#### 22 दत्वा च नानुकथयेत्

दत्वा च नानुकथयेत् २२

▼

## ⑤

>
▼ Bühler

22. And having paid (the fee), he shall not boast of having done so.

▼ हरदत्त-टीका

## सूत्रम्⑥

दत्वा च नाऽनुकथयेत् ॥ २२ ॥

## टिप्पनी⑥

आचार्याय एवमाहृत्य दत्वा न कीर्तयेत्,-एतन्मया दत्तमिति ॥ २२ ॥

#### 23 कृत्वा च नानुस्मरेत्

कृत्वा च नानुस्मरेत् २३

▼

## ⑤

>
▼ Bühler

23. And he shall not remember what he may have done (for his teacher).

▼ हरदत्त-टीका

## सूत्रम्⑥

कृत्वा च नाऽनुस्मरेत् ॥२३॥

### टिप्पनी⑥

गुरवे प्राणसंशयादौ महान्तमप्युपकारं कृत्वा नानुस्मरेत् नाऽनुचिन्तयेत्- अहो मयैतत्कृतमिति ॥ २३ ॥

#### 24 आत्मप्रशंसाम् परगर्हामिति च

आत्मप्रशंसां परगर्हामिति च वर्जयेत् २४

▼

### ⑤

>
▼ Bühler

24. He shall avoid self-praise, blaming others, and the like. 21

▼ हरदत्त-टीका

### सूत्रम्⑥

आत्मप्रशंसा परगर्हामिति च वर्जयेत् ॥ २४ ॥

### टिप्पनी⑥

इतिकरणादेवंप्रकाराणामात्मनिन्दादीनामपि प्रतिषेधः ॥ २४ ॥

#### 25 प्रेषितस्तदेव प्रतिपद्येत

प्रेषितस्तदेव प्रतिपद्येत २५

▼

### ⑤

>
▼ Bühler

25. If he is ordered (by his teacher to do something), he shall do just that.

▼ हरदत्त-टीका

### सूत्रम्⑥

प्रेषित22स्तदैव प्रतिपद्येत ॥ २५ ॥

## टिप्पनी⑥

इदं कुर्वित्याचार्येण प्रेषितस्तदैव प्रतिपद्येत कुर्यात् क्रियमाणमपि कर्म विहाय, यद्यपि 23तदाचार्यस्य भवति ॥ २५ ॥

#### 26 शास्तुश्चानागमाद्वृत्तिरन्यत्र

शास्तुश्चानागमाद्वृत्तिरन्यत्र २६

▼

## ⑤

>
▼ Bühler

26. On account of the incompetence of his teacher, (he may go) to another (and) study (there). 24

▼ हरदत्त-टीका

## सूत्रम्⑥

शास्तुश्चाऽनागमाद्वृत्तिरन्यत्र ॥ २६ ॥

## टिप्पनी⑥

तस्मिंश्च 'विद्याकर्मान्त'मित्यस्यापवादः । यद्यधिगन्तुमिष्टा विद्या शास्तुः शाशितुराचार्यस्य सम्यङ्नाऽगच्छति तदा तस्यानागमात् अन्यत्र पुरुषान्तरे वृत्तिर्भवत्येव यस्य सम्यगागच्छति । 25येषामाचार्यविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यत' इत्यवोचाम ॥ २६॥

#### 27 अन्यत्रोपसङ्ग्रहणादुच्छिष्टाशनाच्चाचार्यवदाचार्यदारे वृत्तिः

अन्यत्रोपसंग्रहणादुच्छिष्टाशनाच्चाचार्यवदाचार्यदारे वृत्तिः २७

▼

## ⑤

>
▼ Bühler

27. He shall behave towards his teacher's wife as towards the teacher himself, but he shall not embrace her feet, nor eat the residue of her food. 26

▼ हरदत्त-टीका

## सूत्रम्⑥

अन्यत्रोपसङ्ग्रहणादुच्छिष्टाशनाच्चाऽऽचार्यवदाचार्यदारे वृत्तिः ॥२७॥

## टिप्पनी⑥

अन्यत्रेत्युभयोश्शेषः । आचार्यवदाचार्यदारे वृत्तिः कर्तव्या । किमविशेण ? अन्यत्रोपसङ्ग्रहणादुच्छिष्टाशनाच्च, पादोपसङ्ग्रहणमुच्छिष्टाशनं च इत्येतदुभयं वर्जयित्वा । अत्र मनुः— 27'गुरुवद्गुरुपत्नीषु युवतीर्नाभिवादयेत् ।' इति । गौतमस्तु, 28 'तद्भार्यापुत्रेषु चैवं नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसङ्ग्रहणानि' इति । 'दार' इत्येकवचनं छान्दसम् ॥२७॥

#### 28 तथा समादिष्टेऽध्यापयति

तथा समादिष्टेऽध्यापयति २८

▼

## ⑤

>
▼ Bühler

28. So also (shall he behave) towards him who teaches him at (the teacher's) command, 29

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा समादिष्टेऽध्यापयति ।। २८ ॥

## टिप्पनी⑥

य आचार्येण समादिष्टो नियुक्तोऽध्यापयति तस्मिन्नाचार्यदारवद्वृत्तिः । 'अध्यापयतीति वर्तमाननिर्देशा30द्यावदध्यापनमेवायमतिदेशः ॥ २८ ॥

#### 29 वृद्धतरे च सब्रह्मचारिणि

वृद्धतरे च सब्रह्मचारिणि २९

▼

## ⑤

>
▼ Bühler

29. And also to a fellow-student who is superior (in learning and years). 31

▼ हरदत्त-टीका

## सूत्रम्⑥

वृद्धतरे च सब्रह्मचारिणि ॥ २९ ॥

## टिप्पनी⑥

अध्यापयतीति नाऽनुवर्तते । तरनिर्देशात् ज्ञानवयोभ्यामुभाभ्यां वृद्धो गृह्यते । सब्रह्मचारी सहाध्यायी, समाने ब्रह्मणि व्रत चरतीति ।
तस्मिन्नप्याचार्यदारवद्वृत्तिः।
'आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
पादं सब्रह्मचारिभ्यः पादः कालेन पच्यते ॥' इत्यध्ययने उपयोगसम्भवात् ॥ २९॥

#### 30 उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः

उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः ३०

▼

## ⑤

>
▼ Bühler

30. He shall behave to his teacher's son (who is superior to himself in learning or years) as to his teacher, but not eat the residue of his food. 32

▼ हरदत्त-टीका

## सूत्रम्⑥

उच्छिष्टाशनवर्जमाचार्यवदाचार्यपुत्रे वृत्तिः ॥ ३० ॥

## टिप्पनी⑥

'उच्छिष्टाशनवर्जमिति वचनादुपसङ्ग्रहणं भवति । एतच्च ज्ञानवयोभ्यामुभाभ्यां वृद्धे । तदर्थं वृद्धतर इत्यनुवर्तते । गौतमीयस्तूपसङ्ग्रहणप्रतिषेधो वृद्धतरादन्यविषयः ॥ ३० ॥

#### 31 समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु

समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु ३१

▼

## ⑤

>

▼ Bühler

31. Though he may have returned home, the behaviour towards his (teacher and the rest) which is prescribed by the rule of conduct settled by the agreement (of those who know the law, must be observed by him to the end),

▼ हरदत्त-टीका

## सूत्रम्⑥

समावृत्तस्याप्येतदेव सामयाचारिकमेतेषु ॥ ३१॥

## टिप्पनी⑥

कृतसमावर्तनस्याप्येतदेवानन्तरोक्तम् । एतेष्वाचार्यादिषु पुत्रान्तेषु सामयाचारिकं समयाचारप्राप्तं वृत्तमान्तात् । समादिष्टे त्वध्यापयीतेति33 विशेष उक्तः ॥ ३१॥

॥ इत्यापस्तम्बीयधर्मसूत्रवृत्तावुज्वलायां सप्तमी कण्डिका ॥

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
2. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
6. Manu II, 35.↩
7. आप० ध० १.३०.८.↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
10. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
11. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
13. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

समयः शुश्रूषा, तेन विना कृच्छ्रं दुःखं दुरवधारणं अपूर्वं ग्रन्थं न कुर्वीत । क्रियासामान्यवचनः करोतिरध्ययनेऽध्यापने च वर्तते । समयेन विना शिष्योऽपि कृच्छ्रं ग्रन्थं नाऽधीयीत । आवार्योऽपि नाध्यापयेत् । तथा च मनुः—
19 धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।

न तत्र विद्या वप्तव्या शुभं बीजमिवोषरे' ॥ इति । किमविशेषेण ? नेत्याह-त्रिःश्रावणमात्रे त्रिस्सहवचनमिति परिहाप्य वर्जयित्वा । त्रिःश्रावणमात्रे त्रिस्सहवचनमात्रे चान्यतरापेक्षया क्रियमाणे शुश्रूषा नाऽपेक्ष्या । ततोऽधिके सर्वत्रापेक्ष्यति ॥१०॥

#### 11 अविचिकित्सा यावद्ब्रह्म निगन्तव्यमिति

अविचिकित्सा यावद् ब्रह्म निगन्तव्यम् इति हारीतः ११ *(????)*

▼

### ⑤

>
▼ Bühler

11. Hārita declares, that the (whole) Veda must be studied under a vow of obedience until there is no doubt (regarding it in the mind of the pupil). 20

▼ हरदत्त-टीका

## सूत्रम्⑥

अविचिकित्सा यावद्ब्रह्म निगन्तव्यमिति हारीतः ॥ ११ ॥

## टिप्पनी⑥

विचिकित्सा संशयः। तदभावोऽविचिकित्सा सा यावदुत्पद्यते तावद्ब्रह्म निगन्तव्यं नियमपूर्वमधिगन्तव्यमिति हारीतः आचार्यो मन्यते । अत्र पक्षे त्रिःश्रावणत्रिस्सहवचनयोरपि शुश्रूषितव्यम् । ब्रह्मग्रहणादङ्गेषु नायं विधिः ॥ ११ ॥

#### 12 न बहिर्वेदे गतिर्विद्यते

न बहिर्वेदे गतिर्विद्यते १२

▼

### ⑤

>
▼ Bühler

12. No obedience is due (to the teacher for teaching) works which do not belong to the Veda.

▼ हरदत्त-टीका

## सूत्रम्⑥

न बहिर्वेदे गतिर्विद्यते ॥ १२ ॥

## टिप्पनी⑥

वेदाद्बहिर्भूते काव्यनाटकादिश्रवणे । गतिः शुश्रूषा न विद्यते यद्यपि तदुपयुक्तं वेदार्थज्ञाने ॥ १२ ॥

#### 13 समादिष्टमध्यापयन्तं यावदध्ययनमुपसङ्गृह्णीयात्

समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् १३

▼

## ⑤

>
▼ Bühler

13. (A student) shall embrace the feet of a person, who teaches him at the request of his (regular teacher), as long as the instruction lasts. 21

▼ हरदत्त-टीका

## सूत्रम्⑥

समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् ॥ १३ ॥

## टिप्पनी⑥

य आचार्येण समादिष्टोऽध्यापयति तं यावदध्ययनं यावदसावध्यापयते तावदुपसंगृह्णीयात् । तथा 22 'समादिष्टेऽध्यापयती'त्यत्राऽऽचार्यवद्वृत्तिरुक्ता । तत्र 23चा'न्यत्रोपसङ्ग्रहणादि'ति वर्तते । 24अत उपसङ्ग्रहणार्थोऽयमारम्भः ॥ १३ ॥

#### 14 नित्यमर्हन्तमित्येके

नित्यमर्हन्तमित्येके १४

▼

## ⑤

>
▼ Bühler

14. Some (declare, that he shall also) always, (if the substitute is) a worthy person. 25

▼ हरदत्त-टीका

## सूत्रम्⑥

नित्यमर्हन्तमित्येके ॥ १४ ॥

## टिप्पनी⑥

स चेत्समादिष्टोऽर्हन् भवति26 विद्यासदाचारादिना । ततो नित्यमुपसंगृह्णीयात्, इत्येके मन्यन्ते । स्वमते तु यावदध्ययनमिति ॥ १४ ॥

#### 15 न गतिर् विद्यते

न गतिर् *(=शुश्रूषा)* विद्यते १५

▼

## ⑤

>
▼ Bühler

15. But obedience (as towards the teacher) is not required (to be shown towards such a person).

▼ हरदत्त-टीका

## सूत्रम्⑥

न गतिर्विद्यते ॥ १५ ॥

## टिप्पनी⑥

यद्यसावर्हन् भवति तथाप्याचार्ये या गतिःशुश्रषा सा तस्मिन्न् कर्तव्या ॥ १५ ॥

#### 16 वृद्धानान् तु

वृद्धानां तु १६

▼

## ⑤

>
▼ Bühler

16. And (pupils) older (than their teacher need not show him obedience). 27

▼ हरदत्त-टीका

## सूत्रम्⑥

वृद्धानां तु ॥१६॥

## टिप्पनी⑥

तुश्चार्थे । वृद्धानां चान्तेवासिनां न गतिर्विद्यते । पूर्ववयसाऽन्ते वासिना अवरवया आचार्यो न शुश्रूषितव्यः। अध्ययनादूर्ध्वमित्येके । अध्ययनकालेऽपीत्यन्ये । केचिदवरवयसाऽप्यन्तेवासिना न वार्धके गतिः कर्तव्येत्याहुः ॥ १६ ॥

#### 17 ब्रह्मणि मिथो विनियोगे

ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते १७

▼

## ⑤

>
▼ Bühler

17. If (two persons) teach each other mutually (different redactions of) the Veda, obedience (towards each other) is not ordained for them.

▼ हरदत्त-टीका

## सूत्रम्⑥

ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते ॥ १७ ॥

## टिप्पनी⑥

ब्रह्मणि वेदविषये यदा मिथो विनियोगः क्रियते बह्वृचो यजुर्वेदिनः सकाशाद्यजुर्वेदमधीते सोऽपि तस्मादृग्वेदम् । तदाऽपि परस्परं शुश्रूषा न कर्तव्या ॥ १७ ॥

#### 18 ब्रह्म वर्धत इत्युपदिशन्ति

ब्रह्म वर्धत इत्युपदिशन्ति १८

▼

## ⑤

>
▼ Bühler

18. (For) the (wise) say, 'The Veda-knowledge (of either of them) grows.'

▼ हरदत्त-टीका

## सूत्रम्⑥

ब्रह्म वर्धत इत्युपदिशन्ति ॥ १८ ॥

## प्रस्तावः⑥

अत्र हेतुं स्वयमेवाह—

## टिप्पनी⑥

द्वयोरपि ब्रह्म वर्धते । सैव ब्रह्मवृद्धि' शुश्रूषेत्युपदिशन्त्याचार्याः ॥१८॥

#### 19 निवेशे वृत्ते संवत्सरे

निवेशे वृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेद्भूयः श्रुतमिच्छन्न् इति श्वेतकेतुः १९

▼

## ⑤

>

▼ Bühler

19. Śvetaketu declares, 'He who desires to study more, after having settled (as a householder), shall dwell two months every year, with collected mind, in the house of his teacher,'

▼ हरदत्त-टीका

## सूत्रम्⑥

निवेशे वृत्ते संवत्सरेसंवत्सरे द्वौद्वौ मासौ समाहित आचार्यकुले वसेद्भूयःश्रुतिमिच्छन्निति श्वेतकेतुः॥ १९॥

## टिप्पनी⑥

भूयःश्रवणमिच्छन् पुरुषो निवेशे दारकर्मणि वृत्तेऽपि प्रतिसंवत्सरं द्वौद्वौ मासौ समाहितो भूत्वाऽचार्यकुले वसेदिति श्वेतकेतुराचार्यो मन्यते ॥ १९ ॥

#### 20 एतेन ह्यहं योगेन

एतेन ह्यहं योगेन भूयः पूर्वस्मात्कालाच्छ्रुतमकुर्वीति २०

▼

## ⑤

>
▼ Bühler

20. (And he adds), 'For by this means I studied a larger part of the Veda than before, (during my studentship.)'

▼ हरदत्त-टीका

## सूत्रम्⑥

एतेन ह्यहं योगेन भूयः पूर्वस्मात्कालाच्छ्रुतमकुर्वीति ॥ २० ॥

## प्रस्तावः⑥

अत्र हेतुत्वेन श्वेतकेतोरेव शिष्यान्प्रति वचनम् —

## टिप्पनी⑥

एतेनानन्तरोक्तेन योगेनोपायेन अहं पूर्वस्मात् ब्रह्मचर्यकालात् भूयः 28बहुतरं श्रुतमकुर्वीति कृतवानस्मि । अतो यूयमपि तथा कुरुध्वमिति ॥

#### 21 तच्छास्त्रैर्विप्रतिषिद्धम्

तच्छास्त्रैर्विप्रतिषिद्धम् २१

▼

## ⑤

>
▼ Bühler

21. That is forbidden by the Śāstras.

▼ हरदत्त-टीका

## सूत्रम्⑥

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ २१ ॥

## टिप्पनी⑥

तदिदं श्वेतकेतोर्वचनं श्रुत्यादिभिः शास्त्रैर्विरुद्धम् ॥ २१ ॥

#### 22 निवेशे हि वृत्ते

निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते २२

▼

⑤

>
▼ Bühler

22. For after the student has settled as a householder, he is ordered by the Veda, to perform the daily rites,

▼ हरदत्त-टीका

## सूत्रम्⑥

निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते ॥ २२ ॥

## प्रस्तावः⑥

कथमित्यत आह —

## टिप्पनी⑥

हिशब्दो हेतौ । यस्मात् निवेशे वृत्ते नैयमिकानि नियमेन कर्तव्यानि नित्यानि कर्माणि श्रूयन्ते ॥ २२ ॥

॥ इति त्रयोदशी कण्डिका ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
6. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
7. आप० ध० १.३०.८.↩
8. मनु० रमृ० २.६↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

11. Manu II, 35.↩

12. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

13. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

14. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

17. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

18. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

19. आप० ध० १.३०.८.↩

20. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

21. Manu II, 69; Yājñ. I, 15.↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

24. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

25. Manu II, 144.↩

26. आप० ध० १.३०.८.↩

27. Manu II, 146-148.↩

28. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

# १४①

## 01 अग्निहोत्रमतिथयः④

अग्निहोत्रमतिथयः १

▼

### ⑤

>
▼ Bühler

1. (That is to say) the Agnihotra, hospitality, 1

▼ हरदत्त-टीका

### सूत्रम्⑥

2अग्निहोत्रमतिथयो यच्चान्यदेवं युक्तम् ॥ १ ॥

### प्रस्तावः⑥

कानि पुस्तकानि ?

### टिप्पनी⑥

अग्निहोत्रम्, अतिथयः अतिथिपूजा ।
3 यथा मातरमाश्रित्य सर्व जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः ॥ इति । यच्चान्यदेव युक्तं एवंविधं श्राद्धसन्ध्योपासनादि । एवमेतैः कर्मभि रहरहराक्रान्तस्य न 4शरीरकण्डूयनेष्वप्यवसरो भवति । स कथं द्वौद्वौ मासौ गुरुकुले वसेदिति ॥ १ ॥

#### 02 यच्चान्यदेवं युक्तम्

यच्चान्यदेवं युक्तम् २

▼

### ⑤

>
▼ Bühler

2. And what else of this kind (is ordained).

▼ हरदत्त-टीका

## सूत्रम्⑥

यच्चान्यदेवं युक्तम् २

## टिप्पनी⑥

*(पूर्वसूत्रे वीक्षताम् ।)*

#### 03 अध्ययनार्थेन यञ् चोदयेन्न

अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत ३

▼

## ⑤

>
▼ Bühler

3. He whom (a student) asks for instruction, shall certainly not refuse it; 5

▼ हरदत्त-टीका

## सूत्रम्⑥

अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत ॥ २ ॥

## टिप्पनी⑥

यमाचार्यं माणवकोऽध्ययनं प्रयोजनमुद्दिश्य चोदयेत्-'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्न'मिति, स एनं माणवकं नैव प्रत्याचक्षीत । चशब्दोऽवधारणे ॥ २॥

#### 04 न चास्मिन्दोषम् पश्येत्

न चास्मिन्दोषं पश्येत् ४

▼

## ⑤

>
▼ Bühler

4. Provided he does not see in him a fault, (which disqualifies him from being taught).

▼ हरदत्त-टीका

## सूत्रम्⑥

न चास्मिन् दोषं पश्येत् ॥ ३ ॥

## प्रस्तावः⑥

किमविशेषेण ? नेत्याह—

## टिप्पनी⑥

चणिति निपातोऽस्ति-6'निपातैर्यद्यदिहन्तकुविनेच्चेश्चणकच्चिद्यत्रयुक्त'मिति । स चेदर्थे वर्तते। 7 'इन्द्रश्च मृडयाति न' इत्यादौ दर्शनात् । तस्यायं प्रयोगः- न चेदस्मिन् माणवके दोषमनध्याप्यताहेतुं पश्येत् ॥ ३॥

#### 05 यदृच्छायामसंवृत्तौ गतिरेव तस्मिन्

यदृच्छायामसंवृत्तौ गतिरेव तस्मिन् ५

▼

## ⑤

>

▼ Bühler

5. If by chance (through the pupil's stupidity the teaching) is not completed, obedience towards the (teacher is the pupil's only refuge). 8

▼ हरदत्त-टीका

## सूत्रम्⑥

यदृच्छायामसंवृत्तौ गतिरेव तस्मिन् ॥ ४॥

## टिप्पनी⑥

समानमधीयानेषु माणवकेषु यदि कस्यचिद्यदृच्छया दृष्टहेतुमन्तरेण बुद्धिमान्द्यादिनाऽध्ययनस्या 9संवृत्तिस्स्यात् अधीतो भागो माणवकान्तरवन्नागच्छेत् तदा तस्यां यहच्छायामसंवृत्तौ तस्मिन्नाचार्ये गतिरेव शुश्रूषैव माणवकस्य शरणम् । तथा च मनुः—
10 यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।

तथा गुरुगतां विद्यां शुश्रूधुरधिगच्छति ॥ इति ।
अधिकं शुश्रूषितो हि गुरुस्सर्वात्मना तं शिक्षयेदिति ॥ ४ ॥

#### 06 मातरि पितर्याचार्यवच्छुश्रूषा

मातरि पितर्याचार्यवच्छुश्रूषा ६

▼

### ⑤

>
▼ Bühler

6. Towards a mother (grandmother and great-grandmother) and a father (grandfather and great-grandfather) the same obedience must be shown as towards a teacher. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

मातरि पितर्याचार्यवच्छुश्रूषा ॥ ५ ॥

## टिप्पनी⑥

मातृग्रहणेन पितामहीप्रपितामह्योरपि ग्रहणम् । पितृग्रहणेन पितामहप्रपितामहयोः। सर्व एते आचार्यवच्छुश्रूषितव्याः ॥५॥

#### 07 समावृत्तेन सर्वे गुरव

समावृत्तेन सर्वे गुरव उपसंग्राह्याः ७

▼

### ⑤

>
▼ Bühler

7. The feet of all Gurus must be embraced (every day) by a student who has returned home; 12

▼ हरदत्त-टीका

## सूत्रम्⑥

समावृत्तेन सर्वे गुरव उपसङ्ग्राह्याः ॥ ६ ॥

## टिप्पनी⑥

उक्ताश्चानुक्ताश्च ज्येष्ठभ्रातृमातुलादयः सर्वे गुरव समावृत्तेनाहरहरुपसंग्राह्याः ॥

#### 08 प्रोष्य च समागमे

प्रोष्य च समागमे ८

▼

## ⑤

>
▼ Bühler

8. And also on meeting them, after returning from a journey. 13

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रोष्य च समागमे ।। ७॥

## टिप्पनी⑥

यदि स्वयं प्रोष्य समागतो भवति । गुरवो वा प्रोष्य समागताः । वदामि ते उपसङ्ग्राह्याः ॥ ७ ॥

#### 09 भ्रातृषु भगिनीषु च

भ्रातृषु भगिनीषु च यथापूर्वमुपसंग्रहणम् ९

▼

## ⑤

>
▼ Bühler

9. The feet of (elder) brothers and sisters must be embraced, according to the order of their seniority. 14

▼ हरदत्त-टीका

## सूत्रम्⑥

भ्रातृषु भगिनीषु च यथापूर्वमुपसङ्ग्रहणम् ॥ ८॥

## टिप्पनी⑥

पूर्वेणैव सिद्धे क्रमार्थं वचनम्-यथापूर्वं ज्येष्ठक्रमेणेति ॥८॥

#### 10 नित्या च पूजा

नित्या च पूजा यथोपदेशम् १०

▼

## ⑤

>
▼ Bühler

10. And respect (must) always (be shown to one's elders and betters), according to the injunction 15 (given above and according to the order of their seniority).

▼ हरदत्त-टीका

## सूत्रम्⑥

नित्या च पूजा यथोपदेशम् ॥ ९ ॥

## टिप्पनी⑥

16 'पूजा वर्णज्यायसां कार्या, वृद्धतराणां चे'त्युपदेशानुरोधेन या नित्या पूजा सा यथापूर्वं वृद्धक्रमेण ॥ ९ ॥

#### 11 ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत्

ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत् ११

▼

## ⑤

>
▼ Bühler

11. He shall salute an officiating priest, a father-in-law, a father's brother, and a mother's. brother, (though they may be) younger than he himself, and (when saluting) rise to meet them. 17

▼ हरदत्त-टीका

## सूत्रम्⑥

ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाऽभिवदेत् ॥ १० ॥

## टिप्पनी⑥

18'त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हती'ति वक्ष्यति । तेनावरवयस ऋत्विगादयोऽप्यभिवादयन्ते । तानभिवादयमानान् प्रत्युत्थायाभिवदेत् । नान्येष्विव सुखमासीनोऽभिवदति। वयस्त उत्कृष्टानां तेषामियमेव पूजा ॥१०॥

#### 12 तूष्णीं वोपसङ्गृह्णीयात्

तूष्णीं वोपसंगृह्णीयात् १२

▼

## ⑤

>
▼ Bühler

12. Or he may silently embrace their feet. 19

▼ हरदत्त-टीका

## सूत्रम्⑥

तूष्णीं वोपसंगृह्णीयात् ॥ ११ ॥

## टिप्पनी⑥

अथवा प्रत्युत्थाय स्वयमपि तास्तूष्णीमुपसंगृह्णीयात् । विद्याचारित्राद्यपेक्षो विकल्पः ॥ ११॥

#### 13 दशवर्षम् पौरसख्यम् पञ्चवर्षन्

दशवर्षं पौरसख्यं पञ्चवर्षं तु चारणम् । त्रिवर्षपूर्वः श्रोत्रियः अभिवादनमर्हति १३

▼

## ⑤

>
▼ Bühler

13. A friendship kept for ten years with fellow citizens (is a reason for giving a salutation, and so is) a friendship, contracted at school, which has lasted for five years. But a learned Brāhmaṇa (known) for less than three years, must be saluted. 20

▼ हरदत्त-टीका

## सूत्रम्⑥

दशवर्षं पौरसख्यं पञ्चवर्षं तु चारणम् ।
त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमहति ॥ १२ ॥

## प्रस्तावः⑥

अथाभिवाद्या उच्यन्ते—

## टिप्पनी⑥

पुरेभवं पौरम् । पौरं च तत्सख्यं च पौरसख्यं सेवादिनिबन्धनं बान्धवं तदभिवादनस्य निमित्तम् । कीदृशम् ? दशवर्षान्तरालं, दशवर्षाधिकः पौरस्सखा अश्रोत्रियोऽप्यभिवाद्य इति विवक्षितम्। पञ्चवर्षं तु चारणम् । सख्यमित्युपसमस्तमप्यपेक्ष्यते। चारणशब्दः शाखाध्यायिषु रूढः । तेषां सख्यं पञ्चवर्षमभिवादनस्य निमित्तम् । 21श्रोत्रियं वक्ष्यति । त्रिवर्षपूर्वः श्रोतियोऽभिवादनमर्हति । स त्रिवर्षपूर्वतामात्रेणाभिवादनमर्हति, न पूर्वसंस्तवमपेक्षते ॥ १२॥

#### 14 ज्ञायमाने वयोविशेषे वृद्धतरायाभिवाद्यम्

ज्ञायमाने वयोविशेषे वृद्धतरायाभिवाद्यम् १४

▼

## ⑤

>
▼ Bühler

14. If the age (of several persons whom one meets) is exactly known, one must salute the eldest (first).

▼ हरदत्त-टीका

## सूत्रम्⑥

ज्ञायमाने वयोविशेषे वृद्धतरायाऽभिवाद्यम् ॥ १३ ॥

## टिप्पनी⑥

क्रमार्थमिदम्22 वयोविशेषे ज्ञायमाने पूर्वं वृद्धतरायाऽभिवाद्यम् अभिवादनं कर्तव्यम् ! पश्चाद्वृद्धायेति ॥ १३ ॥

#### 15 विषमगतायागुरवे नाभिवाद्यम्

विषमगतायागुरवे नाभिवाद्यम् १५

▼

⑤

>
▼ Bühler

15. He need not salute a person, who is not a Guru, and who stands in a lower or higher place than he himself.

▼ हरदत्त-टीका

## सूत्रम्⑥

विषमगतायाऽगुरवे नाभिवाद्यम् ॥ १४ ॥

## टिप्पनी⑥

उच्चैस्थाने नीचैस्स्थाने वाऽवस्थितो विषमगतः । तस्मै गुरुव्यतिरिक्ताय नाभिवाद्यम् । गुरवे स्वाभिवाद्यमेव, दर्शने सति तूष्णीमवस्थानस्याऽयुक्तत्वात् ॥ १४॥

#### 16 अन्वारुह्य वाभिवादयीत

अन्वारुह्य वाभिवादयीत १६

▼

⑤

>
▼ Bühler

16. Or he may descend or ascend (to the place where such a person stands) and salute him. 23

▼ हरदत्त-टीका

## सूत्रम्⑥

अन्वारुह्य वाभिवादयीत ॥ १५ ॥

## टिप्पनी⑥

इदमगुरुविषयम् । यत्रासावभिवादनीयः स्थितः तत्रान्वारुह्याभिवादयीत अभिवदेत् । अन्ववरुह्येत्यपि द्रष्टव्यम्, न्यायस्य तुल्यत्वात् । गुरौ तु दृष्टमात्र एवाभिवादनमित्युक्तम् ॥ १५ ॥

#### 17 सर्वत्र तु प्रत्युत्थायाभिवादनम्

सर्वत्र तु प्रत्युत्थायाभिवादनम् १७

▼

### ⑤

>
▼ Bühler

17. But every one (Gurus and others) he shall salute, after having risen (from his seat). 24

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वत्र तु प्रत्युत्थायाभिवादनम् ॥ १६ ॥

## टिप्पनी⑥

सर्वत्र गुरावगुरौ च प्रत्युत्थायैवाभिवादनं कर्तव्यम् ॥१६॥

#### 18 अप्रयतेन नाभिवाद्यम्

अप्रयतेन नाभिवाद्यम् १८

▼

### ⑤

>
▼ Bühler

18. If he is impure, he shall not salute (anybody); 25

▼ हरदत्त-टीका

## सूत्रम्⑥

26अप्रयतेन नाभिवाद्यं, तथाऽप्रयतायाऽप्रयतश्च न प्रत्यभिवदेत् ॥ १७ ॥

## प्रस्तावः⑥

उत्तरे द्वे सूत्रे निगदसिद्धे ॥

## टिप्पनी⑥

यद्यज्ञानादप्रयताय कश्चिदभिवादयेत् तथापि सोऽप्रयतो न प्रत्यभिवदेत् ॥ १७ ॥

#### 19 तथाप्रयताय

तथाप्रयताय १९

▼

## ⑤

>
▼ Bühler

19. (Nor shall he salute) a person who is impure.

▼ हरदत्त-टीका

## सूत्रम्⑥

तथाऽप्रयताया ॥ १८ ॥

## टिप्पनी⑥

*(पूर्वसूत्रे वीक्षताम् ।)*

#### 20 अप्रयतश्च न प्रत्यभिवदेत्

अप्रयतश्च न प्रत्यभिवदेत् २०

▼

## ⑤

>
▼ Bühler

20. Nor shall he, being impure, return a salutation.

▼ हरदत्त-टीका

## सूत्रम्⑥

अप्रयतश्च न प्रत्यभिवदेत् ॥ १९ ॥

## टिप्पनी⑥

*(पूर्वसूत्रे वीक्षताम् ।)*

#### 21 पतिवयसः स्त्रियः

पतिवयसः स्त्रियः २१

▼

## ⑤

>
▼ Bühler

21. Married women (must be saluted) according to the (respective) ages of their husbands.

▼ हरदत्त-टीका

## सूत्रम्⑥

पतिवयसः स्त्रियः ॥ १८ ॥

## टिप्पनी⑥

पत्युर्यद्वयस्तदेव स्त्रीणां वयः । तेन तदनुरोधेन ज्येष्ठभार्यादिष्वभिवादनम् ॥ १८॥

#### 22 न सोपानह्वेष्टितशिरा अवहितपाणिर्वाभिवादयीत

न सोपानह्वेष्टितशिरा अवहितपाणिर्वाभिवादयीत २२

▼

## ⑤

>
▼ Bühler

22. He shall not salute with his shoes on, or his head wrapped up, or his hands full.

▼ हरदत्त-टीका

## सूत्रम्⑥

न सोपानद्वेष्टितशिरा अवहितपाणिर्वाभिवादयीत ॥ १९ ॥

## टिप्पनी⑥

अवहितपाणिः समिकुशादिहस्तः, दानादिहस्तो वा । अन्यत्प्रसिद्धम्॥

#### 23 सर्वनाम्ना स्त्रियो राजन्यवैश्यौ

सर्वनाम्ना स्त्रियो राजन्यवैश्यौ च न नाम्ना २३

▼

## ⑤

>
▼ Bühler

23. In saluting women, a Kṣatriya or a Vaiśya he shall use a pronoun, not his name. 27

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वनाम्ना स्त्रियो राजन्यवैश्यो च28न नाम्ना ॥ २० ॥

## टिप्पनी⑥

स्त्रिय सर्वनाम्नैवाभिवादयीत अभिवादयेऽहमिति न नाम्ना29 ऽसाधारणेन देवदत्तोऽहमभिवादय इति । एवं राजन्यवैश्यौ च ॥ २० ॥

#### 24 मातरमाचार्यदारञ् चेत्येके

मातरमाचार्यदारं चेत्येके २४

▼

## ⑤

>
▼ Bühler

24. Some (declare, that he shall salute in this manner even) his mother and the wife of his teacher. 30

▼ हरदत्त-टीका

## सूत्रम्⑥

मातरमाचार्यदारं चेत्येके ॥ २१ ॥

## टिप्पनी⑥

मातरमाचार्यदारं चैते अपि वे सर्वनाम्नवाऽभिवादयीत । न नाम्नाभिवादयीतेत्येके मन्यन्ते । स्वमतं तु नाम्नैवेति ॥ २१ ॥

#### 25 दशवर्षश्च ब्राह्मणः शतवर्षश्च

दशवर्षश्च ब्राह्मणः शतवर्षश्च क्षत्रियः । पितापुत्रौ स्म तौ विद्धि तयोस्तु ब्राह्मणः पिता २५

▼

## ⑤

>
▼ Bühler

25. Know that a Brāhmaṇa of ten years and a Kṣatriya of a hundred years stand to each other in the relation of father and son. But between those two the Brāhmaṇa is the father. 31

▼ हरदत्त-टीका

## सूत्रम्⑥

दशवर्षश्च ब्राह्मणः शतवर्षश्च क्षत्रियः । पितापुत्रौ स्म तो विद्धि तयोस्तु ब्राह्मणः पिता ॥

## प्रस्तावः⑥

वयोविशेषणाभिवादनं हीनवर्णे नास्तीत्याह—

## टिप्पनी⑥

शिष्य प्रत्याचार्यस्याऽयमुपदेशः । स्मशब्दः श्लोकपूरणो निपातः । ब्राह्मणः क्षत्रिय इत्युपलक्षणमुत्तमाधमवर्णानाम् । विद्धि जानीहि । 32शिष्टं स्पष्टम् ॥२२॥

#### 26 कुशलमवरवयसं वयस्यं वा

कुशलमवरवयसं वयस्यं वा पृच्छेत् २६

▼

## ⑤

>

▼ Bühler

26. A younger person or one of equal age he shall ask, about his well-being (employing the word kuśala). 33

▼ हरदत्त-टीका

## सूत्रम्⑥

कुशलमवरवयसं वयस्यं वा पृच्छेत् ॥ २३ ॥

## टिप्पनी⑥

ब्राह्मणविषयमिदम् । 34क्षत्रियादिषु विशेषस्य वक्ष्यमाणत्वात् । वयसा तुल्यो वयस्यः । अवरवयस वयस्य वा ब्राह्मणं पथ्यादिषु सङ्गतं कुशलं पृच्छेत्-'अपि कुशल'मिति ॥ २३ ॥

#### 27 अनामयङ् क्षत्रियम्

अनामयं क्षत्रियम् २७

▼

## ⑤

>

▼ Bühler

27. (He shall ask under the same conditions) a Kṣatriya, about his health (employing the word anāmaya);

▼ हरदत्त-टीका

## सूत्रम्⑥

अनामयं क्षत्रियम् ॥ २४ ॥

## टिप्पनी⑥

पृच्छेत् 'अप्यनामयं भवत' इति । आमयो रोगः तदभावोऽनामयम् ॥

#### 28 अनष्टं वैश्यम्

अनष्टं वैश्यम् २८

▼

⑤

>
▼ Bühler

28. A Vaiśya if he has lost anything (employing the word anaṣṭa). 35

▼ हरदत्त-टीका

## सूत्रम्⑥

अनष्टं वैश्यम् ॥ २५ ॥

## टिप्पनी⑥

'अप्यनष्टपशुधनोऽसी'ति ॥ २५ ॥

#### 29 आरोग्यं शूद्र म्

आरोग्यं शूद्र म् २९

▼

⑤

>
▼ Bühler

29. A Śūdra, about his health (employing the word ārogya).

▼ हरदत्त-टीका

## सूत्रम्⑥

आरोग्यं शूद्रम् ॥ २६॥

## टिप्पनी⑥

शूद्रमारोग्यं पृच्छेत्-'अप्यरोगो भवा'निति ॥ २६ ॥

#### 30 नासम्भाष्य श्रोत्रियं व्यतिव्रजेत्

नासंभाष्य श्रोत्रियं व्यतिव्रजेत् ३०

▼

## ⑤

>
▼ Bühler

30. He shall not pass a learned Brāhmaṇa without addressing him;

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽसम्भाष्य श्रोत्रियं व्यतिव्रजेत् ॥ २७ ॥

## टिप्पनी⑥

श्रोत्रियं पथि सङ्गत्तमसम्भाष्य न व्यतिव्रजेत् न व्यतिक्रामेत् ॥ २७ ॥

#### 31 अरण्ये च स्त्रियम्

अरण्ये च स्त्रियम् ३१

▼

## ⑤

>
▼ Bühler

31. Nor an (unprotected) woman in a forest (or any other lonely place). 36

▼ हरदत्त-टीका

## सूत्रम्⑥

अरण्ये च स्त्रियम् ॥ २८ ॥

## टिप्पनी⑥

अरण्यग्रहणं 37सभयस्य देशस्योपलक्षणम् । तत्र स्त्रियमेकाकिनीं दृष्ट्वा असम्भाष्य न व्यतिव्रजेत् । सम्भाषणं च मातृवद्भगिनीवच्च-'भगिनि किं ते करवाणि न भेतव्यम्' इति ॥ २८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ चतुर्दशी कण्डिका ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामु. ज्ज्वलायां प्रथमप्रश्ने चतुर्थः पटलः ॥ ४ ॥

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition. ↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
4. आप० ध० १.३०.८.↩
5. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
7. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
8. Manu II, 35.↩
9. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
10. आप० ध० १.३०.८.↩
11. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
12. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
13. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
14. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
15. Manu II, 69; Yājñ. I, 15.↩
16. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
17. Manu II, 144.↩
18. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
19. Manu II, 146-148.↩
20. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

21. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. Manu II, 147.↩

24. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

25. Manu II, 37.↩

26. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

27. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

28. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

29. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

30. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

31. The meaning is, he shall keep all the restrictions imposed upon a student, as chastity, &c, but that he shall not perform the fire-worship or service to a teacher, nor study. Manu II, 39; XI. 192, Yājñ. I, 38; Weber, Ind. Stud. X, 101.↩

32. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

33. 'If he is strong, he shall bathe three times a day--morning, midday, and evening.'--Haradatta.↩

34. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

35. Brahman, apparently, here means 'Veda,' and those who neglect its study may be called metaphorically 'slayers of the Veda.'↩

36. Manu II, 40; Āśv. Gṛ. Sū. I, 19, 8, 9; Weber, Ind. Stud. X, 21.↩

37. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

**०५①**

# १५①

## 01 उपासने गुरूणां वृद्धानामतिथीनां④

उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात् १

▼

### ⑤

>
▼ Bühler

1. When he shows his respect to Gurus or aged persons or guests, when he offers a burnt-oblation (or other sacrifice), when he murmurs prayers at dinner, when sipping water and during the (daily) recitation of the Veda, his garment (or his sacrificial thread) shall pass over his left shoulder and under his right arm. 1

▼ हरदत्त-टीका

### सूत्रम्⑥

उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात् ॥१॥

### प्रस्तावः⑥

सर्वेषामेव कर्मणां शेषभूतमाचमनं विधास्यंस्तदुपयोगिनो विधीनाह —

### टिप्पनी⑥

गुरूणामाचार्यादीनाम् , अन्येषां च वृद्धानां पूज्यानामतिथीनां च उपासने यदा तानुपास्ते तदा, होमे साङ्गे पित्र्यादन्यत्र, जप्यकर्मणि जपक्रियायां भोजनाचमनयोश्च, स्वाध्यायाध्ययने च, यज्ञोपवीती स्यात् यज्ञोपवीती भवेत् । वासोविन्यासविशेषो यज्ञोपवीतम्2 'दक्षिणं वाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतम्, इति ब्राह्मणम् । वाससोऽसम्भवेनुकल्पं वक्ष्यति 'अपि वा सूत्रमेवोपवीतार्थ' (२-४-२२) इति । मनुरप्याह—
3 कार्पासमुपवीतं स्याद्विप्रस्योर्ध्वकृतं त्रिवृत् । इति ॥
4 उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः ॥ इति च । एषु कर्मसु यज्ञोपवीतविधानात्कालान्तरे नावश्यम्भावः ॥ १ ॥

#### 02 भूमिगतास्वप्स्वाचम्य प्रयतो भवति

भूमिगतास्वप्स्वाचम्य प्रयतो भवति २

▼

### ⑤

>
▼ Bühler

2. By sipping (pure) water, that has been collected on the ground, he becomes pure. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

भूमिगतास्वप्वाचम्य प्रयतो भवति ॥२॥

## टिप्पनी⑥

6आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् ।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः7 ॥ इति मनुः ।
'शुचि गातृप्तिकृतोयं प्रकृतिस्थं महीगतम्' इति । याज्ञवल्क्य.
8 अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका! दशरात्रेण शुध्यन्ति भूमिष्ठं च नवोदकम् ॥' 9इति ।
श्रावणे मासि सम्प्राप्ते सर्वा नद्यः रजस्वलाः10 ।
इति स्मृत्यन्तरम् । एवंभूतदोषरहितास्वपस्वाचम्य प्रयतो भवति । प्रायत्यार्थमाचमनं भूमिगतास्वप्सु कर्तव्यमिति ॥ २॥

#### 03 यं वा प्रयत

यं वा प्रयत आचामयेत् ३

▼

## ⑤

>
▼ Bühler

3. Or he, whom a pure person causes to sip water, (becomes also pure). 11

▼ हरदत्त-टीका

## सूत्रम्⑥

यं वा प्रयत आचमयेत् ॥ ३ ॥

## टिप्पनी⑥

यं वा प्रयतोऽन्य आचमयेत् सोऽपि प्रयतो भवति । सर्वथा स्वयं वामहस्तावर्जिताभिरद्भिराचमनं न भवति । एतेन शास्त्रान्तरोक्त कमण्डलुधारणमप्याचार्यस्याऽनभिमतं लक्ष्यते। अलाबुपात्रेण नालिकेरपात्रेण वा स्वयमाचमनमाचरन्ति शिष्टाः ॥ ३॥

#### 04 न वर्षधारास्वाचामेत्

न वर्षधारास्वाचामेत् ४

▼

### ⑤

>
▼ Bühler

4. He shall not sip rain-drops. 12

▼ हरदत्त-टीका

## सूत्रम्⑥

न वर्षधारास्वाचामेत् ॥ ४ ॥

## टिप्पनी⑥

पूर्वोक्तेन प्रकारेण प्रायत्यार्थस्याचमनस्य वर्षधारासु प्रसङ्गाभावात् पिपासितस्य पानप्रतिषेधार्थमिति केचित् । अपर आह-अस्मादेव प्रतिषेधाच्छिक्यादिस्थकरकादेर्या धारा तत्र प्रायत्यार्थमाचमनं13 भवतीति ॥ ४॥

#### 05 तथा प्रदरोदके

तथा प्रदरोदके *(स्वयंभुवि गर्ते)* ५

▼

### ⑤

>
▼ Bühler

5. (He shall not sip water) from a (natural) cleft in the ground.

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा14 प्रदरोदके ॥५॥

## टिप्पनी⑥

भूमेः स्वयं दीर्णः प्रदेशः प्रदर तत्र यदुदकं तस्मिन् भूमिगतेऽपि नाऽऽचामेत् ॥ ५॥

#### 06 तप्ताभिश्चाकारणात्

तप्ताभिश्चाकारणात् ६

▼

## ⑤

>
▼ Bühler

6. He shall not sip water heated (at the fire) except for a particular reason (as sickness). 15

▼ हरदत्त-टीका

## सूत्रम्⑥

तप्ताभिश्चाऽकारणात् ॥ ६ ॥

## टिप्पनी⑥

तप्ताभिरद्भिर्नाचामेत् अकारणात् ज्वरादौ कारणे सति न दोषः । 'तप्ताभि'रिति वचनात् शृतशीताभिरदोषः। तथा चोष्णानामेव प्रतिषेधः स्मृतिषु 16प्रायो भवति ॥ ६ ॥

#### 07 रिक्तपाणिर् वयस उद्यम्याप

- रिक्तपाणिर् वयस उद्यम्याप उपस्पृशेत् ७

▼

## ⑤

>
▼ Bühler

7. He who raises his empty hands (in order to scare) birds, (becomes impure and) shall wash (his hands). 17

▼ हरदत्त-टीका

## सूत्रम्⑥

रिक्तपाणिर्वयस उद्यम्याऽप उपस्पृशेत् ॥ ७॥

## टिप्पनी⑥

वय इति पक्षिनाम । यो रिक्तपाणिस्सन् वयसे पक्षिण इद्यम्य तस्य प्रोत्सारणाय पाणिमुद्यच्छते स तत्कृत्वाऽप उपस्पृशेत् तेनैव पाणिना। 'रिक्तपाणि'रिति वचनात् काष्ठलोष्टादिसहितस्य पाणेरुद्यमने न दोषः । केचिदुपस्पर्शनमाचमनमाहुः ॥ ७ ॥

#### 08 शक्तिविषये न मुहूर्तमप्यप्रयतः

शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् ८

▼

### ⑤

>
▼ Bühler

8. If he can (find water to sip) he shall not remain impure (even) for a muhūrta.

▼ हरदत्त-टीका

## सूत्रम्⑥

शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् ॥ ८॥

## टिप्पनी⑥

शक्तौ सत्यां मुहूर्तमप्यप्रयतो न स्यात् । आचमनयोग्यजलं दृष्ट्वैव मूत्र पुरीषादिकं कुर्यात् यदि तावन्तं कालं18 वेगं धारयितुं शक्नुयात् इति ॥८॥

#### 09 नग्नो वा

नग्नो वा ९

▼

### ⑤

>
▼ Bühler

9. Nor (shall he remain) naked (for a muhūrta if he can help it).

▼ हरदत्त-टीका

## सूत्रम्⑥

नग्नो वा ॥ ९॥

## टिप्पनी⑥

न मुहूर्तमपि स्यादिति सम्बध्यते, शक्तिविषय इति च । व्रणादिना कौपीनाच्छादनाशक्तौ न दोषः ॥ ९॥

#### 10 नाप्सु सतः प्रयमणम्विद्यते

नाप्सु सतः प्रयमणम्विद्यते १०

▼

### ⑤

>
▼ Bühler

10. Purification (by sipping water) shall not take place whilst he is (standing) in the water.

▼ हरदत्त-टीका

## सूत्रम्⑥

नाप्सु सतः प्रयमणं विद्यते ॥ १० ॥

## टिप्पनी⑥

येन प्रयतो भवति तत्प्रयमणमाचमनम् । करणे ल्युट । तदप्सु सतो वर्तमानस्य न भवति । जलमध्ये आसीनोऽपि नाचामेत् ॥ १० ॥

#### 11 उत्तीर्य त्वाचामेत्

उत्तीर्य त्वाचामेत् ११

▼

### ⑤

>
▼ Bühler

11. Also, when he has crossed a river, he shall purify himself by sipping water. 19

▼ हरदत्त-टीका

## सूत्रम्⑥

उत्तीर्य त्वाचामेत् ॥ ११ ॥

## टिप्पनी⑥

तीर उत्तीर्याचामेत् न जल इति । अयमर्थो न विधेयः । पूर्वेण गतत्वात् । तस्मादयमर्थः-यदा नदीमुत्तरति नावा प्रकारान्तरेण वा तदा तामुत्तीर्य तीरान्तरं गतः प्रयतोऽप्याचामेत् । नद्यादेरुत्तरणमाचमनस्य निमित्तमिति । 20तुरप्यर्थः ॥ ११ ॥

#### 12 नाप्रोक्षितमिन्धनमग्नावादध्यात्

नाप्रोक्षितमिन्धनमग्नावादध्यात् १२

▼

## ⑤

>
▼ Bühler

12. He shall not place fuel on the fire, without having sprinkled it (with water). 21

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽप्रोक्षितमिन्धनमग्नावादध्यात् ॥१२॥

## टिप्पनी⑥

श्रोते स्मार्ते लौकिके वाऽग्नौ अप्रोक्षितमिन्धनं नाऽऽदध्यात् न प्रक्षिपेत् । केचिल्लौकिके नेच्छन्ति ॥ १२ ॥

#### 13 मूढस्वस्तरे चासंस्पृशन्न् अन्यानप्रयतान्प्रयतो

मूढस्वस्तरे चासंस्पृशन्न् अन्यानप्रयतान्प्रयतो मन्येत १३

▼

## ⑤

>
▼ Bühler

13. (If he is seated in company with) other unclean persons on a seat consisting of a confused heap of straw, and does not touch them, he may consider himself pure.

▼ हरदत्त-टीका

## सूत्रम्⑥

मूढस्वस्तरे चासंस्पृशन्नन्यानप्रयतान्प्रयतो मन्येत ॥ १३ ॥

## टिप्पनी⑥

22पतितचण्डाल सूतिकाद्येकाशनस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचेलमिति गौतम । 23तस्मिन्विषय इदमुच्यते आसनतया शयनतया वा सुष्ठ्वास्तीर्णः पलालादिसङ्घातः स्वस्तरः । पृषोदरादिषु दर्शनाद्रूपसिद्धिः । यत्रातिश्लक्ष्णतया पलालादेर्मूलाग्रविभागो न ज्ञायते स मृढः । मूढश्चासौ स्वस्तरश्च मूढस्वस्तर तस्मिन् पतितादिष्वप्रयतेष्वासीनेषु यः कश्चित्प्रयत उपविशेत् न च तान् संस्पृशेत् । तदा स प्रयतो मन्येत । यथा प्रयतमात्मानं मन्यते प्रयतोऽस्मीति तथैव मन्येत । नैवंविधे विषये तत्पृष्टिन्यायः प्रवर्तते इति ॥ १३ ॥

#### 14 तथा तृणकाष्ठेषु निखातेषु

तथा तृणकाष्ठेषु निखातेषु १४

▼

## ⑤

>
▼ Bühler

14. (The same rule applies, if he is seated) on grass or wood fixed in the ground. 24

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा तृणकाष्ठेषु निखातेषु ॥ १४ ॥

## टिप्पनी⑥

तृणकाष्ठेष्वपि भूमौ निखातेषु तत्स्पृष्टिन्यायो न भवति ॥१४॥

#### 15 प्रोक्ष्य वास उपयोजयेत्

प्रोक्ष्य वास उपयोजयेत् १५

▼

## ⑤

>
▼ Bühler

15. He shall put on a dress, (even if it is clean,) only after having sprinkled it with water. 25

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रोक्ष्य वास उपयोजयेत् ॥ १५ ॥

## टिप्पनी⑥

शुद्धमपि वास प्रोक्ष्यैवोपयोजयेत् वसीत । अपर आह-अशुद्धस्यापि वाससः प्रोक्षणमेव शुद्धिहेतुरिति ॥ १५ ॥

#### 16 शूनोपहतः सचेलो ऽवगाहेत

- शूनोपहतः सचेलो ऽवगाहेत १६

▼

## ⑤

>
▼ Bühler

16. If he has been touched by a dog, he shall bathe, with his clothes on;

▼ हरदत्त-टीका

## सूत्रम्⑥

शुनोपहतः सचेलोऽवगाहेत ॥ १६ ॥

## टिप्पनी⑥

शुना उपहतः स्पृष्टः । यद्यपि चेलं न शुना स्पृष्ट तथापि सचेलोऽवगाहेत भूमिगतास्वप्सु स्नायात् नोद्धृतादिभिः । दष्टस्य तु स्मृत्यन्तरे प्रायश्चित्तम् ।
तत्र वसिष्ठः26
ब्राह्मणस्तु शुना दष्टो नदी गत्वा समुद्रगाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति।"
अङ्गिराः—
27 ब्रह्मचारी शुना दष्टस्त्रिरात्रेणैव शुद्यति । गृहस्थस्तु द्विरात्रेण ह्येकाहेनाऽग्निहोत्रवान् ॥ नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् ।
तदेव त्रिगुणं वक्त्रे मूर्ध्नि चेत्स्याच्चतुर्गुणम् ॥
क्षत्रविट्छूद्रयोनिस्तु स्नानेनैव शुचिर्भवेत् । द्विगुणं तु वनस्थस्य तथा प्रव्रजितस्य च ॥
ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
यदा न दृश्यते सोमः प्रायश्चित्तं तदा कथम् ।
यां दिशं तु गतस्सामस्तां दिशं त्ववलोकयेत् ॥
सोममार्गेण सा पूता पञ्चगव्येन शुद्धति ॥ इति ॥ १६ ॥

#### 17 प्रक्षाल्य वा तन्

प्रक्षाल्य वा तं देशम् अग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्रयतो भवति १७

▼

## ⑤

>
▼ Bühler

17. Or he becomes pure, after having washed that part (of his body) and having touched it with fire and again washed it, as well as his feet, and having sipped water. 28

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रक्षाल्य वा तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाऽऽचम्य प्रयतो भवति ॥ १७ ॥

## टिप्पनी⑥

शुना स्पृष्टं प्रदेशं प्रक्षाल्याग्निना च संस्पृश्य पुनश्च प्रक्षाल्य पादौ च प्रक्षाल्य पश्चादाचम्य प्रयतो भवति । व्यवस्थितविकल्पोऽयम् ॥
29ऊर्ध्व नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानविधिः प्रोक्तो ह्यधः प्रक्षालनं स्मृतम् ॥'
इति मानवे दर्शनात् ॥ १७ ॥

#### 18 अग्निन् नाप्रयत आसीदेत्

अग्निं नाप्रयत आसीदेत् १८

▼

## ⑤

>
▼ Bühler

18. Unpurified, he shall not approach fire, (so near that he can feel the heat). 30

▼ हरदत्त-टीका

## सूत्रम्⑥

अग्निं नाप्रयत आसीदेत् ॥ १८ ॥

## टिप्पनी⑥

अप्रयतस्सन्नग्निं नासीदेत् अग्नेरासन्नो न भवेत् , यावति देशे ऊष्मोपलम्भः । तत्राप्यशक्तौ न दोषः ॥ १८ ॥

#### 19 इषुमात्रादित्येके

इषुमात्रादित्येके १९

▼

### ⑤

>
▼ Bühler

19. Some declare, that (he shall not approach nearer) than the length of an arrow.

▼ हरदत्त-टीका

## सूत्रम्⑥

इषुमात्रादित्येके ॥ १९ ॥

## टिप्पनी⑥

इषुमात्रादर्वाङ्नासीदेत् । ऊष्मोपलम्भो भवतु वा मा भूदित्येके मन्यन्ते ॥ १९ ॥

#### 20 न चैनमुपधमेत्

न चैनमुपधमेत् २०

▼

### ⑤

>
▼ Bühler

20. Nor shall he blow on fire with his breath. 31

▼ हरदत्त-टीका

## सूत्रम्⑥

न चैनमुपधमेत् ॥ २० ॥

## टिप्पनी⑥

अप्रयत इत्येव । एनमग्निमप्रयतो नोपधमेत् । प्रयतस्य न दोषः।
'मुखेनोपधमेदग्निं मुखाग्निरजायत ।'
इति स्मृत्यन्तरे दर्शनात् ।
32 'नाग्निं मुखेनोपधमे'दिति मानवे दर्शनादुभयोर्विकल्पः। अपर आह- वाजसनेये श्रौतप्रकरणे 'मुखाद्ध्यग्निरजायत ।

तस्मान्मुखेनोपसमिन्ध्या'दिति दर्शनात् श्रौतेषु मुखेनोपसमिन्धनम् , अन्यत्र स्मार्ते प्रतिषेध इति।
अन्ये तु वैणवेनायसेन वा सुषिरेणोपसमिन्धनमिच्छन्ति । एवं हि मुखव्यापारस्यान्वयाच्छ्रुतिरप्यनुगृहीता भवति, आस्यबिन्दूनां पतनशङ्काभयात् प्रतिषेधस्मृतिरपीति ॥ २०॥

#### 21 खट्वायाञ् च नोपदध्यात्

खट्वायां च नोपदध्यात् २१

▼

## ⑤

>
▼ Bühler

21. Nor shall he place fire under his bedstead. 33

▼ हरदत्त-टीका

## सूत्रम्⑥

खट्वायां च नोपदध्यात् ॥ २१ ॥

## टिप्पनी⑥

खट्वायां खट्वाया अधोऽग्निं नोपध्यात् । अत्राप्यशक्तौ न दोषः ॥२१॥

#### 22 प्रभूतैधोदके ग्रामे यत्रात्माधीनम्

प्रभूतैधोदके ग्रामे यत्रात्माधीनं प्रयमणं तत्र वासो धार्म्यो ब्राह्मणस्य २२

▼

## ⑤

>
▼ Bühler

22. It is lawful for a Brāhmaṇa to dwell in a village, where there is plenty of fuel and water, (and) where he may perform the rites of purification by himself. 34

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रभूतैधोदके ग्राम यत्राऽऽत्माधीनं प्रयमणं तत्र वासो धार्म्यो ब्राह्मणस्य ॥ २१॥

## टिप्पनी⑥

प्रभूतं एधः उदकं च यस्मिन् ग्रामे तत्र वासो धार्म्यः धर्म्यः । अत्रापि न सर्वत्र । किं तर्हि ? यत्रात्माधीन प्रयमणं प्रायत्यं मूत्रपुरीषप्रक्षालनादीनि यत्रात्माधीनानि तत्र । यत्र तु कूपेष्वेवोदकं तत्र बहुकूपेऽपि न वस्तव्यम् । ब्राह्मणग्रहणाद्वर्णान्तरस्य न दोषः । ग्रामग्रहणादेवंभूतेषु घोषादिश्वपि न वस्तव्यम् ॥ २२ ॥

#### 23 मूत्रङ् कृत्वा पुरीषं

- मूत्रं कृत्वा पुरीषं वा मूत्रपुरीष-लेपान् अन्नलेपान् उच्छिष्टलेपान् रेतसश् च ये लेपास्, तान् प्रक्षाल्य पादौ च, +आचम्य प्रयतो भवति २३

▼

## ⑤

>
▼ Bühler

23. When he has washed away the stains of urine and fæces after voiding urine or fæces, the stains of food (after dinner), the stains of the food eaten the day before (from his vessels), and the stains of semen, and has also washed his feet and afterwards has sipped water, he becomes pure. 35

▼ हरदत्त-टीका

## सूत्रम्⑥

मूत्रं कृत्वा पुरीषं वा मूत्रपुरीषलेपानन्नलेपानुच्छिष्टलेपान् रेतसश्च ये लेपास्तान्प्रक्षाल्य पादौ चाऽऽचम्य प्रयतो भवति ॥ २३ ॥

## टिप्पनी⑥

मूत्रं पुरीष वा कृवा उत्सृज्य तयोर्मुत्रपुरीषयोर्ये लेपास्तस्मिन्प्रदेशे स्थिताः प्रदेशान्तरे वा पतिताः तान् सर्वान् । 36अन्नलेपांश्चानुच्छिष्टानपि उच्छिष्टलेपांश्चानन्नलेपानपि । तथा रेतसश्च ये लेपाः स्वप्नादौ मैथुने वा तान् सर्वानद्भिर्मृदा च प्रक्षाल्य पादौ च लेपवर्जितावपि प्रक्षाल्य पश्चादाचम्य प्रयतो भवति । अत्र मृत्प्रमाणस्य सङ्ख्यायाश्चानुक्तत्वात् यावता गन्धलेपक्षयो भवति तावदेव विवक्षितम् । तथा च याज्ञवल्क्यः—
37गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः।' इति ।
देवलस्तु व्यक्तमाह—
38 यावत्स शुद्धिं मन्येत तावच्छौचं समाचरेत् ।
प्रमाणं शौचसङ्ख्याया न शिष्टैरुपदिश्यते ॥' इति ।
पैठीनसि -
'मुत्रोच्चारे कृते शौचं न स्यादन्तर्जलाशये।
अन्यत्रोद्धृत्य कुर्यात्तु सर्वदैव समाहितः।' इति ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ पञ्चदशी कण्डिका ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

6. आप० ध० १.३०.८.↩

7. मनु० स्मृ० २.६↩

8. गौ० ध० १. १, २↩

9. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. Manu II, 35.↩

12. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

13. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

14. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

15. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

16. आप० ध० १.३०.८.↩

17. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

18. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

19. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

20. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

21. Manu II, 69; Yājñ. I, 15.↩

22. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

23. आप० ध० १.३०.८.↩

24. Manu II, 144.↩

25. Manu II, 146-148.↩

26. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

27. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

28. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

29. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

30. Manu II, 147.↩

31. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

32. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

33. Manu II, 37.↩

34. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

35. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

36. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

37. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

38. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

# १६①

## 01 तिष्ठन्न+आचामेत्प्रह्वो वा④

तिष्ठन्न+आचामेत्प्रह्वो वा १

▼

### ⑤

>
▼ Bühler

1. He shall not drink water standing or bent forwards. 1

▼ हरदत्त-टीका

### सूत्रम्⑥

तिष्ठन्नाऽऽचामेत् प्रह्वो वा ॥१॥

### टप्पनी⑥

तिष्ठन् प्रह्वो वा नाचामेत् । नायं प्रतिषेधः शक्यो वक्तुम् । कथम् ? 'आसीनस्त्रिराचामे'(१६२.)दिति वक्ष्यति । ततश्च यथा शयानस्याचमनं न भवति तथा तिष्ठतः प्रह्वस्य च न भवति । एवं तर्हि शौचार्थस्याचमनस्य नायं प्रतिषेधः । किं तर्हि ? पानीयपानस्य प्रतिषेधः । तथा गौतमः 2 नाञ्जलिना जलं पिबेत् । न तिष्ठ'न्निति । अपर आह-अस्मादेव प्रतिषेधात्क्वचित्तिष्ठतः प्रह्वस्य चाऽऽचमनमभ्यनुज्ञातं भवति । तेन 'भूमिगतास्वप्स्वि'त्यत्र तीरस्याऽयोग्यत्वे ऊरुदध्ने 3जानुदध्ने वा जले स्थितस्याऽचमनं भवति । गौतमीयेऽपि4 न तिष्ठन्नुद्धृतोदकेनाचामे'दिति सूत्रच्छेदादुद्धृतोदकेनैव तिष्ठतः प्रतिषेध इति ॥ १ ॥

#### 02 आसीनस्त्रिराचामेद्धृदयङ्गमाभिरद्भिः

आसीनस्त्रिराचामेद्धृदयङ्गमाभिरद्भिः २

▼

### ⑤

>
▼ Bühler

2. Sitting he shall sip water (for purification) thrice, the water penetrating to his heart. 5

▼ हरदत्त-टीका

### सूत्रम्⑥

आसीनस्त्रिराचामेद्धृदयङ्गमाभिरद्भिः ॥ २ ॥

## टिप्पनी⑥

अद्भिः तृतीया द्वितीयार्थे । अत्राऽनुक्तं स्मृत्यन्तरवशा6दुपस्क्रियते। आसीनः शुचौ देशे, नासने, भोजनान्ते त्वासने । दक्षिणं बाहु7 जान्वन्तरे कृत्वा प्राङ्मुख उपविष्टः उदङ्मुखो वा हृदयङ्गमा8 अप करतलस्थासु यावतीषु माषो निमज्जति तावती फेनबुद्बुदरहिताः वीक्षितास्त्रिराचामेत् पिबेत् , ब्राह्मणः हृदयङ्गमाः, क्षत्रियः कण्ठगताः, वैश्यस्तालुगताः, शूद्रो जिह्वास्पृष्टास्सकृत् ॥ २॥

#### 03 त्रिरोष्ठौ परिमृजेत्

त्रिरोष्ठौ परिमृजेत् ३

▼

## ⑤

>
▼ Bühler

3. He shall wipe his lips three times.

▼ हरदत्त-टीका

## सूत्रम्⑥

9त्रिरोष्ठौ परिमृजेत् ॥३॥

## टिप्पनी⑥

परिमृज्यात् ॥३॥

#### 04 द्विरित्येके

द्विरित्येके ४

▼

## ⑤

>
▼ Bühler

4. Some (declare, that he shall do so) twice.

▼ हरदत्त-टीका

## सूत्रम्⑥

द्विरित्येके ॥४॥

## टिप्पनी⑥

तुल्यविकल्पः ॥ ४ ॥

#### 05 सकृदुपस्पृशेत्

सकृदुपस्पृशेत् ५

▼

## ⑤

>
▼ Bühler

5. He shall then touch (his lips) once (with the three middle fingers).

▼ हरदत्त-टीका

## सूत्रम्⑥

सकृदुपस्पृशेत् ॥ ५ ॥

## टिप्पनी⑥

मध्यमाभिस्तिसृभिरङ्गुलीभिरोष्ठौ ॥ ५ ॥

#### 06 द्विरित्येके

द्विरित्येके ६

▼

## ⑤

>
▼ Bühler

6. Some (declare, that he shall do so) twice.

▼ हरदत्त-टीका

## सूत्रम्⑥

द्विरित्येके ॥ ६ ॥

## टिप्पनी⑥

तुल्यविकल्पः ॥६॥

#### 07 दक्षिणेन पाणिना सव्यम्

दक्षिणेन पाणिना सव्यं प्रोक्ष्य, पादौ शिरश्चेन्द्रियाण्युपस्पृशेच् चक्षुषी नासिके श्रोत्रे च ७

▼

## ⑤

>
▼ Bühler

7. Having sprinkled water on his left hand with his right, he shall touch both his feet, and his head and (the following three) organs, the eyes, the nose, and the ears. 10

▼ हरदत्त-टीका

## सूत्रम्⑥

दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशेत् चक्षुषी नासिके श्रोत्रे च ॥७॥

## टिप्पनी⑥

दक्षिणेन पाणिना सव्यं पाणिं प्रोक्ष्य तथा पादौ शिरश्च, इन्द्रियाण्युपस्पृशेत् अङ्गुलीभिः । सर्वेषामिन्द्रियाणां प्रसङ्गे परिसञ्चष्टे-चक्षुषी नासिके श्रोत्रे चे'ति । इन्द्रियाणीति वचनं स्वरूपकथनमात्रम् । तत्राऽङ्गुष्ठानामिकाभ्यां चक्षुषी । केचिद्युगपत् , केचित्पृथक् । अङ्गुष्ठप्रदेशिनीभ्यां नासिके । अङ्गुष्ठकनिष्ठिकाभ्यां श्रोत्रे । 11अत्र सहभावस्याऽशक्यत्वात् पृथग्भावस्य निश्चितत्वात् पूर्वत्रापि पृथगेवेति युक्तम् ॥ ७ ॥

#### 08 अथाप उपस्पृशेत्

अथाप उपस्पृशेत् ८

▼

## ⑤

>
▼ Bühler

8. Then he shall wash (his hands).

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाऽप उपस्पृशेत् ॥ ८॥

## टिप्पनी⑥

इन्द्रियस्पर्शनान तरं हस्तौ प्रक्षालयेत् ॥ ८॥

#### 09 भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद्द्विः

भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद्द्विः परिमृजेत्सकृदुपस्पृशेत् ९

▼

## ⑤

>

▼ Bühler

9. But if he is going to eat he shall, though pure, twice sip water, twice wipe (his mouth), and once touch (his lips). 12

▼ हरदत्त-टीका

## सूत्रम्⑥

भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेद्द्विः परिमृजेत्सकृदुपस्पृशेत् ॥९॥

## टिप्पनी⑥

भोजनं करिष्यन् प्रयतोऽपि द्विराचमनं कुर्यात् । अत्र विशेषः-द्विः परिमृजेत् , न विकल्पेन त्रिः। सकृदुपस्पृशेत् , न विकल्पेन द्विः । 'प्रयतोऽपी'ति वचनादप्रायत्ये सर्वत्र द्विराचमनमाचार्यस्याऽभिप्रेतम् ।
तत्र स्मृत्यन्तरम्—
'भुक्त्वा क्षुत्त्वा च सुप्त्वा च ष्ठीवित्वोक्त्वाऽनृतं वचः।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥ ९ ॥

#### 10 श्यावान्तपर्यन्ताव् ओष्ठाव् उपस्पृश्याचामेत्

श्यावान्तपर्यन्ताव् ओष्ठाव् उपस्पृश्याचामेत् १०

▼

⑤

>
▼ Bühler

10. He shall rub the gums and the inner part of his lips (with his finger or with a piece of wood) and then sip water.

▼ हरदत्त-टीका

## सूत्रम्⑥

श्यावान्तपर्यन्तावोष्ठावुपस्पृश्याऽऽचामेत् ॥ १०॥

## टिप्पनी⑥

दन्तमूलात्प्रभृत्योष्ठौ । तत्राऽलोमकः प्रदेशः श्यावः। तस्यान्तः सलोमकः। तत्पर्यन्तावोष्ठावुपस्पृश्याऽऽचामेत् । ओष्ठयोरलोमकप्रदेशमङ्गुल्या13 काष्ठादिना वोपस्पृश्याऽऽचामेदिति ॥ १० ॥

#### 11 न श्मश्रुभिर् उच्छिष्टो

- न श्मश्रुभिर् उच्छिष्टो भवत्य् अन्तरास्ये सद्भिर् यावन् न हस्तेनोपस्पृशति ११

▼

⑤

>
▼ Bühler

11. He does not become impure by the hair (of his moustaches) getting into his mouth, as long as he does not touch them with his hand. 14

▼ हरदत्त-टीका

## सूत्रम्⑥

न श्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये सद्भिर्यावन्न हस्तेनोपस्पृशति ॥ ११ ॥

## टिप्पनी⑥

श्मश्रूणि यदा आस्यस्यान्तर्भवन्ति तदा तैरन्तरास्ये सद्भिरुच्छिष्टो न भवति यावन्न हस्तेनोपस्पृशति । 15उपस्पर्शने तूच्छिष्टो भवति । ततश्चाऽऽचामेदिति । अस्मादेव प्रतिषेधात् ज्ञायते-यत्किञ्चिदपि द्रव्यमन्तरास्ये 16सदुच्छिष्टताया निमित्तमिति ॥ ११ ॥

#### 12 य आस्याद्बिन्दवः पतन्त

- य आस्याद्बिन्दवः पतन्त उपलभ्यन्ते तेष्वाचमनं विहितम् १२

▼

## ⑤

>
▼ Bühler

12. If (in talking), drops (of saliva) are perceived to fall from his mouth, then he shall sip water. 17

▼ हरदत्त-टीका

## सूत्रम्⑥

य आस्याद्बिन्दवः पतन्त उपलभ्यन्ते तेष्वाचमनं विहितम् ॥ १२ ॥

## टिप्पनी⑥

भाषमाणस्याऽऽस्यात् पतन्तो ये लालाबिन्दव उपलभ्यन्ते चक्षुषा स्पर्शनाद्वा उपलव्धुं योग्यास्तेष्वाचमनं विहितम् । वेदोच्चारणे तु गौतमः 18 मन्त्रबाह्मणमुच्चारयतो ये बिन्दवः शरीरे उपलभ्यन्ते न तेष्वाचमनमिति ॥ १२॥

#### 13 ये भूमौ न

ये भूमौ न तेष्वाचामेदित्येके १३

▼

## ⑤

>
▼ Bühler

13. Some declare, that if (the saliva falls) on the ground, he need not sip water.

▼ हरदत्त-टीका

## सूत्रम्⑥

ये भूमौ न तेष्वाचामेदित्येके ॥ १३ ॥

## टिप्पनी⑥

ये बिन्दवो भूमौ पतन्ति, न शरीरे, तेषु नाचामेदित्येके मन्यन्ते । स्वमते तु तेष्वप्याचामेदिति ॥ १३ ॥

#### 14 स्वप्ने क्षवथौ शृङ्खाणिकाऽऽश्र्व्‌आलम्भे,

- स्वप्ने क्षवथौ शृङ्खाणिका*(=नासामलम्)*-ऽऽश्र्व्‌-आलम्भे, लोहितस्य केशानाम्, अग्नेर्, गवां, ब्राह्मणस्य, स्त्रियाश् चालम्भे, महापथं च गत्वाऽमेध्यं चोपस्पृश्याप्रयतं च मनुष्यं, नीवीं च परिधाय +अप उपस्पृशेत् १४

▼

⑤

>
▼ Bühler

14. On touching during sleep or in sternutation the effluvia of the nose or of the eyes, on touching blood, hair, fire, kine, a Brāhmaṇa, or a woman, and after having walked on the high road, and after having touched an (thing or man), and after having put on his lower garment, he shall either bathe or sip or merely touch water (until he considers himself clean). 19

▼ हरदत्त-टीका

## सूत्रम्⑥

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
7. Manu II, 35.↩
8. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
9. आप० ध० १.३०.८.↩
10. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
11. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
13. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
14. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
15. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
16. Manu II, 69; Yājñ. I, 15.↩

17. Manu II, 144.↩

18. Manu II, 146-148.↩

19. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

20. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

21. Manu II, 147.↩

22. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

23. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

24. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

25. Manu II, 37.↩

26. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

27. आप० ध० १.३०.८.↩

28. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

29. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

30. The meaning is, he shall keep all the restrictions imposed upon a student, as chastity, &c, but that he shall not perform the fire-worship or service to a teacher, nor study. Manu II, 39; XI. 192, Yājñ. I, 38; Weber, Ind. Stud. X, 101.↩

31. 'If he is strong, he shall bathe three times a day--morning, midday, and evening.'--Haradatta.↩

32. Brahman, apparently, here means 'Veda,' and those who neglect its study may be called metaphorically 'slayers of the Veda.'↩

33. Manu II, 40; Āśv. Gṛ. Sū. I, 19, 8, 9; Weber, Ind. Stud. X, 21.↩

34. Compare above, I, 1, 1, 28.↩

35. 'Because in this Sūtra the expression "food not given at a Śrāddha" occurs, some think that the preceding Sūtra refers to "food eaten at a Śrāddha."'--Haradatta. This explanation is not at all improbable.↩

36. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

37. Yājñ. I, 172.↩

# १९①

## 02 मत्त उन्मत्तो बद्धो④

मत्त उन्मत्तो बद्धो ऽणिकः*(=पुत्राच् छ्रुतग्राही)* प्रत्युपविष्टो*(?)* यश्च प्रत्युपवेशयते तावन्तं कालम् १ ...

▼

## ⑤

>
▼ Bühler

1. A drunkard, a madman, a prisoner, he who learns the Veda from his son, a creditor who sits with his debtor (hindering the fulfilment of his duties), a debtor who thus sits (with his creditor, are persons whose food must not be eaten) as long as they are thus engaged or in that state. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

मत्त उन्मत्तो बद्धोऽणिकः प्रत्युपविष्टो यश्च प्रत्युपवेशयते तावन्तं कालम् ॥ १ ॥

## टिप्पनी⑥

मदकरद्रव्यसेवया 2विकृतिं गतो मत्तः । उन्मत्तो मान्तः । बद्धो निगलितः। अणिकः पुत्रात् श्रुतग्राही, पुत्राचार्य इति शास्त्रेषु निन्दितः। प्रत्युपविष्टः ऋणादिना कारणेनाऽधमर्णादिकं निरुध्य तत्पार्श्व उपविष्टः । प्रत्युपेवशयिता त्वितरः, तस्य परिहारमकुर्वंस्तेन सह कामं सुचिरमास्यतामित्यासीनः । ता एते मत्तादयस्तावन्तं कालमभोज्यान्नाः, यावन्मदाद्यनुवृत्तिः । अपर आह- अणिकः ऋणस्य दाता प्रत्युपवेष्टुरिदं विशेषणमिति ॥ १॥

#### 02 क आश्यान्नः

क अश्यान्नः २

▼

## ⑤

>
▼ Bühler

2. Who (then) are those whose food may be eaten? 3

▼ हरदत्त-टीका

## सूत्रम्⑥

क आश्यान्नः ॥ २॥

## टिप्पनी⑥

यद्येते अभाज्यान्नोः कस्तहि आश्यान्नः ? कस्य तर्ह्यन्नमशनीयमिति । यद्यप्येते अभोज्यान्ना इत्युक्ते परिशिष्टा भोज्यान्ना इति गम्यते । तथाप्यनेकमतोपन्यासार्थं प्रश्नपूर्वक आरम्भः ॥ २ ॥

#### 03 य ईप्सेद् इति

य ईप्सेद्*(=प्रार्थ्यते [भोक्तव्यमिति, तस्यान्न])* इति कण्वः ३

▼

## ⑤

>
▼ Bühler

> 3. Kaṇva declares, that it is he who wishes to give.

▼ हरदत्त-टीका

## सूत्रम्⑥

य ईप्सेदिति कण्वः ॥ ३ ॥

## टिप्पनी⑥

य एव प्रार्थयते स एवाऽऽश्यान्न इति कण्वऋषिर्मन्यते 4प्रतिषिद्धवर्जम् ॥ ३ ॥

#### 04 पुण्य इति कौत्सः

पुण्य *(अन्न)* इति कौत्सः ४

▼

## ⑤

>
▼ Bühler

> 4. Kautsa declares, that it is he who is holy. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

पुण्य इति कौत्सः ॥ ४ ॥

## टिप्पनी⑥

सर्ववर्णानां स्वधर्मे वर्तमानाना'(१८.१३.)मित्युक्तत्वात् भोज्यान्नास्सर्वे पुण्या एव । इह पुनः पुण्यग्रहणमतिशयार्थम् । तपोहोमजप्यैः क्ष्वधर्मेण च युक्तः पुण्यः । स स्वयमप्रार्थयमानोऽपि भोज्यान्न इति कौत्सस्य पक्षः ॥ ४ ॥

#### 06 यः कश्चिद् दद्यादिति

यः कश्चिद् दद्यादिति वार्ष्यायणिः *(आपस्तम्बेनायम् पक्षो निराकरिष्यते ऽग्रे)*[५]

▼

## ⑤

>
▼ Bühler

5. Vārshyāyaṇi declares, that it is every giver (of food).

▼ हरदत्त-टीका

## सूत्रम्⑥

यः कश्चिद्दद्यादिति वार्ष्यायणिः ॥ ५ ॥

## टिप्पनी⑥

यः कश्चित्पुण्योऽपुण्यो वा सततं दानशीलः । स भोज्यान्न इति वार्ष्यायणिराह।
तथा च मनुः—
6श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ।' इति ॥ ५ ॥

#### 06 यदि हि रजः

यदि ह रजः *(=पापम्)* स्थावरं - पुरुषे भोक्तव्यम्, अथ चेच् चलं - दानेन निर्दोषो भवति ६

▼

## ⑤

>
▼ Bühler

6. For if guilt remains fixed on the man (who committed a crime, then food given by a sinner) may be eaten (because the guilt cannot leave the sinner). But if guilt can leave (the sinner at any time, then food given by the sinner may be eaten because) he becomes pure by the gift (which he makes).

▼ हरदत्त-टीका

## सूत्रम्⑥

यदि हि रजः स्थावरं पुरुषे भोक्तव्यमथ चेच्चलं दानेन निर्दोषो भवति ॥ ६॥

## प्रस्तावः⑥

अत्रोपपत्तिः —

## टिप्पनी⑥

रजः पापम् । तद्यदि पुरुषे कर्तरि स्थावरं स्थिरं नोपभोगमन्तरेण क्षीयते तदा ततः प्रतिग्रहेऽपि भोक्तरि संक्रमाभावात् भोक्तव्यम् । अथ चेच्चलमुपभोगमन्तरेणाऽपि क्षीयते तदा सततदानशीले न मुहूर्तमपि पापमवतिष्ठत इति कुतो भोक्तुर्दोष इति ॥ ६॥

#### 07 शुद्धा भिक्षा भोक्तव्या

शुद्धा भिक्षा भोक्तव्या *(इति)* एककुणिकौ काण्वकुत्सौ तथा पुष्करसादिः ७

▼

## ⑤

>

▼ Bühler

7. Offered food, which is pure, may be eaten, according to Eka, Kuṇika, Kāṇva, Kutsa, and Pushkarasādi.

▼ हरदत्त-टीका

## सूत्रम्⑥

शुद्धा भिक्षा भोक्तव्यैककुणिकौ काण्वकुत्सौ तथा पुष्करसादिः ॥ ७ ॥

## टिप्पनी⑥

धार्मिकेणोद्यता आहृता भिक्षा शुद्धा । सा भोज्येत्येकादीनां पञ्चानां पक्षः । पुष्करसादिः7 पौष्करसादिः । आदिवृद्ध्यभावश्छान्दसः ॥७॥

#### 08 सर्वतोपेतं वार्ष्यायणीयम् ८

सर्वतोपेतं *(=अप्रार्थ्य लब्धम् भोज्यमिति)* वार्ष्यायणीयम् *(मतम् - आपस्तम्बो निराकरिष्यत्यग्रे)*८

▼

### ⑤

>
▼ Bühler

8. Vārshyāyaṇi's opinion is, that (food) given unasked (may be accepted) from anybody.

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वतोपेतं वार्ष्यायणीयम् ॥ ८॥

## टिप्पनी⑥

सर्वत उपेतं सर्वतोपेतम् । छान्दसो गुणः । उपेतमयाचितोषपन्नम् । तत्सर्वतोऽपि भोज्यमिति वार्ष्यायणीयं मतम् ॥ ८॥

#### 09 पुण्यस्येप्सतो

पुण्यस्येप्सतो *(ऽन्नस्य)* भोक्तव्यम् *(इत्यापस्तम्बनिश्चयः)* ९

▼

### ⑤

>
▼ Bühler

9. (Food offered) willingly by a holy man may be eaten.

▼ हरदत्त-टीका

## सूत्रम्⑥

पुण्यस्येप्सतो भोक्तव्यम् ॥ ९ ॥

## प्रस्तावः⑥

इदानीं स्वमतमाह—

## टिप्पनी⑥

कण्वकुत्सयोः पक्षौ समुच्चितावाचार्यस्य पक्षः8 ॥९॥

#### 10 पुण्यस्याप्य् अनीप्सतो न

पुण्यस्याप्य् *(दातुम्)* अनीप्सतो न भोक्तव्यम् १०

▼

## ⑤

>
▼ Bühler

10. Food given unwillingly by a holy man ought not to be eaten. 9

▼ हरदत्त-टीका

## सूत्रम्⑥

पुण्यस्याऽप्यनीप्सतो न भोक्तव्यम् ॥ १० ॥

## टिप्पनी⑥

यः प्रार्थितोऽपि नेत्यसकदुक्त्वा कथंचिदापादितेप्स10 सोऽनीप्सन्नित्युच्यते, तस्य पुण्यस्याऽप्यभोज्यमिति । अपर आह-अनीप्सत इति कर्तरि षष्ठी । पुण्यस्याप्यन्नं न भोज्यं, यदि भिक्षमाणः पूर्ववैरादिना स्वयमीप्सन्न भवतीति ॥१०॥

#### 11 यतः कुतश्चाभ्युद्यतम् भोक्तव्यम्

यतः कुतश्चाभ्युद्यतं भोक्तव्यम् ११

▼

## ⑤

>
▼ Bühler

11. Food offered unasked by any person whatsoever may be eaten,

▼ हरदत्त-टीका

## सूत्रम्⑥

यतः कुतश्चाऽभ्युद्यतं भोक्तव्यम् ॥ ११ ॥

## टिप्पनी⑥

'सर्वतोपेत'(१९८.)मित्युक्तमेव पुनरुच्यते विशेषविवक्षया ॥११॥

#### 12 नाननियोगपूर्वमिति हारीतः

नाननियोगपूर्वमिति हारीतः १२

▼

## ⑤

>

▼ Bühler

12. 'But not if it be given after an express previous announcement;' thus says Hārita.

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽननियोगपूर्वमिति हारीतः ॥ १२ ॥

## प्रस्तावः⑥

तमाह—

## टिप्पनी⑥

'अद्य तुभ्यामिदमाहरिष्यामि तदत्रभवता ग्राह्य'मिति निवेदनं नियोगः । तदभावः अनियोगः । पुनर्नञ्समासः । द्वौ नञौ प्रकृतमर्थं गमयतः । अननियोगो नियोगः तत्पूर्वं चेदभ्युद्यतं न भोज्यमिति ॥ १२ ॥

#### 13 अथ पुराणे श्लोकावुदाहरन्ति

अथ पुराणे श्लोकावुदाहरन्ति । उद्यतामाहृतां भिक्षां पुरस्तादप्रवेदिताम् । भोज्यां मेने प्रजापतिरपि दुष्कृतकारिणः । न तस्य पितरोऽश्नन्ति दश वर्षाणि पञ्च च । न च हव्यं वहत्यग्निर्यस्तामभ्यधिमन्यत इति १३

▼

## ⑤

>

▼ Bühler

13. Now they quote also in a Purāṇa the following two verses: 11

'The Lord of creatures has declared, that food offered unasked and brought by the giver himself, may be eaten, though (the giver be) a sinner, provided the gift has not been announced beforehand. The Manes of the ancestors of that man who spurns such food, do not eat (his oblations) for fifteen years, nor does the fire carry his offerings (to the gods).'

▼ हरदत्त-टीका

## प्रस्तावः⑥

अथ पुराणे श्लोकावुदाहरन्ति—

## सूत्रम्⑥

12उद्यतामाहृतां भिक्षा पुरस्तादप्रवेदिताम् ।
भोज्यां मेने प्रजापतिरपि दुष्कृतकारिणः ॥
न तस्य पितरोऽश्नन्ति दश वर्षाणि पञ्च च ।
न च हव्यं वहत्यग्निर्यस्तामभ्यधिमन्यते ॥ इति ॥ १३ ॥

नाद्यतनभविष्यत्पुराणीयमिदं वचनम् । Cf मनु ४. २५१, २५२.

अथ अपि च पुराणे—
13सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥'
इत्येवलक्षणे भविष्यदादौ । उद्यतां हस्ताभ्यामुद्यम्य धारिताम् । आहृतां स्वयमानीताम् । पूर्वमनिवेदितां भिक्षाम् । दुष्कृतकारिणोऽपि सकाशात् भोज्या मेने प्रजापतिर्मनुः, मनुः प्रजापतिरस्मीति14दर्शनात् । यस्तु तामभ्यधिमन्यते प्रत्याचष्टे तस्य पितरः कव्य नाश्नन्ति । कियन्तं कालम् ? दश वर्षाणि पञ्च च । अग्निश्च हव्यं न वहति । तावन्तमेव कालमिति प्रत्याख्यातुर्निन्दार्थवादः ॥ १३ ॥

मनु प्रजापतिर्यस्मिन्निति दक्षे दर्शनात्, इति क. पु. प्रजापतिर्यस्मिन्निति मानवे दर्शनात्' इति ख. पु.

#### 14 चिकित्सकस्य मृगयोः शल्यकृन्तस्य

चिकित्सकस्य मृगयोः शल्यकृन्तस्य पाशिनः । कुलटायाः षण्ढकस्य च तेषामन्नमनाद्यम् १४

▼

## ⑤

>
▼ Bühler

14. (Another verse from a Purāṇa declares): 'The food given by a physician, a hunter, a surgeon, a fowler, an unfaithful wife, or a eunuch must not be eaten.' 15

▼ हरदत्त-टीका

## सूत्रम्⑥

16चिकित्सकस्य मृगयोश्शल्यकृन्तस्य पाशिनः ।
कुलटायाष्षण्डकस्य च तेषामन्नमनायम् ॥१४॥

## टिप्पनी⑥

चिकित्सको भिषक् । मृगयुर्मृगघाती लुब्धकः । शल्यकृन्तः शस्त्रेण ग्रन्थ्यादीनां छेत्ता अम्बष्ठः । पाशी पाशवान् पाशजालेन मृगादीनां ग्राहकः। कुलात्कुलमटतीति कुलटा व्यभिचारिणी। षण्डकः तृतीयाप्रकृतिः। एतेषां चिकित्सकादीनामन्नमनाद्यम् । चिकित्सकषण्डकयोः पुनर्वचनमुद्यतस्याऽपि प्रतिषेधार्थम् । 17 पूर्वत्र तर्हि ग्रहणं शक्यमकर्तुम् । एवं तर्हि सूत्रकारस्य स प्रतिषेधः । अयं तु पुराणश्लोके प्रतिषेध इत्यपौनरुक्त्यम् ॥ १४ ॥

#### 15 अथाप्युदाहरन्ति अन्नादे भ्रूणहा

अथाप्युदाहरन्ति । अन्नादे भ्रूणहा मार्ष्टि अनेना अभिशंसति । स्तेनः प्रमुक्तो राजनि याचन्ननृतसङ्कर इति १५

▼

## ⑤

>
▼ Bühler

15. Now (in confirmation of this) they quote (the following verse): 'The murderer of a Brāhmaṇa learned in the Veda heaps his guilt on his guest, an innocent man on his calumniator, a thief set at liberty on the king, and the petitioner on him who makes false promises.' 18

▼ हरदत्त-टीका

## सूत्रम्⑥

अन्नादे भ्रूणहा मार्ष्टि अनेना अभिशंसति ।
स्तेनः प्रमुक्तो राजनि याचन्ननृतसङ्करे ॥ इति ॥१५॥

## प्रस्तावः⑥

अथाऽप्युदाहरन्ति—

## टिप्पनी⑥

षडङ्गस्य वेदस्याऽध्येता भ्रूणः । तं यो हतवान् स भ्रूणहा । सोऽन्नादे मार्ष्टि लिम्पति । किम् ? प्रकरणादेन इति गम्यते । भ्रूणघ्नो योऽन्नमत्ति तस्मिंस्तदेन' संक्रामति । तस्मात्तस्योद्यतमप्यभोज्यमिति प्रकरणसङ्गतः पादः । इतरत् पुराणश्लोके पठ्यमाने पठितम् । अनेनसं योऽभिशंसति मिथ्यैव ब्रूते- इदं त्वया कृतमिति । स तस्मिन्नभिशंसति तदेनो मार्ष्टि। मनुस्तु—

19पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः।
वचनात्तुल्यदोषस्स्यान्मिथ्या द्विर्दोषभाग्भवेत् ॥
इति द्वैगुण्यमाह । तदभ्यासे द्रष्टव्यम् । स्तेनः प्रकीर्णकेश' (२५४.) इति वक्ष्यति । स एव तृतीयस्य पादस्याऽर्थः । कर्तृभेदादपौनरुक्त्यम् । सङ्करः प्रतिज्ञा प्रतिश्रवः । सत्यसङ्गर इति यथा । यः प्रतिश्रुत्य न ददाति सोऽनृतसङ्कर इति । ककारस्तु छान्दसः । तस्मिन् याचकः स्वयमेनो मार्ष्टि। तस्मात्प्रतिश्रुतं देयमिति ॥ १५ ॥

॥ इत्यापस्तम्बसूत्रवृत्तावेकोनविंशी कण्डिका ॥ १९ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां प्रथमप्रश्ने षष्ठः पटलः ॥ ६ ॥

इति षष्ठः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

5. Manu II, 35.↩

6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

7. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

11. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

15. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

16. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

17. आप० ध० १.३०.८.↩

18. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason

it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

19. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

**๐๒①**

# २०①

## 01 नेमं लौकिकमर्थम् पुरस्कृत्य④

नेमं लौकिकम्-अर्थं पुरस्कृत्य
धर्मांश् चरेत् १

▼

### ⑤

>
▼ Bühler

1. He shall not fulfil his sacred duties
   merely in order to acquire these worldly objects (as fame, gain, and honour).

▼ हरदत्त-टीका

### सूत्रम्⑥

नेमं लौकिकमर्थं पुरस्कृत्य धमांश्चरेत् ॥१॥

### टिप्पनी⑥

इमं लौकिकं लोके विदितं ख्यातिलाभपूजात्मकम् , अर्थं प्रयोजनम् । पुरस्कृत्य अभिसन्धाय । धर्मान्न चरेत् ॥ १॥

#### 02 निष्फला ह्यभ्युदये भवन्ति

निष्फला ह्य् अभ्युदये भवन्ति २

▼

### ⑤

>
▼ Bühler

2. For when they ought to bring rewards, (duties thus fulfilled) become fruitless.

▼ हरदत्त-टीका

### सूत्रम्⑥

निष्फला ह्यभ्युदये भवन्ति ॥ २ ॥

## प्रस्तावः⑥

किं कारणम्?

## टिप्पनी⑥

हि यस्मादेवं क्रियमाणा धर्मा अभ्युदये फलकाले निष्फला भवन्ति । 1लोकार्थं ह्यसौ धर्मं चरति, न कर्तव्यमिति श्रद्धया । न च श्रद्धया विना धर्मः फलं साधयति । 2 'यो वै श्रद्धामनारभ्येति श्रुतेः॥

लोकभक्त्या इति क. पु.

#### 03 तद्यथाम्रे फलार्थे निर्मिते

तद् यथा ऽऽम्रे फलार्थे निर्मिते
छाया गन्ध इत्य् अनूत्पद्येते,
एवं धर्मं चर्यमाणम् अर्था अनूत्पद्यन्ते ३

▼

## ⑤

>
▼ Bühler

3. (Worldly benefits) are produced as accessories (to the fulfilment of the law), just as in the case of a mango tree, which is planted in order to obtain fruit, shade and fragrance (are accessory advantages).

▼ हरदत्त-टीका

## सूत्रम्⑥

तद्यथाऽऽम्रे फलार्थे3निमित्ते छाया गन्ध इत्यनूत्पद्येते, एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते ॥३॥

## प्रस्तावः⑥

किमत्रेदानीं दृष्टं फलं त्याज्यमेव ? नेत्याह—

## टिप्पनी⑥

तदिति वाक्योपन्यासे । फलार्थं ह्याम्रवृक्षो निर्मीयते आरोप्यते । तस्मिन् फलार्थे4निमित्ते छाया गन्धश्चाऽनूत्पद्येते। एवं धर्मं चर्यमाणमर्थाः ख्यात्यादयोऽनूत्पद्यन्ते अनुनिष्पद्यन्ते । तथैव स्वीकार्या-5। न चोद्देश्यतया। तथा चाह—
'यथेक्षुहेतोः सलिलं प्रसेचयंस्तृणानि वल्लीरपि च प्रसिञ्चति ।
तथा नरो धर्मपथेन वर्तयन् यशश्च कामांश्च वसूनि चाऽश्नुते ॥ इति ॥३॥

#### 04 नो चेदनूत्पद्यन्ते न

नो चेद् अनूत्पद्यन्ते,
न धर्म-हानिर् भवति ४

▼

### ⑤

>
▼ Bühler

4. But if (worldly advantages) are not produced, (then at least) the sacred duties have been fulfilled.

▼ हरदत्त-टीका

## सूत्रम्⑥

नो चेदनूत्पद्यन्ते न धर्महानिर्भवति ॥ ४ ॥

## टिप्पनी⑥

यद्यपि दैवादर्था नाऽनूत्पद्यन्ते तथापि धर्मस्तावद्भवति । स च स्वतन्त्रः पुरुषार्थः । किमन्यैरर्थैरिति ॥ ४ ॥

#### 05 अनसूयुर्दुष्प्रलम्भः स्यात्कुहकशठनास्तिकबालवादेषु

अन्-असूयुर्, दुष्-प्रलम्भः स्यात्
कुहक-शठ-नास्तिक-बाल-वादेषु ५

▼

### ⑤

>
▼ Bühler

5. Let him not become irritated at, nor be deceived by the speeches of hypocrites, of rogues, of infidels, and of fools.

▼ हरदत्त-टीका

## सूत्रम्⑥

अनसूयुर्दुष्प्रलम्भः स्यात्कुहकशठनास्तिकबालवादेषु ॥५॥

## टिप्पनी⑥

**कुहकः** प्रकाशे शुचिर्
एकान्ते यथेष्टचारी ।
**शठः** वक्रचित्तः ।
**नास्तिकः** 6प्रेत्यभावापवादी ।
**बालः** श्रुतरहितः।

एतेषां वादेषु **अनसूयुः** स्यात् ।
असूयया द्वेषो लक्ष्यते ।
द्वेष्टा न स्यात् ।
तान् विषयीकृत्य
द्वेषम् अपि न कुर्यात् ।

तथा **दुष्प्रलम्भश्च** स्यात् ।
**प्रलम्भनं** विलवादनं मिथ्या-फलाख्यानम् । 7
गृधिवञ्च्योः प्रलम्भन इति दर्शनात् । **दुष्प्रलम्भो** विसंवादयितुं
मिथ्याफलाख्यानेन प्रवर्तयितुम् अशक्यः । कुहकादिवादेषु वञ्चितो न स्यात् । तदशो न स्यादित्यर्थः ॥ ५॥

#### 06 न धर्माधर्मौ चरत

न धर्माधर्मौ चरत
"आवं स्व" इति ।
न देव-गन्धर्वा, न पितर *(पुर आगत्य)* इत्य् आचक्षते
"ऽयं धर्मो ऽयम् अधर्म" इति ६

▼

## ⑤

>
▼ Bühler

6. For Virtue and Sin do not go about and say, 'Here we are;' nor do gods, Gandharvas, or Manes say (to men), 'This is virtue, that is sin.'

▼ हरदत्त-टीका

## सूत्रम्⑥

न धर्माधर्मौ चरत'आवं स्व' इति, न देवगन्धर्वा न पितर इत्याचक्षते'ऽयं धर्मोऽयमधर्म, इति ॥ ६ ॥

## प्रस्तावः⑥

वञ्चनस्य सम्भवमाह—

## टिप्पनी⑥

आवमिति छान्दसं रूपम् । भाषायां तु8 प्रथमायाश्च द्विवचने भाषाया'मित्यात्वं प्राप्नोति । यदि हि धर्माधर्मौ विग्रहवन्तौ गोव्याघ्रवच्चरेतामावां स्व इति वाणी, यदि वा देवादयः प्रकृष्टज्ञाना ब्रूयुरिमौ धर्माधर्माविति ततः कुहकादिवादेषु न स्याद्व्यञ्चना । तदभावात्तु वञ्चनासम्भव इति । इदं चात्र द्रष्टव्यम्-प्रत्यक्षादेर्न गोचरौ धर्माधर्मौ। किंतु नित्यनिर्दोषवेदगम्यौ । तदभावे तन्मूलधर्मशास्त्रगम्याविति ॥ ६ ॥

#### 07 यत्त्वार्याः क्रियमाणम् प्रशंसन्ति

यत् त्व् आर्याः
क्रियमाणं प्रशंसन्ति
स धर्मो,
यद् गर्हन्ते
सोऽधर्मः ७

▼

## ⑤

>
▼ Bühler

7. But that is virtue, the practice of which wise men of the three twice-born castes praise; what they blame, is sin. 9

▼ हरदत्त-टीका

## सूत्रम्⑥

यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो, यं गर्हन्ते सोऽधर्मः ॥७॥

## प्रस्तावः⑥

यत्र तु प्रायश्चित्तादौ विषयव्यवस्था दुष्करा तत्र निर्णयमाह—

## टिप्पनी⑥

आर्याः शिष्टास्त्रैवर्णिकाः । बहुवचनाच्चत्वारस्त्रयो वा । यथाऽऽह याज्ञवल्क्यः—

10 चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा ।
सा ब्रूते यं स धर्मस्स्यादेको वाऽध्यात्मवित्तमः ॥' इति ॥७॥

#### 08 सर्व-जन-पदेष्व् एकान्त-समाहितम्

सर्व-जन-पदेष्व् एकान्त-समाहितम्
आर्याणाम् वृत्तं
सम्यग् विनीतानां वृद्धानाम्
आत्मवताम्, अलोलुपानाम्, अदाम्भिकानां वृत्त-सादृश्यं भजेत ८

▼

### ⑤

>
▼ Bühler

8. He shall regulate his course of action according to the conduct which in all countries is unanimously approved by men of the three twice-born castes, who have been properly obedient (to their teachers), who are aged, of subdued senses, neither given to avarice, nor hypocrites. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवत्तामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत ॥८॥

## प्रस्तावः⑥

इदानीं श्रुतिस्मृत्योः प्रत्यक्षयोरदर्शने शिष्टाचारादप्यवगम्य धर्मः कार्य इत्याह—

## टिप्पनी⑥

सम्यग्विनीताः । आचार्याधीनः स्या'(२.१९)दित्यादिना विनयनसम्पन्नाः । वृद्धाः परिणतवयसः। यौवने विषयवश्यताऽपि स्यादितीदमुक्तम् । आत्मवन्तो जितेन्द्रियाः। अलोलुपा अकृपणाः । अदाम्भिका अधर्मध्वजा, एकान्तप्रकाशयोरेकवृत्ताः । एवंभूतानामार्याणां सर्वजनपदेषु यदेकान्तेनाऽव्यभिचारेण समाहितमनुमतं वृत्तमनुष्ठानम् , न मातुलसुतापरिणयनवत्कतिपयविषयम्, तद्वृत्तसादृश्यं भजेत । तदनुरूपं चेष्टेत । न तेषामनुष्ठानं निर्मूलम् । सम्भवति च वैदिकानामुत्सन्नपाठब्राह्मणानुभव इति ॥ ८ ॥

#### 09 एवम् उभौ लोकाव्

एवम् उभौ लोकाव् अभिजयति ९

▼

### ⑤

>
▼ Bühler

9. Acting thus he will gain both worlds.

▼ हरदत्त-टीका

## सूत्रम्⑥

एवमुभौ लोकावभिजयति ॥९॥

## टिप्पनी⑥

एवं श्रुतिस्मृतिसदाचारमूलमनुष्ठानं कुर्वन् उभौ लोकावभिजयति इमं चाऽमुं च ॥ ९ ॥

#### 10 अविहिता ब्राह्मणस्य वणिज्या

अविहिता ब्राह्मणस्य वणिज्या १०

▼

## ⑤

>
▼ Bühler

10. Trade is not lawful for a Brāhmaṇa.

▼ हरदत्त-टीका

## सूत्रम्⑥

अविहिता ब्राह्मणस्य वणिज्या ॥ १० ॥

## टिप्पनी⑥

क्रयविक्रयव्यवहारो वणिज्या । सा स्वयं कृता ब्राह्मणस्य वृत्तिर्न विहिता प्राप्तानुवादोऽ12यमपवादविधानार्थः ॥१०॥

#### 11 आपदि व्यवहरेत पण्यानामपण्यानि

आपदि व्यवहरेत पण्यानाम्
अपण्यानि व्युदस्यन् *(=वर्जयन् [वक्ष्यमाणानि] ...)* ११

▼

## ⑤

>
▼ Bühler

11. In times of distress he may trade in lawful merchandise, avoiding the following (kinds), that are forbidden: 13

▼ हरदत्त-टीका

## सूत्रम्⑥

आपदि व्यवहरेत पण्यानामपण्यानि व्युदस्यन् ॥ ११ ॥

## टिप्पनी⑥

ब्राह्मणवृत्तेरभाव आपत् । तस्यां सत्याम् । पण्यानाम् । 14व्यवहृपणो समर्थयो'रिति कर्मणि षष्ठी । व्यवहरेत । क्रयश्च विक्रयश्च व्यवहारः, पण्यानि क्रीणीयात् विक्रीणीत चेत्यर्थः । अपण्यानि वक्ष्यमाणानि व्युदस्यन् वर्जयन् । कृत्स्नाया वैश्यवृत्तेरुपलक्षणमिदम् । क्षत्रियवृत्तिश्च 15दण्डापूपिकया सिद्धा । तथा च गौतमः-16 तदलाभे क्षत्रियवृत्तिस्तदलाभे वैश्यवृत्ति'रिति ॥ ११॥

#### 12 यान्रसान्रागान्गन्धानन्नञ् चर्म गवां

... मनुष्यान्,
रसान्, रागान्, गन्धान्,
अन्नं,
चर्म, गवां वशां*(=वन्ध्य-गाम्)*
श्लेष्म*(=glue)*+उदके,
तोक्म*(=अङ्कुराणि)*-किण्वे*(=सुरादि)*
पिप्पलि*(=रक्त-मरीच)*-मरीचे
धान्यं, मांसम्,
आयुधं, सुकृताशां च १२*(5)*

▼

## ⑤

>
▼ Bühler

12. (Particularly) men, condiments and liquids, colours, perfumes, food, skins, heifers, substances 17 used for glueing (such as lac), water, young cornstalks, substances from which spirituous liquor may be extracted, red and black pepper, corn, flesh, arms, and the hope of rewards for meritorious deeds.

▼ हरदत्त-टीका

## सूत्रम्⑥

मनुष्यान् रसान् रागान् गन्धानन्नं चर्म गवां वशां श्लेमोदके तोक्मकिण्वे पिप्पलीमरीचे धान्यं मांसमायुधं सुकृताशां च ॥१२॥

## प्रस्तावः⑥

अपण्यान्याह—

## टिप्पनी⑥

मनुष्या दारदासादयः । रसा गुडलवणादयः, क्षीरादयो वा । रागाः कुसुम्भादयः रज्यन्तेऽनेनेति । रज्यन्त इति वा रागा वस्त्रादयः। गन्धाश्चन्दनादयः। **गवां** मध्ये **वशा** वन्ध्या गौः । श्लेष्म जतुवज्रादिः, येन विश्लिष्टं चर्मादि सन्धीयते। 'यथा18 श्लेष्मणा चर्मण्यं वाऽन्यद्वा विश्लिष्टं सश्लेषये'दिति बहवृचब्राह्मणे दर्शनात् । उदकं कुम्भजलम् । **तोक्मं** ईषदङ्कुरितानि व्रीह्यादीनि । **किण्वं** सुराप्रकृतिद्रव्यम् । सुकृत पुण्यं तस्य फलं सुकृताशा । शिष्टानि प्रसिद्धानि । 19

एतान्यपण्यानि वर्जयित्वा अन्येषां पण्यानां व्यवहरेत । मनुष्यादीन्वर्जयित्वेत्येव सिद्धे 'अपण्यानीति वचनमन्येषामप्यपण्यानां व्युदासार्थम् । तत्र मनुः—
20सर्वान् रसानपोहेत कृतान्नं च तिलैस्सह ।
अश्मनो लवणं चैव पशवो ये च मानुषाः ॥
सर्वं च तान्तवं रक्तं शाणझौमाविकानि च।
अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोम गन्धांश्च सर्वशः।
क्षीरं क्षौद्रं दधि घृतं तैलं मधुं गुडं कुशान् ॥ आरण्यांश्च पशून सर्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलीं च लाक्षां च सर्वाश्चैकशफान पशुन् ।' इति ॥ १२ ॥

#### 13 तिलतण्डुलांस्त्वेव धान्यस्य

तिल-तण्डुलांस् त्व् एव धान्यस्य
विशेषेण न विक्रीणीयात् १३

▼

## ⑤

>
▼ Bühler

13. Among (the various kinds of) grain he shall especially not sell sesamum or rice (except he have grown them himself). 21

▼ हरदत्त-टीका

## सूत्रम्⑥

तिलतण्डुलांस्त्वेवं धान्यस्य विशेषेण न विक्रीणीयात् ॥१३॥

## टिप्पनी⑥

धान्यानां मध्ये तिलतण्डुलानेव विशेषतोऽतिशयेन न विक्रीणीयात् न विक्रीणीत । अन्येषां विकल्पः । स्वयमुत्पादितेषु नाऽयं प्रतिषेधः । मानवे हि श्रुतम् 22— 'काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः। विक्रीणीत तिलाच्छुद्धान् धर्मार्थमचिरस्थितान् ॥ इति ॥१३॥

#### 14 अविहितश्चैतेषाम् मिथो विनिमयः

अविहितश् चैतेषां मिथो विनिमयः १४

▼

## ⑤

>
▼ Bühler

14. The exchange of the one of these (abovementioned goods) for the other is likewise unlawful.

▼ हरदत्त-टीका

## सूत्रम्⑥

अविहितश्चैतेषां मिथो विनिमयः ॥ १४ ॥

## टिप्पनी⑥

विनिमयः परिवर्तनम् । येषां विक्रयः प्रतिषिद्धः तेषां परस्परेण विनिमयोऽप्यविहितः प्रतिषिद्धः, न कर्तव्य इत्यर्थः ॥१४॥

#### 15 अन्नेन चान्नस्य मनुष्याणाञ्

अन्नेन चान्नस्य,
मनुष्याणां च मनुष्यैः,
रसानां च रसैर्,
गन्धानां च गन्धैर्,
विद्यया च विद्यानाम् १५

▼

## ⑤

>
▼ Bühler

15. But food (may be exchanged) for food, and slaves for slaves, and condiments for condiments, and perfumes for perfumes, and learning for learning. 23

▼ हरदत्त-टीका

## सूत्रम्⑥

अनेन चाऽन्नस्य मनुष्याणां च मनुष्यैः रसानां च रसैर्गन्धानां च गन्धैर्विद्यया च विद्यानाम् ॥१५॥

## प्रस्तावः⑥

तेष्वेव केषांचिद्विनिमयोऽनुज्ञायते—

## टिप्पनी⑥

अन्नादीनां विद्यान्तानां विनिमयो भवत्येवेत्यर्थः । तथा च वसिष्ठः24-रसा रसैस्समतो हीनतो वा ... ..तिलतण्डुलपक्वान्नं विद्यामनुष्याश्च विहिताः परिवर्तनेन' इति । मानवे तु विशेषः—
25रसा रसैर्निर्मातव्या न त्वेव लवणं रसैः।
कृतान्नं चाऽकृतान्नेन तिला धान्येन तत्समाः ॥ इति ।

गौतमीये तु-26विनिमयस्तु । रसानां रसैः । पशूनां च । न लवणं कृतान्नयोः । तिलानां च । समेनाऽऽमेन तु पक्वस्य सम्प्रत्यर्थ' इति । तस्मादत्र प्रतिषेधानुवृत्तिर्न शङ्कनीया । पूर्वत्र चोक्तं 'ब्रह्मणि मिथो विनियोगे न गतिर्विद्यत' (१३.१७) इति । 27विनिमयाभ्यनुज्ञानादेव विद्यादीनां विक्रयोऽपि प्रतिषिद्धो वेदितव्यः ॥ १५ ॥

#### 16 अक्रीतपण्यैर्व्यवहरेत

अ-क्रीतपण्यैर् व्यवहरेत १६

▼

## ⑤

>
▼ Bühler

16. Let him traffic with lawful merchandise which he has not bought,

▼ हरदत्त-टीका

## सूत्रम्⑥

अक्रीतपण्यैर्व्यवहरेत ॥ १६ ॥

## टिप्पनी⑥

अक्रीतानि स्वयमुत्पादितानि अरण्यादाहृतानि वा यानि पण्यानि तैर्व्यवहरेत मुञ्जादिभिः ॥ १६ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ विंशतितमी कण्डिका ॥ २० ॥

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
4. आप० ध० १.३०.८.↩
5. मनु० रमृ० २.६↩
6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
7. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

8. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

9. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩

10. आप० ध० १.३०.८.↩

11. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

13. Manu II, 35.↩

14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

15. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

16. आप० ध० १.३०.८.↩

17. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

18. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

21. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

22. आप० ध० १.३०.८.↩

23. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

24. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

25. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

26. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

27. आप० ध० १.३०.८.↩

## २१①

### 01 मुञ्जबल्बजैर्मूलफलैः④

मुञ्जबल्बजैर्मूलफलैः १

▼

## ⑤

>
▼ Bühler

1. With Muñja-grass, Balbaja-grass (and articles made of them), roots, and fruits,

▼ हरदत्त-टीका

## सूत्रम्⑥

मुञ्जबल्बजैर्मूलफलैः ॥ १ ॥

## टिप्पनी⑥

मुञ्जबल्वजास्तृणविशेषाः ॥ १ ॥

#### 02 तृणकाष्ठैरविकृतैः

तृणकाष्ठैरविकृतैः २

▼

## ⑤

>
▼ Bühler

2. And with (other kinds of) grass and wood which have not been worked up (into objects of use). 1

▼ हरदत्त-टीका

## सूत्रम्⑥

तृणकाष्ठैरविकृतैः ॥२॥

## टिप्पनी⑥

तृणानां विकारो रज्ज्वादिभावः । काष्ठानां विकारः स्थूणादिभावः । तृणत्वादेव सिद्धे मुञ्जबल्वजग्रहणं विकारार्थम् ॥ २॥

#### 03 नात्यन्तमन्ववस्येत्

नात्यन्तमन्ववस्येत् ३

▼

## ⑤

>
▼ Bühler

3. He shall not be too eager (after such a livelihood).

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽत्यन्तमन्ववस्येत् ॥ ३ ॥

## टिप्पनी⑥

प्रतिषिद्धानामपि विक्रयविनिमयाभ्यां जीवेत् । न पुनरत्यन्तमन्ववस्येत् अवसीदेत् । तथा च गौतमः2 'सर्वथा तु वृत्तिरशक्तावशौद्रेण । तदप्यके प्राणसंशय' इति । मनुरपि—
3 जीविताात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स दोषेण लिप्यते ॥ इति ॥३॥

#### 04 वृत्तिम् प्राप्य विरमेत्

वृत्तिं प्राप्य विरमेत् ४

▼

## ⑤

>
▼ Bühler

4. If he obtains (another lawful) livelihood, he shall leave off (trading). 4

▼ हरदत्त-टीका

## सूत्रम्⑥

वृत्तिं प्राप्य विरमेत् ॥ ४॥

## टिप्पनी⑥

गतम् ॥४॥

#### 05 न पतितैः संव्यवहारो

न पतितैः संव्यवहारो विद्यते ५

▼

## ⑤

>
▼ Bühler

> 5. Intercourse with fallen men is not ordained, 5

▼ हरदत्त-टीका

## सूत्रम्⑥

न पतितैस्संव्यवहारो विद्यते ॥५॥

## टिप्पनी⑥

पतिताः स्तेनादयो वक्ष्यमाणास्तैः सह न कश्चिदपि व्यवहार कर्तव्यः। तत्र मनुः6—
संवत्सरेण पतति पतितेन सहाऽऽचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥ इति ।
यानादिभिस्संवत्सरेण पतति । याजनादिभिस्तु सद्य एव ॥ ५ ॥

#### 06 तथापपात्रैः

तथापपात्रैः ६

▼

## ⑤

>
▼ Bühler

> 6. Nor with Apapātras. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

तथाऽपपात्रैः ॥६॥

## टिप्पनी⑥

अपपात्राश्चण्डालादयः । तैश्च संव्यवहारो न कर्तव्यः ॥ ६ ॥

#### 07 अथ पतनीयानि

अथ पतनीयानि*(←द्विजातिकर्मभ्यो हानिः पतनम्)* ७

▼

## ⑤

>
▼ Bühler

7. Now (follows the enumeration of) the actions which cause loss of caste (Patanīya).

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ पतनीयानि ॥ ७ ॥

## टिप्पनी⑥

द्विजातिकर्मभ्यो हानिः पतनं, तस्य निमित्तानि कर्माणि वक्ष्यन्ते ॥७॥

#### 08 स्तेयम्, आभिशस्त्यं ,

स्तेयम्, आभिशस्त्यं *(←ब्रह्महत्यादिभिर् वक्ष्यमाणैः)*,
पुरुष-वधो, ब्रह्मोज्झं*(=वेद-त्यागः)*,
गर्भ-शातनम्,
मातुः पितुर् इति योनि-संबन्धे सहापत्ये स्त्री-गमनं,
सुरा-पानम्, असंयोग-संयोगः ८

▼

## ⑤

>
▼ Bühler

8. (These are) stealing (gold), crimes whereby one becomes an Abhiśasta, homicide, neglect of the Vedas, causing abortion, incestuous connection with relations born from the same womb as one's mother or father, and with the offspring of such persons, drinking spirituous liquor, and intercourse with persons the intercourse with whom is forbidden. 8

▼ हरदत्त-टीका

## सूत्रम्⑥

स्तेयमाभिशस्त्यं पुरुषवधो ब्रह्मोज्झं गर्भशातनं मातुः पितुरिति योनिसम्बन्धे सहापत्ये स्त्रीगमनं सुरापानमसंयोगसंयोगः ॥ ८॥

## टिप्पनी⑥

स्तेयं सुवर्णचौर्यम् । आभिशस्त्यं ब्रह्महत्या। 'ब्राह्मणमात्रं च हत्वाभिशस्त' (२४७.) इति वक्ष्यमाणत्वात् । पुरुषवधो मनुष्यजातिवधः । तेन स्त्रीवधोऽपि गृह्यते । ब्रह्मोज्झं उज्झ उत्सर्गे। भावे घञ्। छान्दसो लिङ्गव्यत्ययः । ब्रह्म वेदः तस्याऽधीतस्य नाशनं ब्रह्मोज्झम् । औषधादिप्रयोगेण गर्भस्य वधो गर्भशातनम् । मातुर्योनिसम्बन्धे मातृष्वस्रादौ । पितुर्योनिसम्बन्धे पितृष्वस्रादौ सहापत्ये अपत्येन सहिते स्त्रीगमनं मातृष्वसृगमनं तत्सुतागमनं मातुलसुतागमनं चेत्यर्थः ।
9 गौडी पैष्टी च माध्वी च विशेया त्रिविधा सुरा।
यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैः ॥
इति मानवे निषिद्धायाः सुरायाः, पानं सुरापानम् । असंयोगाः, संयोगानर्हाः प्रतिलोमादयः । तैः संयोग एकगृहवासादिः असंयोगसंयोगः । एतानि पतनीयानि ॥८॥

#### 09 गुर्वीसखिङ् गुरुसखिञ् च

गुर्वी-सखिं गुरु-सखिं च गत्वा
ऽन्यांश् च पर-तल्पान् ९

▼

## ⑤

>

▼ Bühler

9. That man falls who has connection with a female friend of a female Guru, or with a female friend of a male Guru, or with any married woman. 10

▼ हरदत्त-टीका

## सूत्रम्⑥

गुर्वीसखिं गुरुसखिं च गत्वाऽन्यांश्च परतल्पान् ॥९॥

## टिप्पनी⑥

सखीशब्दस्य छान्दसो ह्रस्वः । गुर्वीसखी मात्रादीनां सखी। गुरुसखी पित्रादिनां सखी तां गत्वा । किम् ? पततीत्युत्तरत्र श्रुतमपेक्ष्यते। अन्याश्च परतल्पान् गत्वा पतति । तल्पशब्देन शपयनवाचिना दारा लक्ष्यन्ते ॥९॥

#### 10 नागुरुतल्पे पततीत्येके

नागुरुतल्पे पततीत्येके १०

▼

### ⑤

>
▼ Bühler

10. Some (teachers declare), that he does not fall by having connection with any other married female except his teacher's wife. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽगुरुतल्पे पततीत्येके ॥ १० ॥

## टिप्पनी⑥

गुरुदारव्यतिरेकेण परतल्पगमने पातित्यं नास्तीत्येके मन्यन्ते । यद्यपि सामान्येन पतनीयानीत्युक्तम् , प्रायश्चित्ते तु गुरुलघुभावो द्रष्टव्यः ॥१०॥

#### 11 अधर्माणान् तु सततम्

अधर्माणां तु सततम् आचारः ११

▼

### ⑤

>
▼ Bühler

11. Constant commission of (other) sins (besides those enumerated above) also causes a man to lose his caste.

▼ हरदत्त-टीका

## सूत्रम्⑥

अधर्माणां तु सततमाचारः ॥ ११ ॥

## टिप्पनी⑥

तुश्चार्थे । उक्तव्यतिरिक्तानामप्यधर्माणां सततमाचारः पतनहेतुः ॥११॥

#### 12 अथाशुचिकराणि

अथाशुचिकराणि १२

▼

## ⑤

>
▼ Bühler

12. Now follows (the enumeration of) the acts which make men impure (Asucikara).

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाऽशुचिकराणि ॥ १२ ॥

## टिप्पनी⑥

अशुचिं पुरुषं कुर्वन्तीत्यशुचिकराणि, तानि वक्ष्यन्ते ॥ १२ ॥

#### 13 शूद्रगमनमार्यस्त्रीणाम्

शूद्र-गमनम् आर्य-स्त्रीणाम् १३

▼

## ⑤

>
▼ Bühler

13. (These are) the cohabitation of Aryan women with Śūdras,

▼ हरदत्त-टीका

## सूत्रम्⑥

शूद्रगमनमार्यस्त्रीणाम् ॥ १३ ॥

### टिप्पनी⑥

त्रैवर्णिकस्त्रीणां शूद्रगमनमशुचिकरम् ॥ १३ ॥

#### 14 प्रतिषिद्धानाम् मांसभक्षणम्

प्रतिषिद्धानां मांस-भक्षणम् १४

▼

### ⑤

>
▼ Bühler

14. Eating the flesh of forbidden (creatures),

▼ हरदत्त-टीका

### सूत्रम्⑥

प्रतिषिद्धानां मांसभक्षणम् ॥ १४ ॥

### टिप्पनी⑥

येषां मांसं प्रतिषिद्धं तेषां मांसस्य भक्षणमशुचिकरम् ॥ १४ ॥

#### 15 शुनो मनुष्यस्य च

*(यथा -)* शुनो मनुष्यस्य च
कुक्कुट-सूकराणां ग्राम्याणां, क्रव्यादसाम् १५

▼

### ⑤

>
▼ Bühler

15. As of a dog, a man, village cocks or pigs, carnivorous animals,

▼ हरदत्त-टीका

### सूत्रम्⑥

शुनो मनुष्यस्य च कुक्कुटसूकराणां ग्राम्याणां क्रव्यादसाम्॥ १५ ॥

## प्रस्तावः⑥

तत्रोदाहरणम्—

## टिप्पनी⑥

ग्राम्याणामिति वचनादारण्यानामप्रतिषेधः । अदनमदः, भावेऽसुन्प्रत्ययः । क्रव्यविषयमदनं येषां ते क्रव्यादसः केवलं मांसवृत्तयो गृध्रादयः ॥ १५ ॥

#### 16 मनुष्याणाम् मूत्रपुरीषप्राशनम्

मनुष्याणां मूत्र-पुरीष-प्राशनम् १६

▼

## ⑤

>
▼ Bühler

16. Eating the excrements of men,

▼ हरदत्त-टीका

## सूत्रम्⑥

मनुष्याणां मूत्रपुरीषप्राशनम् ॥ १६ ॥

## टिप्पनी⑥

मूत्रपुरीषग्रहणं तादृशस्य रेतसोऽप्युपलक्षणम् ॥ १६ ॥

#### 17 शूद्रोच्छिष्टमपपात्रागमनञ् चार्याणाम्

शूद्रोच्छिष्टम्,
*(प्रतिलोमाद्य्-)*अपपात्रा-गमनं चार्याणाम् १७

▼

## ⑤

>
▼ Bühler

17. Eating what is left by a Śūdra, the cohabitation of Aryans with Apapātra women.

▼ हरदत्त-टीका

## सूत्रम्⑥

शद्रोच्छिष्टमपपात्रगमनं चाऽऽर्याणाम् ॥ १७ ॥

## टिप्पनी⑥

शूद्रोच्छिष्टं भुक्तमार्याणां त्रैवर्णिकानामशुचिकरम् । अपपात्राः प्रतिलोमस्त्रियः तासां च गमनम् ॥ १७॥

#### 18 एतान्यपि पतनीयानीत्येके

एतान्यपि पतनीयानीत्य् एके १८

▼

## ⑤

>
▼ Bühler

18. Some declare, that these acts also cause a man to lose his caste.

▼ हरदत्त-टीका

## सूत्रम्⑥

एतान्यपि पतनीयानीत्येके ॥ १८ ॥

## टिप्पनी⑥

यान्येतान्यशुचिकरत्वेनाऽनुक्रान्तानि एतान्यपि पतनीयान्येवेत्येके मन्यन्ते ॥१८॥

#### 19 अतोऽन्यानि दोषवन्त्यशुचिकराणि भवन्ति

अतोऽन्यानि दोषवन्त्य् अशुचिकराणि भवन्ति १९

▼

## ⑤

>
▼ Bühler

19. Other acts besides those (enumerated) are causes of impurity.

▼ हरदत्त-टीका

## सूत्रम्⑥

अतोऽन्यानि दोषवन्त्यशुचिकराणि भवन्ति ॥१९॥

## टिप्पनी⑥

उक्तव्यतिरिक्तानि दोषवन्ति कर्माणि दुष्प्रतिग्रहहिंसादीनि तान्यशुचिकराणि भवन्ति ॥ १९ ॥

#### 20 दोषम् बुद्ध्वा न

दोषं बुद्ध्वा
न पूर्वः परेभ्यः पतितस्य समाख्याने स्याद्,
वर्जयेत् त्व् एनं धर्मेषु २०

▼

## ⑤

>
▼ Bühler

20. He who learns (that a man has) committed a sin, shall not be the first to make it known to others; but he shall avoid the (sinner), when performing religious ceremonies. 12

▼ हरदत्त-टीका

## सूत्रम्⑥

दोषं बुद्ध्वा न पूर्वः परेभ्यः पतितस्य समाख्याने स्याद्वर्जयेत्त्वेनं धर्मेषु ॥ २० ॥

## टिप्पनी⑥

पतितस्य दोषं परैरविदितं बुद्ध्वा परस्य समाख्याने पूर्वो न स्यात् । परैरविदितं स्वयं विद्वानपि न परेभ्यः पूर्वमाचक्षीत । किं तु स्वयं धर्मकृत्येष्वेनं वर्जयेत् , यथा परे न जानन्ति । अन्यथा दोषवान् स्यात् ॥२०॥

इत्यापस्तम्बधर्मसूत्रवृत्तावेकविंशी कण्डिका ॥ २१ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां प्रथमप्रश्ने सप्तमः पटल; ॥ ७ ॥

इति सप्तमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. मनु० रमृ० २.६↩

3. गौ० ध० १. १, २↩

4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

5. Manu II, 35.↩

6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

7. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

8. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

10. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

11. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

12. Manu II, 69; Yājñ. I, 15.↩

**oし①**

# २२①

## 01 अध्यात्मिकान्योगान्④

अध्यात्मिकान् योगान् अनुतिष्ठेन् न्याय-संहितान् अनैश्चारिकान् १

▼

## ⑤

>

▼ Bühler

1. He shall employ the means which tend to the acquisition of (the knowledge of) the Ātman, which are attended by the consequent (destruction of the passions, and) which prevent the wandering (of the mind from its object, and fix it on the contemplation of the Ātman). 1

▼ हरदत्त-टीका

## सूत्रम्⑥

अध्यात्मिकान् योगाननुतिष्ठेन्न्यायसंहितानैश्चारिकान् ॥ १ ॥

## टिप्पनी⑥

उक्तानि पतनीयान्यशुचिकराणि च कर्माणि । तेषां प्रायश्चित्तानि वक्ष्यन्नादित आत्मज्ञानं तदुपयोगिनश्च योगानधिकुरुते । तस्यापि सर्वपापहरत्वेन मुख्यप्रायश्चित्तत्वात् । श्रूयते हि—
2भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ इति ।
3 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतेवं हाऽस्य सर्वे पाप्मानः प्रदूयन्त' इति च । याज्ञवल्क्योऽप्याह —
4इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगनाऽऽत्मदर्शनम् ॥ इति ॥

अध्यात्मनि भवानध्यात्मिकान् । छान्दसो वृद्ध्यभावः । आत्मनो लम्भयितॄन् । योगान् चित्तसमाधानहेतून् वक्ष्यमाणानक्रोधादीनुपायान् । अनुतिष्ठेत् सेवेत न्यायसंहितान् उपपत्तिसमन्वितान् , उपपद्यन्ते हि ते न्यायतः क्रोधादीनां दोषाणां निर्घाते । अनैश्चारिकान् निश्चारश्चित्तस्य बहिर्विक्षेपः, तस्मै ये प्रभवन्ति क्रोधादयो वक्ष्यमाणाःते नैश्चारिकाः तत्प्रतिपक्षभूतान् । अक्रोधादिषु सत्सु चित्तमनिश्चरणशीलमात्मालम्बनं निश्चलं तिष्ठति तस्मात्ताननुतिष्ठेत् । आत्मानं लब्धुमक्रोधादिलक्षणं चित्तसमाधानं कुर्यादिति ॥१॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

अध्यात्मिकान् योगाननुतिष्ठेन्न्यायसंहितानैश्चारिकान् ॥ १ ॥

## टिप्पनी⑥

श्रीमच्छङ्करभगवत्पादप्रणीतं विवरणम् ॥

अथ 'अध्यात्मिकान् योगान्'—इत्याद्यध्यात्मपटलस्य संक्षेपतो विवरणं प्रस्तूयते। किमिह प्रायश्चित्तप्रकरणे समाम्नानस्य प्रयोजनमिति । उच्यते—कर्मक्षयहेतुत्वसामान्यात्। अनिष्टकर्मक्षयहेतूनि हि प्रायश्चित्तानि भवन्ति । सर्वं च कर्म वर्णाश्रमविहितमनिष्टमेव विवेकिनः, देहग्रहणहेतुत्वात् । तत्क्षयकारणं चाऽऽत्मज्ञानम्, प्रवृत्तिहेतुदोषनिवर्तकत्वात् । दोषाणां च निर्घाते आत्मज्ञानवतः पण्डितस्य धर्माधर्मक्षये क्षेमप्राप्तिरिह विवक्षितेत्यात्मज्ञानार्थमध्यात्म(१)पटलमारभ्यते, कर्मक्षयहेतुत्वसामान्यात् ।

- १. अत्र पटलशब्दो नपुसकलिङ्गः प्रयुक्तः । 'समूहे पटलं न ना' ( अमरको. ३. ३. २००) इत्यमरकोशात्तु समूहवाचिनः पटलशब्दस्यैव क्लीबत्वम् । 'तिलके च परिच्छेदे पटलः' इति शेषकोशात् परिच्छेदवाचकस्य पटलशब्दस्य तु पुंल्लिागतैवेत्यवगम्यते । अत एव च सर्वे ग्रन्थकाराः 'इति प्रथमः पटलः, इत्येव लिखन्ति । अतोऽत्रापि पुलिंङ्गेनैव भाव्यं यद्यपि पटलशब्देन तथापि भेदाविवक्षया प्रयोगः कृत इति भाति ॥

ननु वर्णाश्रमविहितानां कर्मणामफलहेतुन्वात् तत्क्षयो नेष्ट इति, न, "सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्" ( २. २. २.) इत्यादिश्रवणात् । अपरिमितवचनात् क्षेमप्राप्तिरेवेति चेन्न, 'तत्परिवृत्तौ कर्मफलशेषेण' (२.२.३.) इत्यादिश्रवणात् । गौतमश्च—
(२) वर्णाः आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभय" इत्यादि ना संसारगमनमेव दर्शयति कर्मणां फलम् । सर्वाश्रमाणां हि दोषनिर्घातलक्षणानि समयपदानि विधिनाऽनुतिष्ठन् सार्वगामी भवति, न तु स्वधर्मानुष्ठानात् । वक्ष्यति च—
'विधूय कविः' ( २२. ५) "सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्याऽत्मानमन्विच्छेद्' ( २. २१. १३) इत्यादि ।
"तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति"(२. २१. २)

- २. गौ.ध. ११. २१

इति वचनात् क्षेमशब्दस्य चाऽपवर्गार्थत्वात् सर्वाश्रमकर्मणां ज्ञानरहितानामेव फलार्थत्वं ज्ञानसंयुक्तानि तु क्षेमप्रापकाणि, यथा विषदध्यादीनि मन्त्रशर्करादिसंयुक्तानि कार्यान्तरारम्भकाणि, तद्वदिति चेत्- न; अनारभ्यत्वात् क्षेमप्राप्तेः। यदि हि क्षेमप्राप्तिः कार्या स्यात् तत इदं चिन्त्यम्- किं केवलैः कर्मभिरारभ्या? ज्ञानसहितैर्वा? ज्ञानकर्मभ्यां वा? केवलेन ज्ञानेन कर्मासंयुक्तेन वेति । न त्वारभ्या केनचिदपि; क्षेमप्राप्तेः नित्यत्वात् । अतोऽसदिदम्-ज्ञानसंयुक्तानि कर्माणि क्षेमप्राप्तिमारभन्ते इति । ज्ञानसंयुक्तानां ज्ञानवदेव क्षेमप्राप्तिप्रतिबन्धापनयकर्तृत्वमिति चेत्- न, सकार्यकारणानामेव कर्मणां क्षेमप्राप्तिप्रतिबन्धकत्वात् । अविद्यादोषहेतूनि हि सर्वकर्माणि सहफलैः कार्यभूतैः क्षेमप्राप्तिप्रतिबन्धकानि । तदभावमात्रमेव हि क्षेमप्राप्तिः। न च तदभाव आत्मज्ञानादन्यतः कुतश्चिदुपलभ्यते । तथाह्युक्तम्— "निहत्य भूतदाहान् क्षेमं गच्छति पण्डितः" (२२. ११.) इति । पाण्डित्यं चेहात्मज्ञानं, प्रकृतत्वात् । श्रुतेश्च (१)"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति" इति । अभयं हि क्षेमप्राप्तिः । (२) अभयं वै जनक ! प्राप्तोऽसि' इति श्रुत्यन्तरात् ।
"तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति' (२.२१.२.) इत्याचार्यवचनमन्यार्थम् । कथम् ? यथोपदिष्टेष्वाश्रमधर्मेष्वव्यग्रो निष्कामस्सन् प्रवर्तमानो ज्ञानेऽधिकृतो भवति, न यथेष्टं(३) चेष्टन कामकामी जायापुत्रवित्तादिकामापहृतव्यप्रचेताः। ज्ञानी च सन् सर्वसन्यासक्रमेण क्षेमं गच्छतीत्येषोऽर्थः । नहि दोषनिर्घातः कदाचिदपि कर्मभ्य उपपद्यते । समिथ्याज्ञानानां हि दोषाणां प्रवृत्तौ सत्यां प्राबल्यामिहोपलभ्यते । 'सङ्कल्पमूलः कामः' इति च स्मृतेः । प्रवृत्तिमान्द्ये च दोषतनुत्वदर्शनात् । न चाऽनिर्हृत्य समिथ्याज्ञानान् दोषान् क्षेमं प्राप्नोति कश्चित् । न च जन्मान्तरसञ्चितानां शुभकर्मणां विहितकर्मभ्यो निवृत्तिरुपपद्यते, शुद्धिसामान्ये विरोधाभावात् । सत्सु च तेषु तत्फलोपभोगाय शरीरग्रहणं, ततो धर्माधर्मप्रवृत्तरागद्वेषौ, पुनः शरीरग्रहणं चेति संसारः केन वार्यते ? तस्मान्न कर्मभ्यः क्षेमप्राप्तिस्तत्प्रतिबन्धनिवृत्तिर्वा ।
कर्मसहिताज्ज्ञानादविद्यानिवृत्तिरिति चेत् ! यद्यपि ज्ञानकर्मणो भिन्नकार्यत्वाद् विरोधः तथापि तैलवर्त्त्यग्नीनामिव संहृत्य कर्मणा ज्ञानमविद्यादि संसारकारणं निवर्तयतीति चेन्न । क्रियाकारकफलानुपमर्देनाऽऽत्मलाभाभावात् ज्ञानस्य कर्मभिः संहतत्वानुपपत्तेः । तैलवर्त्त्यग्नीनां तु सहभावित्वोपपत्तेरितरेतरोपकार्योपकारकत्वोपपत्तेश्च संहतत्वं स्यात् । न तु ज्ञानकर्मणोस्तदुभयानुपपत्तेः संहतत्वं कदाचिदपि सम्भवति । केवलज्ञानपक्षे शास्त्रप्रतिषेधवचनादयुक्तमिति चेन्न । ज्ञान कार्यानिवर्तकत्वाच्छास्त्रप्रतिषेधवचनस्य ॥

- १. तैत्ति, उ. २, ९.
- २. बृ. उ., ४. २.४.
- ३. 'चेष्टन्' इति शत्रन्तः प्रयोगस्साधुरिति न प्रतीमः।

योऽयं कर्मविधिपरैः केवलज्ञानपक्षस्य सर्वसन्न्यासस्य विप्रतिषेधो विरोधः, स नैव ज्ञानकार्यमविद्यादोषक्षयं वारयति (१)'भिद्यते हृदयग्रन्थिः' (२) 'तस्य तावदेव चिरम्' (३) 'मृत्युमुखात् प्रमुच्यते' इत्येवमादिश्रुतिस्मृतिशतसिद्धम्, कर्मविधिपरत्वात् प्रवृत्तिशास्त्रस्य । न च (तत्) ज्ञानस्वरूपं ब्रह्मात्मैकत्वविषयं वारयति, सर्वोपनिषदामप्रामाण्यानर्थक्यप्रसङ्गात, 'पूः प्राणिनः'(२२ ४.) 'आत्मा वै देवता' इत्यादिस्मृतीनां च । तस्माद्यद्यपि बहुभिः प्रवृत्तिशास्त्रैर्विप्रतिषिद्धं केवलज्ञानशास्त्रमात्मैकत्वविषयमल्पं, तथापि सकार्यस्य ज्ञानस्य बलवत्तरत्वान्न केनचिद्वारयितुं शक्यम्।

- १. मु.उ. २. २. ८.
- २. छा. उ. ६.१४. ..
- ३. कठो. २, ३ १५,

जीवतो दुःखानिवतर्कत्वाज्ज्ञानस्याऽनैकान्तिकं क्षेमप्रापकत्वमिति चेत्, न, 'भिद्यते हृदयग्रन्थिः' 'ब्रह्मविदाप्नोति परम्', 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' (४) ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिस्मृतिन्यायेभ्यः । बहुभिर्विप्रतिषिद्धत्वात् सर्वत्यागशास्त्रस्य लोकवत् त्याज्यत्वमिति चेन्न, तुल्यप्रमाणत्वात् । मानसान्तानि सर्वाणि कर्माण्युक्त्वा । (५)"तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्" इति तपःशब्दवाच्यानां कर्मणामवरत्वेन संसाराविषयत्वमुक्त्वा न्यासशब्दवाच्यस्य ज्ञानस्य केवलस्य न्यास एवात्यरेचयत्' (६) त्यागेनैके अमृतत्वमानशुः' इत्यमृतत्वफलं दर्शयति शास्त्रम् ।

(७)"तस्यैव विदुषो यज्ञस्याऽऽत्मा यजमानः" इत्यादिना च विदुषः सर्वक(र्म?र्मा) भावं दर्शयति; "द्वौ पन्थानावनुनिष्क्रान्ततरौ कर्मपथश्चैव पुरस्तात् सन्यासश्च, तयोः सन्न्यास एवातिरेचयति" इति च । विप्रतिषेधवचनस्य निन्दापरत्वादयुक्तमिति चेन्न।

- ४. मुण्ड. उ.३.२ ९.
- ५. नारा. उ. ७८,
- ६. नारा.उ.३.
- ७. नारा.उ. ८०

अविद्वद्विषयस्य कर्मणः स्तुत्यर्थत्वोपपत्तेः । मन्दबुद्धयो हि लोकेऽदृष्टप्रयोजनाः प्ररोचनेन प्रवर्तयितव्याः कर्मसु । न दृष्टप्रयोजना विद्वांसः। परनिन्दा हि परस्तुतिरिति केवलज्ञाननिन्दया कर्मस्तुतिपरमाचार्यवचनम् ।
यत्तु "बुद्धे चेत् क्षेमप्रापणम् , इहैव न दुःखमुपलभेत" (२.२१.१६) इति ज्ञानस्य साधनत्वानैकान्तिकवचनं, तद् (१) 'ब्रह्मविदाप्नोति परम्' इत्यादिवाक्येभ्यः प्रत्युक्तम्, आचार्यान्तरवचनाच्च 'त्यज धर्ममधर्मं च' 'न तत्र क्रमते बुद्धिः' 'नैष्कर्म्यमाचरेत्' 'तस्मात् कर्म न कुर्वन्ति' इत्यादेः । तस्मात् केवलादेव ज्ञानात् क्षेमप्राप्तिः॥

- १. तै.उ. २. १.

अध्यात्मिकान् योगानिति । अध्यात्मं भवन्तीत्यध्यात्मिकाः । छान्दसं स्वत्वम् । के ते अध्यात्मिका योगाः ? वक्ष्यमाणा अक्रोधादयः । ते हि चित्तलमाधानहेतुत्वाद् योगाः । बाह्यनिमित्तनिरपेक्षत्वाच्चाध्यात्मिकाः । तानध्यात्मिकान् योगान् । न्यायसहितान् उपपत्तिसमन्वितान् । ते हि क्रोधादिषु दोषनिर्घातं प्रति समर्था उपपद्यन्ते न्यायतः । अनैश्वारिकान् निश्वारयन्ति मनोऽन्तःस्थं बहिर्विषयेभ्य इति नैश्वारिकाः क्रोधादयो दोषाः, तत्प्रतिपक्षभूता ह्येते ऽनैश्वारिकाः । अक्रोधादिषु हि सत्सु चित्तमनिश्चरणस्वरूपं प्रसन्नमात्मावलम्बनं तिष्ठति । अतस्ताननुतिष्ठेत् सेवेत । अक्रोधादिलक्षणं चित्तसमाधानं कुर्यादित्यर्थः। तथा हि परः स्व आत्मा लभ्यते । क्रोधादिदोषापहृतचेतस्तया हि स्वोऽपि पर आत्माऽविज्ञातोऽलब्ध इव सर्वस्य यतः, अतस्तल्लाभाय योगानुष्ठानं कुर्यात् ॥ १ ॥

#### 02 आत्मलाभान्न परं विद्यते

आत्म-लाभान् न परं विद्यते २

▼

## ⑤

>
▼ Bühler

2. There is no higher (object) than the attainment of (the knowledge of the) Ātman. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

आत्मलाभान्न परं विद्यते ॥२॥

## प्रस्तावः⑥

किपुनरात्मा प्रयत्नेन लब्धव्यः ? ओमित्याह—

## टिप्पनी⑥

आत्मलाभात्परमुत्कृष्टं लाभान्तरं नास्ति । तस्मात्तस्य लाभाय यत्न आस्थेय इति । का पुनरसावात्मा ? प्रत्यगात्मा । नन्वसौ नित्यलब्धः। न हि स्वयमेव स्वस्याऽलब्धो भवति । सत्यम्, प्रकृतिमेलनात्तधर्मतामुपगतो विनष्टस्वरूप इव भवति । प्रकृत्या हि नित्यसम्बद्धः पुरुषः । तथाविधश्च सम्बन्धो यथा परस्परं विवेको न ज्ञायते । अन्योन्यधर्मश्चान्योऽन्यत्राऽध्यस्यन्ते । यथा क्षीरोदके सम्पृक्ते न ज्ञायते विवेकः-इयत् क्षीरमियदुदकमिति, अमुष्मिन्नवकाशे क्षीरममुश्मिन्नवकाश उदकमिति । यथा वा अग्न्ययोगोलकयोरभिसम्बद्धयोर्ये अग्निधर्मा उष्णत्वभास्वरत्वादयः ते अयोगोलकेऽध्यस्यन्ते। ये वा अयोगोलकधर्माः काठिन्यादैर्घ्यादयः ते ऽग्नावध्यस्यन्ते । एवं हि तत्र 'प्रतिपत्तिः एकं वस्तु उष्णं दीर्घं भास्वरं कठिनमिति । तद्वदिहापि पुरुषधर्माश्चैत न्यादयः प्रकृतावध्यस्यन्ते । प्रकृतिधर्माश्च सुखदुःखमोहपरिणामादयः पुरुषे । ततश्च एकं वस्तु चेतनं सुखादिकलिल परिणामीति व्यवहारः। वस्ततस्तु तस्मिन् सङ्घाते अचेतनांशः परिणामी । चेतनांशस्तु तमनुधावति । येन येन रूपेण परिणमति तेन तेनाऽभेदाध्यासमापद्यते।

यथा क्षीरावस्थागतं घृतं क्षीरे दध्यात्मना परिणमति तामप्यवस्थामनुप्रविशति तद्वदिहापि । तदिदमुच्यते-6 तत्सृष्ट्वा तदेवानुप्राविश'दिति । सर्गेऽप्यात्मनः कर्तृत्वमिदमेव-यदुत भोक्तृतया निमित्तत्वम् । तदेवं स्वभावतः स्वच्छोऽप्यात्मा प्रकृत्या सहाभेदमापन्नः तद्धर्मा भवति। एवं तद्विकारेण महता तद्विकारेणाऽहङ्कारेण, इत्याशरीराद्द्रष्टव्यम् । स्थूलोऽहं कृशोऽहं देवोऽहं मनुष्योऽहं तिर्यगहमिति । तस्यैवंगतस्यापेक्षितव्यस्स्वरूपलाभः नीचैरिव वर्धितस्य राजपुत्रस्य । तद्यथा शबरादिभिर्बाल्यात्प्रभृति स्वसुतैस्सह संवर्धितो राजपुत्रस्तज्जातीयमात्मानमवगमयन्मात्रा स्वरूपे कथिते लब्धस्वरूप इव भवति । तथा प्रकृत्या7वेश्ययेव स्वरूपान्तरं नीत आत्मा मातृस्थानीयया8 "तत्त्वमसी'ति श्रुत्या स्वभाव नीयते-यदेवंविधं परिशुद्धं वस्तु तदेव त्वमसि, यथा मन्यसे 'मनुष्योऽहं दुःख्यह'मित्यादि न तथेति । यथा य एवंभूतो राजा स त्वमसीति राजपुत्रः ।

ननु तत्त्वमसीति ब्रह्मणा तादात्म्यमुच्यते। को ब्रूते ? नेति । ब्रह्माऽपि नान्यदात्मनः । किं पुनरयमात्मा एक ? आहो स्विन्नाना? किमनेन ज्ञानेन ? त्वं तावदेवंविधश्चिदेकरसो नित्यनिर्मलः संसर्गात्कलुषतामिव गतः। तद्वियोगश्च ते मोक्षः । त्वयि मुक्ते यद्यन्ये सन्ति ते संसरिष्यन्ति । का ते क्षतिः ? अथ न सन्ति तथापि कस्ते लाभ इत्यलमियता । महत्येषा कथा । तदप्येते श्लोका भवन्ति —

नीचानां वसतौ तदीयतनयैः सार्धं चिरं वर्धित<br>
स्तज्जातीयमवैति राजतनयः स्वात्मानमप्यञ्जसा।<br>
संघाते महदादिभिस्सहवसंस्तद्वत्परः पूरुषः<br>
स्वात्मानं सुखदुःखमोहकलिलं मिथ्यैव धिङ्मन्यते ॥१॥<br>
दाता भोगपरः समग्रविभवो यः शासिता दुष्कृतां<br>
राजा स त्वमसीति मातृमुखतः श्रुत्वा यथावत्स तु ।<br>
राजीभ्य9 जयार्थमेव यतते तद्वत्पुमान् बोधितः<br>
श्रुत्या तत्त्वमसीत्यपास्य दुरितं ब्रह्मैव सम्पद्यते ॥२॥<br>
इत्येवं बहवोऽपि राजतनयाः प्राप्ता दशामीदृशीं<br>
नैवान्योन्यभिदामपस्य सहसा सर्वे भजन्त्येकताम् ।<br>
किं तु स्वे परमे पदे पृथगमी तिष्ठन्ति भिन्नास्तथा<br>
क्षेत्रज्ञा इति तत्त्वमादिवचसः का भेदवादे क्षतिः ॥३॥<br>
तेष्वेको यदि जातु मातृवचनात् प्राप्तो निजं वैभवं<br>
नान्येन क्षतिरस्य यत्किल परे सत्यन्यथा च स्थिता ॥<br>
यद्वान्ये न भवेयुरेवमपि को लाभोऽस्य तद्वद्गतिः पुंसामित्याभिदां भिदां च न वयं निर्बद्ध्य निश्चिन्महे॥४॥ इति॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

आत्मलाभान्न परं विद्यते ॥२॥

## प्रस्तावः⑥

पुत्रवित्तादिलाभो हि परो दृष्टो लोके । किमात्मलाभेन ? इत्यत आह—

## टिप्पनी⑥

आत्मलाभाद् आत्मनः परस्य स्वरूपप्रतिपत्तेः न परं लाभान्तरं विद्यते । तथा विचारितं वृहदारण्यके(१) तदेतत् प्रेयः पुत्राद्' इत्यादिना ॥२॥

#### 03 तत्रात्मलाभीयाञ्श्लोकानुदाहरिष्यामः

तत्रात्मलाभीयाञ् श्लोकान् उदाहरिष्यामः ३

▼

⑤

>
▼ Bühler

3. We shall quote the verses (from the Veda) 10 which refer to the attainment of (the knowledge of) the Ātman.

▼ हरदत्त-टीका

## सूत्रम्⑥

तत्राऽऽत्मलाभीयाञ्छ्लोकानुदाहरिष्यामः ॥ ३ ॥

## टिप्पनी⑥

तदिहापेक्षितमात्मज्ञानमुपदिश्यते । तच्च त्रिविधम्- श्रुतं मननं निदिध्यासनमिति । 11श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रवणात् । तत्र श्रुतमुपनिषदादिशब्दजन्यं ज्ञानम् । मननमुपपत्तिभिर्निरूपणम् । एवं श्रुते मते चात्मनि साक्षात्कारहेतुरविक्षिप्तेन चेतसा निरन्तरं भावना12निदिध्यासनम्। तत्राऽऽत्मसिद्धये श्रोतं ज्ञानं तावदाह—
तत्रेति वाक्योपन्यासे । आत्मलाभीयानात्मलाभप्रयोजनान् । अनुप्रवचनादिषु दर्शनाच्छप्रत्ययः । श्लोकान् पादबद्धानोपनिषदान् मन्त्रान् । उदाहरिष्यामः उद्धृत्याहरिष्यामः ग्रन्थे निवेशयिष्यामः ॥३॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

तत्राऽऽत्मलाभीयाञ्छ्लोकानुदाहरिष्यामः ॥ ३ ॥

## टिप्पनी⑥

सत्य क्रोधादयो दोषा आत्मलाभप्रतिबन्धभूता अक्रोधादिभिर्निर्ह(न्य?ण्य)न्ते; तथापि न मुलोद्वर्तनेन निवृत्तिः क्रोधादीनाम्, सर्वदोषबीजभूतमज्ञानं न निवृत्तमिति तस्य चानिवृत्तौ बीजस्याऽनिवर्तितत्वात् सकृन्निवृत्ता अपि क्रोधादयो दोषाः पुनरुद्भविष्यन्तीति संसारस्याऽऽत्यन्तिकोच्छेदो न स्यात् । तद्दोषबीजभूतस्याऽज्ञानस्य मतान् , ज्ञानादन्यतो न निवृत्तिरित्यात्मस्वरूपप्रकाशनायात्मज्ञानाय मतान् शाखान्तरोपनिषद्भ्यः, तत्र तस्मिन् आत्मलाभप्रयोजने निमित्ते । आत्मानं करतलन्यस्तमिव ल(म्भि ? भयि)तुं समर्थान् आत्मलाभीयान् श्लोकानुदाहरिष्यामः उद्धृत्याऽऽहरिष्यामः । ग्रन्थीकृत्य दर्शयिष्याम इत्यर्थः ॥ ३॥

#### 04 पूः प्राणिनः सर्व

पूः प्राणिनः सर्व एव गुहाशयस्य । अहन्यमानस्य विकल्मषस्य ।
अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ४

▼

⑤

>
▼ Bühler

4. All living creatures are the dwelling of him who lies enveloped in matter, who is immortal and who is spotless. Those become immortal who worship him who is immovable and lives in a movable dwelling. 13

▼ हरदत्त-टीका

## सूत्रम्⑥

पूः प्राणिनः सर्व एव गुहाशयस्याऽहन्यमानस्य विकल्मषस्याऽचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः॥ ४ ॥

## टिप्पनी⑥

गुहेति प्रकृतिनाम।
'यत्तस्मृतं कारणमप्रमेयं ब्रह्म प्रधान प्रकृतिप्रसूतिः।
आत्मा गुहा योनि14रनाद्यनन्त क्षेत्रं तथैवामृतमक्षरं च ॥इति
पुराणे दर्शनात् । तस्यां शेते तया सहाऽऽविभागमापन्नास्तिष्ठतीति गुहाशय आत्मा ।

15 अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, इति च मन्त्रान्तरम् । अहन्यमानस्य न ह्यसौ शरीरे हन्यमानेऽपि हन्यते 16तथा चोक्तं भगवता-17 न हन्यते हन्यमाने शरीर' इति । विकल्मषस्य निर्लेपस्य। सर्व एव हि धर्माधर्मादिरन्तःकरणस्य धर्मः, आत्मनि त्वध्यस्तः। एवंभूतस्यात्मनः सर्व एव प्राणिनः ब्रह्माद्यास्तिर्यगन्ताः प्राणादिमन्तः संघाता पूः पुरं उपभोगस्थानम् । यथा राजा पुरमधिवसन् सचिवैरानीतान् भोगानुपभुङ्क्ते, तथाऽयं देवादिशरीरमधिवसन् करणैः रुपस्थापितान् भोगानुपभुङ्क्ते । तमेव भूतमचलं सर्वगतत्वेन निश्चलम् । चलनिकेतं निकेतं स्वस्थान शरीरं तद्यस्य चलं तं येऽनुतिष्ठन्ति उपासते एवंभूतोऽहमिति प्रतिपद्यन्ते, तेऽमृताः मुक्ता भवन्तीति ।' ४॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

पूः प्राणिनः सर्व एव गुहाशयस्याऽहन्यमानस्य विकल्मषस्याऽचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ॥ ४ ॥

## टिप्पनी⑥

पूः पुरं शरीरम् । प्राणिनः प्राणवन्तः। सर्व एव ब्रह्मादीनि स्तम्बपर्यन्तानि प्राणिनः । पुरं पुरमिव राज्ञः उपलब्ध्याधिष्ठानम् । कस्य पुरम् ? गुहाशयस्याऽऽत्मनः । यथा स्वकीयपुरे राजा सचिवादिपरिवृत उपलभ्यते, एवं देहेष्वात्मा बुधादिकरणसंयुक्त उपलभ्यते । उपलभते च

बुद्ध्यादिकरणोपसंहृतान् भोगान् । अतोऽविद्यावरणात्मभूतायां बुद्धिगुहायां शेत इति गुहाशयः । तस्य पुरम् । तस्यां बुद्धावविद्यादिदोषमलापनये विद्वद्भिस्त्यक्तैषणैरुपलभ्यते । इदमपरं विशेषणं गुहाशयस्याऽहन्यमानस्य, छेदनभेदनजरारोगादिभिर्हन्यमाने देहे न हन्यते । (१) न वधेनाऽस्य हन्यते' इतिच्छान्दोग्ये । तस्य विकल्मषस्य, कल्मषं पापं तदस्य नास्तीति विकल्मषः । सर्वं ह्यविद्यादोषसहितं धर्माधर्माख्यं कर्म कल्मषं भवति, विकल्मषस्येति विशेषणेन तत् प्रतिषिध्यते तत्कार्यं जरारोगादिदुःखरूपमहन्यमानस्येति । एवं हेतुफलसम्बन्धरहितस्याऽसंसारिण उपलब्ध्यधिष्ठानं पूः सर्वे प्राणिनः । अतो न संसार्यन्यो ऽस्ति । (२) एको देवः सर्वभूतेषु 'गूढ' इति श्वेताश्वतरे। (३)"एष सर्वेषु भूतेषु गुढोऽऽत्मा न प्रकाशते" इति च काठके । (४) नान्यदतोऽस्ति द्रष्टा' इत्यादि वाजसनेयके । (१) 'स आत्मा तत्त्वमसी'ति च छान्दोग्ये । पूर्वार्धेन ब्रह्मणो याथात्म्यमुक्त्वोत्तरार्धेन तद्विज्ञानवतस्तद्विज्ञानफलमाह-यस्य सर्वे प्राणिनः पुरा अहन्यमानस्य विकल्मषस्य, तस्य सर्वप्राणिसम्बन्धादर्थसिद्धमाकाशवत् सर्वगतत्वम्, 'आकाशवत् सर्वगतश्च नित्य' इति च श्रुतेः। सर्वगतस्य चाऽचलत्वमर्थसिद्धमेव । तमचलं चलनिकेतं चलायां हि प्राणिगुहायां स्वयं शेते तमचलं चलनिकेतम् । येऽनुतिष्ठन्ति ममात्मेति साक्षात् प्रतिपद्यन्ते, तेऽमृताः अमरणधर्माणो भवन्ति ॥ ४॥

- १. छा. उ. ८ १० ४.
- २. श्वेता. उ. ६. ११.
- ३. कठो. १. ३, १२.
- ५, छा. ६. ८. ९.
- ४. बृ. उ. ३.८.११

#### 05 यदिदमिदिहेदिह लोके विषयमुच्यते

यदिदमिदिहेदिह लोके विषयमुच्यते । विधूय कविरेतदनुतिष्ठेद्गुहाशयम् ५

▼

## ⑤

>
▼ Bühler

5. Despising all that which in this world is called an object (of the senses) a wise man shall strive after the (knowledge of the) Ātman. 18

▼ हरदत्त-टीका

## सूत्रम्⑥

यदिदमिदिहेदिह लोके विषयमुच्यते।
विधूय कविरेतदनुतिष्ठेद्गुहाशयम् ॥ ५ ॥

## प्रस्तावः⑥

विषयसङ्गपरित्यागेनाऽयमुपास्य इत्याह —

## टिप्पनी⑥

यदिदं, विषयं, मेतदिति सर्वत्र लिङ्गव्यत्ययश्छान्दसः। एवमितिशब्दे तकारस्य दकारः । इतिशब्दः प्रसिद्धौ । हशब्द आश्चर्ये । इतिशब्देनावृत्तेन शब्दादिषु विषयेष्ववान्तरप्रकारभेदः प्रतिपाद्यते। विषयापहृतचेतसो हि वदन्ति- 'इति ह तस्या गीतम् , इति ह तस्याः सुखस्पर्शः, इति ह तस्या रूपं निष्टप्तमिव कनकम्, इति ह तस्याः स्वादिष्ठोऽधरमणिः, इति ह तस्या गन्धो घ्राणतर्पण' इति । एवं दिव्यमानुषभेदोऽपि द्रष्टव्यः। अत्राऽनन्तरमपर इतिशब्दोऽध्याहार्यः । इति ह इति हेति यो ऽयं लोके विषय उच्यते, सामान्यापेक्षमेकवचनम् , एतद्विधूय गुहाशयमनुतिष्ठेत् । कविर्मेधावी ॥५॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

यदिदमिदिहेदिह लोके विषयमुच्यते।
विधूय कविरेतदनुतिष्ठेद्गुहाशयम् ॥ ५ ॥

## प्रस्तावः⑥

कथं तदनुष्ठानमिति ? उच्यते —

## टिप्पनी⑥

यदिदं प्रत्यक्षतोऽवगम्यमानं स्त्र्यन्नपानादिसंभोगलक्षणम् । इदिति किञ्चिदर्थे । यत्किञ्चिदिदं प्रत्यक्षम् । इहाऽस्मिन् लोके। विषयम् । इदंशब्दसामानाधिकरण्यान्नपुंसकलिङ्गप्रयोगो विषयमिति । उभयालिङ्गो वा विषयशब्दः । द्वितीय इच्छब्द इहशब्दश्च । तयोः क्वचिन्नियोगः । इच्छब्दश्चार्थे । इहशब्दोऽमुष्मिन्नर्थे । लोकशब्दः काकाक्षिवदुभयत्र सम्बध्यते । इह लोके इह च लोकेऽमुष्मिंश्च यदिदं विषयमुच्यते, स्वर्गादिलोके पार्श्वस्थमध्यस्थो व्यपदिशति इह लोके इति च लोके इत तत्सर्वं विधूय परित्यज्य । कविः क्रान्तदर्शी, मेधावीत्यर्थः । फलं साधनं च तद्विधूय एषणात्रयाद् व्युत्थायेत्यर्थः । अनुतिष्ठेद् गुहाशयं यथोक्तलक्षणमात्मतत्वम् ॥५॥

#### 06 आत्मन्न् एवाहमलब्ध्वैतद्धितं सेवस्व

आत्मन्न् एवाहमलब्ध्वैतद्धितं सेवस्व नाहितम् । अथान्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया । महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ६

▼

## ⑤

>
▼ Bühler

6. O pupil, I, who had not recognised in my own self the great self-luminous, universal, (absolutely) free Ātman, which must be obtained without the mediation of anything else, desired (to find) it in others (the senses). (But now as I have obtained the pure knowledge, I do so no more.) Therefore follow thou also this good road that leads to welfare (salvation), and not the one that leads into misfortune (new births). 19

▼ हरदत्त-टीका

## सूत्रम्⑥

आत्मन्नेवाऽहमलब्ध्वैतद्धितं सेवस्व नाऽहितम् ।
अथाऽन्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया ।
महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ॥ ६ ॥

### प्रस्तावः⑥

विषयत्यागे हेतुमाह—

## टिप्पनी⑥

शिष्यं प्रत्याचार्यस्य वचनमेतत्। द्वौ चात्र हेतू विषयाणां त्यागे-पराधीनत्वमाहितत्वं च । महान्त गुणतः। तेजसस्कायं तेजसश्शरीरं तेजोराशिं स्वयंप्रकाशम् । [20] 'आत्मज्योतिः सम्राडिति होवाचे'ति बृहदारण्यकम्। सर्वत्र निहितं सर्वगतम् । प्रभुं स्वतन्त्रम् । एवंभूतं गुहाशयं एतावन्तं कालं अहमात्मन् , सप्तम्येकवचनस्य लुक्, आत्मनि । अस्मिन् मदीये सङ्घाते अन्यानपेक्षयैव लब्धुं योग्यमलब्ध्वा अथाऽन्येषु इन्द्रियादिषु तं तं विषयं प्रतीच्छामि लङर्थे लट्, प्रत्यैच्छम् । इदानीं तु तं लब्ध्वा न तथाविधोऽस्मि । त्वमप्येतदेव हितं साधुष्ठानं साधुमार्गं सेवस्व नाहितं विषयानुधावनमिति ॥ ६॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

आत्मन्नेवाऽहमलब्ध्वैतद्धितं सेवस्व नाऽहितम् ।
अथाऽन्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया ।
महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ॥ ६ ॥

### प्रस्तावः⑥

तत् क्वाऽनुष्ठातव्यमिति । उच्यते—

## टिप्पनी⑥

आत्मन्नेव आत्मन्येव । प्रत्यगात्मा हि परमात्मा। सर्वं ह्यत्रानुष्ठेयम् । यदि देहादन्यत्राऽनुष्ठीयेत, सोऽनात्मा कल्पितः स्यात् । तस्माद् देहादिसङ्घात आत्मन्येव विधूय बाह्यासङ्गं गुहाशयमात्मतत्वमनुष्ठेयम् । किमन्येष्वननुष्ठेयमिति भगवतो मतम् ? बाढम्, प्रथममेव नान्येष्वनुष्ठेयमात्मतत्त्वम् । कथं तर्हि ? सर्वप्रयत्नेनाऽपि स्वदेहादिसङ्घाते यथोक्तमात्मतत्त्वं न लभेत, अथाऽहमन्येष्वादित्यादिषु प्रतीच्छामि अभिवाञ्छामि । साधुष्ठानं साधोः परमात्मनः उपलब्धिस्थानं, यत्र गुहाशायं ब्रह्मतत्वमनुष्ठेयम् । अनपेक्षयाऽन्यत् पुत्रवित्तलोकादिसुखं छित्वा निःस्पृहतया । न ह्यात्मानुष्ठानं बाह्यार्थाकाङ्क्षा च सह सम्भवतः । कस्मात् पुनरनेकान्यन्यानि हितप्रकाराण्यनपेक्ष्याऽत्मानुष्ठानमेव यत्नत आस्थीयत इत्यत आहाऽऽचार्यः- यथान्यान्यहितानि हितबुध्या परिगृहीतानि, न तथैवमात्मसेवनम् । किं तर्हि ? (ए)तद्धितमेव । तस्मात् सेवस्वेति । किंविशिष्टश्चाऽऽत्मा सेवितव्य इत्याह- महान्तम् अमितान्तम् अनन्त(र)त्वादबाह्यत्वाच्च महानात्मा, तं महान्तम् । गुणैर्वोपाधिसहचारिभिर्महान्तं, बृंहणमिति यद्वत् । तेजसस्कायं तेजःशरीरमित्यर्थः । चैतन्यात्मज्योतिःस्वरूपम् । तद्धि तेजसां तेजः । (१) 'येन सूर्यस्तपति तेजसेद्धः' (२) 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः। सर्वत्र सर्वदेहेषु ब्रह्मादिस्तम्बपर्यन्तेषु । निहितं स्थितम, उपलब्धिरूपेणाभिव्यक्तमित्यर्थः । न हि ब्रह्मणोऽभिव्यक्तिनिमित्तत्वव्यतिरेकेण कस्यचिदाधारत्वसम्भवः । निराधारं हि ब्रह्म, सर्वगतत्वोपपत्तेः । प्रभुं प्रभवति सर्वानीश्वरान् प्रति, अचिन्त्यशक्तित्वात् । एवमाद्यनन्तगुणविशिष्टमात्मानं सेवस्वेति ॥ ६॥

- १. तै. ब्रा. १३. ९. ७.
- २. मुण्ड, २. २. १०.

#### 07 सर्वभूतेषु यो नित्यो

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः । अनङ्गो ऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्शुचिः । स सर्वं परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम् ७

▼

### ⑤

>
▼ Bühler

7. It is he who is the eternal part in all creatures, whose essence is wisdom, who is immortal, unchangeable, destitute of limbs, of voice, of the (subtle) body, 21 (even) of touch, exceedingly pure; he is the universe, he is the highest goal; (he dwells in the middle of the body as) the Vishuvat day is (the middle of a Sattra-sacrifice); he, indeed, is (accessible to all) like a town intersected by many streets.

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः ।
अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्च्छुचिः।
स सर्वां परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम् ॥७॥

## प्रस्तावः⑥

पुनरप्यसौ कीदृश इत्याह—

## टिप्पनी⑥

सर्वभूतेषु मनुष्यादिषु सङ्घातेषु यो नित्यः विनश्यत्स्वपि न विनश्यति विपश्चित् मेधावी चित्स्वरूपः। अमृतः नित्यत्वादेवाऽमरणधर्मा । अतः ध्रुवः एकरूपः, विकाररहितः । न प्रधानवाद्विकारिणस्सतो धार्मरूपेणाऽस्य नित्यत्वमित्यर्थः । अनङ्गः करचरणाद्यङ्गरहितः । अशब्दोऽस्पर्श इति भूतगुणानामुपलक्षणम् । शब्दादिगुणरहितः अशरीरः सूक्ष्मशरीरेणाऽपि वर्जितः। महाञ्च्छुचिः महत्त्वं शौचस्य विशेषणम् । परमार्थतोऽत्यन्तशुद्धः। स सर्वं प्रकृत्यभेदद्वारेण । स एव परमा काष्ठा, ततः परं गन्तव्याभावाद । स वैषुवतं विषुवान्नाम गवामयनस्य मध्ये भवमहः ।
'एकविंशमेतदहरुपयन्ति विषुवन्तं मध्ये सम्वत्सरस्ये'ति दर्शनात् । विषुवानेव वैषुवतम् ।
तद्यथा सम्वत्सरस्य मध्ये भवति एवमङ्गानामेष मध्ये । 22 मध्यं ह्येषामङ्गानामात्मेति बह्वृचब्राह्मणम् । स एव च वैभाजनं पुरं विविधैर्मार्गैर्भजनीयं विभजनम् । तदेव वैभाजनं प्रज्ञादिरनुशतिकादिश्च । यथा समृद्धं पुरं सर्वैरर्थिभिः प्राप्यमेवमयमपीति ॥७॥

▼ शङ्कराचार्य-विवरणम्

## सूत्रम्⑥

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः ।
अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्च्छुचिः।
स सर्वां परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम् ॥७॥

## टिप्पनी⑥

विशिष्टमात्मानं सेवस्वेति क्रियापदमनुवर्तते । किं च सर्वभूतेषु ब्रह्मादिष्वनित्येषु यो नित्योऽविनाशी । विपश्चिन्मेधावी, सर्वज्ञ इत्यर्थः । अमृतोऽत एव । यो ह्यनित्योऽसर्वज्ञः स मर्त्यो दृष्टः, अयं तु तद्विपरीतत्वादमृतः। ध्रुव अविचलः । निष्कम्पस्वभाव इत्यर्थः । अनङ्गः स्थूलशरीररहित इत्यर्थः । स्थूले हि शरीरे शिरआद्यङ्गानि सम्भवन्ति । अशरीर इति लिङ्गशरीरवर्जित इत्येतत् । अशब्दः नाऽस्य शब्दगुणः सम्भवति । शब्दविद्धि सन् अन्यथा शब्दात्मकः शब्दात्मकमेव विजानीयात् । न चैतदस्ति । अतोऽशब्दः । तथा अस्पर्शः आकाशवायुभूतद्वयगुणप्रतिषेधेन शब्दादयो गन्धावसानाः सर्वभूतगुणाः प्रतिषिद्धा वेदितव्याः। तत इदं सिद्धमाकाशादपि सूक्ष्मत्वम् । शब्दादिगुणबाहुल्याद्वाय्वादिषु स्थौल्यतारतम्यमुपलभ्यते। शब्दादिगुणाभावान्निरतिशयसूक्ष्मत्वं सर्वगतत्वादि चाऽऽप्रतिबन्धेन धर्मजातं तर्केणाऽपि शक्यं स्थापयितुम् ।

- १. बृह.उ. ४. ३ ६. अत्र पाठभेदो दृश्यते.

महान्, अत एव शुचिर्निरञ्जनः। अथवा शुचिः पावन इत्यर्थः । शुचि हि वस्तु पावनं दृष्टम् , यथा लोके वाय्वग्न्यादि । किञ्च य आत्मा प्रकृतः, स सर्वम् । (१)'इदं सर्वं यदयमात्मे'ति हि वाजसनेयके । न ह्यात्मव्यतिरेकेण किञ्चिन्निरूप्यमाणमुपपद्यते । अत एव परमा प्रकृष्टा । काष्ठा अवसानम् । (२) 'सा काष्ठा सा परा गति'रिति काठके । संसारगतीनां अवसानं निष्ठा समाप्तिरित्यर्थः । स वैषुवतं मध्यं सर्वस्य, सर्वान्तरश्रुतेः। विषुवत्सु वा(३) दिवाकीर्त्येषु मन्त्रेषु नित्यं प्रकाश्यं भवतीति वैषुवतः । स परमात्मा ।
ननु स सर्वं परमा काष्ठा सा वैषुवत'मित्युक्तम् । कस्मात् पुनस्तदात्मतत्त्वं विभक्तमुपलभ्यत इति । उच्यते- स परमात्मा वैभाजनं, विभाकर्विभजनं विवेकः आत्मनो यस्मिन् देहे क्रियते, तत् । विभाजनमेव वैभाजनम् । आत्मनो विवेकोपलब्ध्यधिष्ठानं हि शरीरम् । तच्चाऽनेकधा विभक्तम् । तदुपाध्यनुवर्तित्वाद् वैभाजनम् सर्वथा शुद्धमेव सर्वैर्नोपलभ्यते । किं तर्हि ? विभक्तो विपरीतश्चोपलभ्यते ॥ ७॥

#### 08 तं योऽनुतिष्ठेत्सर्वत्र प्राध्वञ्

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चास्य सदाचरेत् । दुर्दर्शं निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे ८

▼

## ⑤

>
▼ Bühler

8. He who meditates on him, and everywhere and always lives according to his (commandments), and who, full of devotion, sees him who is difficult to be seen and subtle, will rejoice in (his) heaven. 23

▼ हरदत्त-टीका

## सूत्रम्⑥

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चाऽस्य सदाऽऽचरेत् ।
दुर्दर्शं निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे ॥८॥

## टिप्पनी⑥

तमेवंभूतमात्मानं योऽनुतिष्ठेदुपासीत यश्चाऽस्य सर्वत्र सर्वास्ववस्थासु सदा प्राध्वमानुकूल्यमाचरेत् । आनुकूल्य प्रतिषिद्धवर्जनं नित्यनैमित्तिककर्मानुष्ठानं च। यश्च दुर्दशं निपुणं24 सूक्ष्मतः युक्तः समाहितो भूत्वा पश्येत् साक्षात्कुर्यात् । सः विष्टपे विगततापे स्वे महिम्नि स्थितो मोदेत सर्वदुःखवर्जितो भवति । संसारदशायां वा तिरोहितं निरतिशयं स्वमानन्दमनुभवतीति ॥८॥

॥ इत्यापस्तम्बसुत्रवृत्तावुज्जलायां द्वाविंशी कण्डिका ॥ २२ ॥

## सूत्रम्⑥

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चाऽस्य सदाऽऽचरेत् ।
दुर्दर्शं निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे ॥८॥

## टिप्पनी⑥

अतस्तदुपाध्यनुवर्तिस्वभावदर्शनमविद्याख्यं हित्वा विद्यया शास्त्रजनितदर्शनेन तं यथोक्तलक्षणमात्मानमनुतिष्ठेत् । सर्वत्र सर्वस्मिन् काले। किञ्च न केवलमनुष्ठानमात्रमस्य । प्राध्वं बन्धनम् आत्मैकत्वरसप्रज्ञतां स्थिरां बाह्यैषणाव्यावृत्तरूपां सर्वसन्यासलक्षणम् । तद्धि बन्धनं विदुषो ब्रह्मणि । एवं हि बद्धो ब्रह्मणि संसाराभिमुखो नाऽऽवर्तते । तस्माद् बन्धनं चाऽस्य सदाऽऽचरेत् । तदनुष्ठानबन्धने सदाचरतः किं स्यादिति ? उच्यते- दुर्दर्श दुःखेन ह्येषणात्यागादिना स दृश्यत इति दुर्दर्शम् । निपुणं यस्माद्धि दुर्दर्शं तस्मान्निपुणम् । अत्यन्तकौशलेन समाहितचेतसा युक्तो यः पश्येत् साक्षादुपलभेत्-अहमात्मेति, स मोदेत् । एवं दृष्टा हर्षमानन्दलक्षणं प्राप्नुयात् । विष्टपे विगतसन्तापलक्षणेऽस्मिन् ब्रह्मणीत्यर्थः ॥ ८ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
4. आप० ध० १.३०.८.↩
5. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
7. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
8. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
9. आप० ध० १.३०.८.↩
10. Manu II, 35.↩
11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
13. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
14. गौ० ध० १. १, २↩
15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
17. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
18. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they

shall be taught this and similar verses only just before the rite is to be performed.↩

19. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

20. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

21. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. Manu II, 69; Yājñ. I, 15.↩

24. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

# २३①

## 01 आत्मन् पश्यन् सर्वभूतानि④

आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः । आत्मानं चैव सर्वत्र यः पश्येत्स वै ब्रह्मा नाकपृष्ठे विराजति १

▼

⑤

>
▼ Bühler

1. That Brāhmaṇa, who is wise and recognises all creatures to be in the Ātman, who pondering (thereon) does not become bewildered, and who recognises the Ātman in every (created) thing, shines, indeed, in heaven.

▼ हरदत्त-टीका

## सूत्रम्⑥

आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः।
आत्मानं चैव सर्वत्र यः पश्यत्स वै ब्रह्मा नाकपृष्ठे विराजति ॥ ९ ॥ १ ॥

## टिप्पनी⑥

सर्वाणि भूतानि आत्मन् आत्मनि शेषत्वेन स्थितानि पश्यन् उपनिषदादिभिर्जानन् । पश्चाच्चिन्तयन् युक्तिभिर्निरूपयन्, यो न मुह्येत् मध्ये मोहं न गच्छेत् । कविर्मेधावी । पश्चाच्च सर्वत्रैव शेषत्वेन स्थितमात्मनं पश्येत् साक्षात्कुर्यात् । स वै ब्रह्मा ब्राह्मणः नाकपृष्ठे तत्सदृशे स्वे महिम्नि स्थितो विराजति स्वयं प्रकाशते ॥१॥

▼ शङ्कराचार्य-विवरणम्

आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः । आत्मानं चैव सर्वत्र यः पश्येत्स वै ब्रह्मा नाकपृष्ठे विराजति १

विवरणम् । किञ्च आत्मन् पश्यन् आत्मनि पश्यन् उपलभमानः । सर्वभूतानि सर्वाणि (भूतानि)। सर्वेषां भूतानामात्मस्वरूपतामेव पश्यन्नित्यर्थः । सवत्राऽऽत्मानं च परम् । न मुह्येत मोह न गच्छेत् । न ह्यात्मैकत्वदर्शिनो मोहावतारः; (१) तत्र को मोह' इति च मन्त्रलिङ्गात्। कीडग्विशिष्टमा स्मदर्शनं मोहनिबर्हणमित्याह--चिन्तयन् उपसंहृतकरणः कविः मेधा वी सन् ध्यायमानः । न शब्दजनितदर्शनमात्रेण मोहापगमः । सर्वभूते. चतुप्रविष्टमकं संव्यवहारकाले यो हि युक्तः पश्येत् , स वै ब्रह्मा ब्राह्मणः । नाकपृष्ठे सुकरागौ(१) ब्रह्मणि । विराजति विविधं दीप्यते ॥९॥

#### 02 निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य

निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति । स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठी विभाजः । तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः २

▼

⑤

>

▼ Bühler

2. He, who is intelligence itself and subtler than the thread of the lotus-fibre, pervades the universe, and who, unchangeable and larger than the earth, contains the universe; he, who is different from the knowledge of this world, obtained by the senses and identical with its objects, possesses the highest (form consisting of absolute knowledge). From him, who divides himself, spring all (created) bodies. He is the primary cause, he is eternal, he is unchangeable. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

निपुणोऽणीयान् बिसोर्णाया यस्सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति । स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽ नन्यस्य ज्ञेयात्परमेष्ठी विभाजः।
तस्मात्कायाःप्रभवन्ति सर्वे समूलं शाश्वतिकः स नित्यः ॥

## टिप्पनी⑥

निपुणो मेधावी चित्स्वरूपः । बिसोर्णाया बिसतन्तोरप्यणीयान् सूक्ष्मः। य सर्वमावृत्य व्याप्य तिष्ठति । यश्च पृथिव्या अपि वर्षीयान् प्रवृद्धतरः सर्वगतत्वादेव सर्वमारभ्य विष्टभ्य शेषित्वेनाऽधिष्ठाय तिष्ठति । ध्रुवः एकरूपः। अस्य जगतो यदिन्द्रियैर्ज्ञानं इन्द्रियजन्यं ज्ञानं तस्मात् । कीदृशात ? अनन्यस्य ज्ञेयात् , पञ्चम्यर्थे षष्ठी, ज्ञेयात् नीलपीताद्याकारादनन्यभूतं नीलपीताद्याकारं, तस्माद्विषज्ञानादन्य इत्यर्थः । श्रूयते च 2 तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमय' इति ।
3 ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम् ॥ इति पुराणम् । स्वभावतः स्वच्छस्य चिद्रूपस्यऽऽत्मनो नीलपीताद्याकारकालुष्यं तद्रूपाया बुद्धेरनुरागकृतं भ्रान्तमित्यर्थः। वैषयिकज्ञानादन्य इति विशेषणेन ज्ञानात्मक इत्यपि सिद्धम्। 4 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति च श्रुतिः। एवंभूतस्याऽऽमा परमेष्ठी परमे स्वरूपे तिष्ठतीति । विभाज इत्यस्य परेण सम्बन्धः । विभजत्यात्मानं देवमनुष्यादिरूपेण नानाशरीरानुप्रवेशेनेति विभाक् । तस्माद्विभाजो निमित्तभूतात् सर्वे काया देवमनुष्यशरीराणि प्रभवन्ति उत्पद्यन्ते । स मूलं प्रपञ्चसृष्टेर्भोक्तृतया मूलकारणम् । स नित्यः अविनाशी । शाश्वतिक एकरूपः अविकारः ॥२॥

▼ शङ्कराचार्य-विवरणम्

निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति । स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठी विभाजः । तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः २

विवरणम्। किञ्च निपुण' सर्ववित् अणीयान् अणुतरो विसोर्णायाः बिसत तन्तोरपि । कोऽसौ ? य प्रकृत आत्मा सर्व समस्तं जगदावृत्य सं. व्याप्य तिष्ठति । किञ्च वर्षीयान् वृद्धतरः स्थूलतरश्च पृथिव्याः। सर्वा. त्मको हि सः । ध्रुव. नित्यः सर्व कृत्स्नमारभ्य संस्तम्भनं कृत्वा । तिष्ठति वर्तते । (२) येन द्यौरुमा पृथवी च बढा' इति मन्त्रलिङ्गात् । स सर्वेश्वरः सर्वज्ञः एको विनेय इत्यर्थः। स परमात्मा इन्द्रियैर्जन्यते यशानं ज गतोऽस्य, तस्मात् ज्ञानादन्यो विलक्षणः, लौकिकज्ञानादन्य इति विशे. षणाज्ज्ञानात्मक इत्यतेत् सिद्धम् । 'सत्यं ज्ञानमनन्तमिति च श्रुतेः। अस्य जगत इन्द्रियजन्यज्ञानादन्य इत्युक्तम् । अतश्च तद्यतिरिक्तं ज. १. इशा. उ. ७. २. ८.७.३. HELP I । .. . आपस्तम्बधर्मसूत्रे (प.८)क.२३. PAL A गदिति प्राप्तम् । अतस्तन्मा भूदित्याह-अनन्यस्य अपृथग्भूतस्य ज. गतः, ज्ञेयात् ज्ञातव्यात् परमार्थस्वरूपाद्वयात् परमेश्वराद् घटादेरिव मदः । स च परमेष्ठी परमे प्रकृष्टे स्वे माहिम्नि हृदाकाशेऽवस्थातुं शीलमस्येति परमेष्ठी । स्वयमेव विभाज' विभक्तो देवपितृमनुष्यादि. ना ज्ञातृशेयज्ञानभेदेन च, यस्मात् स एव ज्ञेय आत्मा स्वतो विभजति जगदनेकधा । तस्मादेवाऽऽत्मनः काया. शारीराण्याकाशादिक्रमेण प्रभवन्ति सर्वे ब्रह्मादिलक्षणाः। अतो मूलं स जगतः । (१) यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः । अत एव स शाश्वतिकः । यो हि पृथिव्यादिविकार, सोऽबादिक्रमेण विनश्येत् , पर मूलकारणमापद्यते, सोऽशाश्वतिकोऽ नित्यः । अयं चाऽऽत्मा परं मूलम् । न तस्याऽप्यन्यन्मूलमस्ति, यतो जा. तो विनश्येत् , मूलमापद्यते, ततस्तद्विलक्षणत्वाच्छाश्वतिकः शश्वदे. करूपः । अतो नित्यः एकत्वमहत्वमूलत्वेभ्यश्च ॥ १० ॥

- १. तै. उ. ३. १.

#### 03 दोषाणान् तु विनिर्घातो

दोषाणां तु विनिर्घातो योगमूल इह जीविते । निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ३

▼

⑤

>

▼ Bühler

3. But the eradication of the faults is brought about in this life by the means (called Yoga). A wise man who has eradicated the (faults) which destroy the creatures, obtains salvation.

▼ हरदत्त-टीका

## सूत्रम्⑥

दोषाणां तु निर्घातो योगमूल इह जीविते ।
निर्हृत्य भूत दाहीयान् क्षेमं गच्छति पण्डितः ॥ ११ ॥ ३ ॥

## टिप्पनी⑥

दोषाणां वक्ष्यमाणानां क्रोधादीनां निर्घातः निर्मूलनम् । इह जीविते योगमूलः योगाः वक्ष्यमाणा अक्रोधादयः तन्मूलकः । अतश्च तान् भूतदाहीयान् भूतानि दहतः क्रोधादीन्दोषान् निर्हृत्य क्षेमं गच्छति आत्मत्राणद्वारेण । पण्डितो 5लब्धज्ञानः आत्मसाक्षात्कारी । क्षेमं अभयं मोक्षम् 6अभयं वै जनक प्राप्तोऽसीति बृहदारण्यकम् ॥ समाप्ताः श्लोकाः ॥ ३ ॥

▼ शङ्कराचार्य-विवरणम्

दोषाणां तु विनिर्घातो योगमूल इह जीविते । निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ३

विवरणम् । एवं यथोक्तमात्मान विदितवत आध्यात्मिका योगा न्यायसहिता अप्रतिबन्धेन भविष्यन्ति । मिथ्याप्रत्ययपूर्वका हि दोषाः। दोषनिमिः सश्च धर्माधर्मजनितः ससारः दोषनिवृत्तावत्यन्तं विनिवर्तते इत्येतम. थै दर्शयिष्यन्नाह--

दोषाणां तु निर्घातो योगमूल इह जीविते । निहत्य भूत दाहीयान् क्षेमं गच्छति पण्डितः ॥ ११ ॥ ३ ॥ ___ दोषाणां तु क्रोधादीनां निर्घात विनाशः। योगा अक्रोधादयः, त. न्मूलः तनिमित्तमित्येतत् । अक्रोधादिषु हि सत्सु प्रतिद्वन्द्विनो दोषा दुर्बलत्वानिहन्यन्ते । इह जवित इति दोषप्रभवकमीनीमत्तत्वाज्जीवित तस्य देहधारणावसानो दोषव्यापार इत्येतद् दर्शयति । तत्प्रतिपक्षेश्व क्रोधादिषु कथं नु नाम मुमुक्षवः प्रयत्नातिशय कुयुरिति योगदोषयो रितरेतरविरोधित्वे सति स्थितिगतिवद् योगेभ्यो दोषाणामेव निर्घातः, न तु विपर्यय इत्येतत् । कथामिति चेत् ? उच्यते- सम्यग्दर्शनसचिव. त्वाद् बलवन्तो योगाः । मिथ्याप्रत्ययसचिवक्त्वात दुर्बलत्वानिहन्यन्ते । निहन्तीत्येतदप्युक्तम् । बुद्धिबलवद्धयस्तद्धीनानां लोके निर्घातो दृष्टः । 'अक्रोधनः' (१. १. २३) 'क्रोधादींश्च---' (१. ११. २५) इति लि नात् । निर्हत्य अपहृत्य । भूतदाहान् दोषेषु(न?) ह्यद्धुतेषु भूतानि द. हन्त इव अग्निना परितप्यन्ते । अतो भूतदाहा दोषा उच्यन्ते । तान् निहत्य । क्षेमं निर्भय मोक्षं गच्छति। ___"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"अभयं वै जनक प्राप्तो अलि' न भवति विदषां ततो भयम' इत्यादिश्रतिस्मतिभ्य. । न दोषप्रशममात्रेणाऽब्रह्मविदः क्षेमप्राप्तिरित्याह-पण्डित इति । ब्रह्मविदि ह्यत्र पण्डितशब्दः प्रयुक्तो, न शास्त्रविदि । (१)"तस्माद् ब्राह्मणः पा ण्डित्य निर्विद्य" इति श्रुतेः । इहाऽऽत्मविद्याधिकारात । यदि तर्हि दोषनिहरणं पण्डितोऽप्यपक्षेत, तं प्रति न हि ब्रह्मवि द्या क्षेमप्राप्तिनिमित्तम् । यदि ब्रह्मविद्यैव क्षेमप्राप्तिनिमित्तं, ब्रह्मविद्या नन्तरमेव न दुःखमुपलभेत । नैष दोषः । उक्तो ह्यत्र परिहारः--सम्यग ज्ञानबलावष्टम्भाद् बलिनो योगा दुर्वलान् दोषान् मिथ्याप्रत्ययभवान् निहन्तुमलमिति । तस्माद् ब्रह्मविद्ययैव क्षेमप्राप्तिः । अन्यथा दोषनिह रणकर्मक्षययोरसम्भवात् । १. ब. उ. ३. ५. १. wwwPhomemain ८ आपस्तम्बधर्मसूत्रे (प.८)क.२३ विद्यया चेद् दोषनिहरणकर्मक्षयावश्यं भवतः, तत इदमयनका. यत्वाद् दोषनिहरणस्य नित्यानुवाद रूपमनर्थकम्, निहत्येति, न, प्रवृत्तकर्माक्षिप्तत्वाद् दोषाणाम्। द्विविधानि बनेकजन्मान्तरकृतानि कर्माणि-फलदानाय प्रवृत्तान्यप्रवृत्तानि च । यत्तु प्रवृत्त कर्म, तेनाक्षि ना दोषाः कर्तुः सुखदुःखादिफलदानाय, दोषाभावे फलारम्भकत्वा. नुपपत्तेः । न हि रागद्वेषादिशून्ये सुखदुःख प्रवृत्तिलब्धिः कदाचित् कस्यचिदिह दृश्यते । तस्मात् फलदानाय प्रवृत्तेन कर्मणाक्षिप्ता दोषाः प्रसङ्गेन प्राप्तबला यत्नतो निहर्तव्या । प्रवृत्याधिक्यहेतुत्वप्रसङ्गात् । अत एवेदमुक्तम्-दोषाणां तु निर्घातो योगमूले इह जीवित इति। मन्द. मध्यमोत्तमापेक्षत्वाच्च । ब्रह्मविदामपि न सर्वेषां समा बह्मप्रतिपत्तिः, विवेकातिशयदर्शनात कस्याचत । 'एष ब्रह्मविदां वरिष्ट' इति च श्रुतः सम्यग्दर्शनसम्पन्न' इति च स्मृतः। मन्दमध्यमब्रह्मविदपेक्षया त्याग. वैराग्येन्द्रियजयाविधेरर्थवत्त्वम् : उत्तम

ब्रह्मविदां त्वर्थप्राप्तमेतत् सवमि. त्यनुवादमात्रम् । (१) रसोऽप्यस्य परं दृष्ट्वा निवर्तते, इति वचनात् गुणा तीत्तलक्षणवचनेभ्यश्च । प्रवृत्तकांक्षिप्तदोषात् तजानतचेष्टाभ्यश्च भ. वति विदुषोऽपि देहान्तरोत्पत्तिरिति चेद-मुक्तषुवत् प्रवृत्तकाक्षिप्त त्वाद् विद्वहोषचेष्टानां प्रवृत्त कर्मविभागनवोपक्षीणशक्तित्वात प्रयोजना न्ताराभावाच्च न जन्मान्तरारम्भकत्वमुपपद्यते । यद्यप्रवृत्तं कम, तत सत्यवावस्थमेव ब्रह्मविद्याहुताशनदग्धबीजशक्तित्वाचाल जन्मान्तरार. म्भाय, 'क्षीयन्ते चाऽस्य कमाणि'(२) 'ज्ञानाग्निः सर्वकमाणि'इत्यादिश्रु. तिस्मृतिभ्यः । अतः सिद्धा पण्डितस्य दोषनिहरणात क्षमप्राप्तिः ॥ ११॥

१. श्रीभ० गीता० २. ५९. २. श्रीभगव. ४. ३७.
#### 05 अथ भूतदाहीयान्दोषानुदाहरिष्यामः

अथ भूतदाहीयान्दोषानुदाहरिष्यामः ४

▼

### ⑤

>
▼ Bühler

4. Now we will enumerate the faults which tend to destroy the creatures.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ भूतदाहीयान्दोषानुदाहरिष्यामः ॥ १२ ॥ ४॥

## टिप्पनी⑥

भूतानां दाहो भूतदाहः तस्मै हिताः भृतदाहीयाः तस्मै हितमिति छः।

#### 05 क्रोधो हर्षो

क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥ १३ ॥ ५ ॥

▼

### ⑤

>
▼ Bühler

5. (These are) anger, exultation, grumbling, covetousness, perplexity, doing injury, hypocrisy, lying, gluttony, calumny, envy, lust, secret hatred, neglect to keep the senses in subjection, neglect to concentrate the mind. The eradication of these (faults) takes place through the means of (salvation called) Yoga.

▼ हरदत्त-टीका

## सूत्रम्⑥

क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥ १३ ॥ ५ ॥

## टिप्पनी⑥

7ताडनाक्रोशादिहेतुकोऽन्तःकरणविक्षोभः स्वेदकम्पादिलिङ्गः क्रोधः । हर्षः इष्टलाभाच्चेतस उद्रेको रोमाञ्चादिलिङ्गः । रोषः क्रोधस्यैव कियानपि भेदो मित्रादिषु प्रतिकूलेषु मनसो वैलोम्यमात्रकार्यकरः। लोभो द्रव्यसङ्गः, यो धर्मव्ययमपि रुणद्धि । मोहः कार्याकार्ययोरविवेकः। स च प्रायेण क्रोधादिजन्योऽपि पृथगुपदिश्यते कदाचित्तदभावेऽपि सम्भवतीति । दम्भो धार्मिकत्व8प्रकाशनेन लोकवञ्चनम् । द्रोहोऽपकारः। मृषोद्यमनृतवादः । अत्याशोऽत्यशनम् । परीवादः परदोषाभिधानम् । असूया परगुणे9ष्वक्षमा । कामः स्त्रीसंसर्गः । मन्युः गूढो द्वेषः । अनात्म्य अजितेन्द्रियत्वं जिह्वाचापलादि । अयोगो विक्षिप्तचित्तता । एते भूतदाहीया दोषाः । तेषां योगमूलो निर्घातः ॥५॥

#### 06 अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ६

▼

## ⑤

>
▼ Bühler

6. Freedom from anger, from exultation, from grumbling, from covetousness, from perplexity, from hypocrisy (and) hurtfulness; truthfulness, moderation in eating, silencing a slander, freedom from envy, self-denying liberality, avoiding to accept gifts, uprightness, affability, extinction of the passions, subjection of the senses, peace with all created beings, concentration (of the mind on the contemplation of the Ātman), regulation of one's conduct according to that of the Āryas, peacefulness and contentedness;--these (good qualities) have been settled by the agreement (of the wise) for all (the four) orders; he who, according to the precepts of the sacred law, practises these, enters the universal soul.

▼ हरदत्त-टीका

## सूत्रम्⑥

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन् विधिना 10सार्वगामी भवति ॥ १४ ॥ ६॥

## प्रस्तावः⑥

के पुनस्ते योगा इति, उच्यते —

## टिप्पनी⑥

के पुनस्ते योगाः ? तानाह—
एते चाऽक्रोधादयोऽपि भावरूपाः न क्रोधाद्यभावमात्रम् , क्रोधादिनिर्घातहेतुतयोपदेशात् । के पुनस्ते ? अक्रोधः, क्रोधादिषु प्रसक्तेष्वपि मा कार्षमिति सङ्कल्पः। अहर्षः, इष्टलाभालाभेषु चेतस ऐकरूप्यम् । अरोषः मित्रादिषु प्रतिकूलेष्वपि मनोविकाराभावः । अलोभः सन्तोषोऽलम्बुद्धिः। अमोहोऽवधानम् । अदम्भो धर्मानुष्ठानम् । अद्रोहः परेष्वपकारिष्वप्यनपकारः । अनसूया परगुणेष्वभिमोदनम् । सत्यवचनं यथादृष्टार्थवादित्वम् । सम्विभागः आत्मान11मुपरुध्याऽप्यग्रादिदानम् । त्यागोऽपरिग्रहः । आर्जवं मनोवाक्कायानामेकरूपत्वम् । मार्दवं सूपगम्यता। शमः मन्युपरित्यागः । दमः12इन्द्रियजयः । एताभ्यामेव गतत्वात् पूर्वस्वस्मिन् क्रमे अकामः, अमन्युः, आत्मवत्वमिति नोपदिष्टम् । सर्वभूतैरविरोधः । सर्वग्रहणं क्षुद्रैरविरोधार्थम् । योगः ऐकाप्यम् । आर्याणां भावः आर्यं शिष्टाचारानुपालनम् । आनृशंसं आनृशंस्यं व्यवहारवचनादौ प्रसक्तनैष्ठुर्यस्य वर्जनम् । तुष्टिरनिर्वेदः । समयो ब्यवस्था । सा च प्रकरणाद्धर्मज्ञानाम् । पदं विषयः । एते अक्रोधादयः सर्वेषामाश्रमाणां सेव्याः, न केवलं योगिनामेवेति धर्मज्ञानां समय इत्यर्थः । एते हि भाव्यमानाः क्रोधादीनू समूलघातं घ्नन्ति । अतश्च तान्यनुतिष्ठन् विधिना सार्वगामी भवति । तान्यक्रोधादीनि तुष्ट्यन्तानि । विधिना यथाशास्त्रम् । अनुतिष्ठन् सार्वगामी सर्वस्मै हितः सार्वः आत्मा तं गच्छति प्राप्नोति। 'विधिने'ति वचनात्13प्राणिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेत् ।' इत्यादिके विषये अनृतवचनादावपि न दोष इति ॥ ६ ॥

इति श्रीहरदत्तविरचितायामापस्तम्बधर्मसत्रवृत्तावुज्वलायां त्रयोविंशी कण्डिका ॥ २३ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामु ज्ज्वलायां प्रथमप्रश्नेऽष्टमः पटलः ॥८॥ .

▼ शङ्कराचार्य-विवरणम्

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ६

विवरणम् । __ अक्रोधोऽहर्षः इत्येवमाद्या अयोगविपरीताः । अतस्ते समाधिलक्षण स्वाद योगा। सविभागः आत्मनो यात्रालाधनस्याऽर्थिभ्यः संविभजनम् । स्यागः दृष्टादृष्टेष्टभोगानां शक्तितः परित्यजम् , तत्साधनानां च । आर्जवम् ऋजुता, अदुष्टाकलनपूर्विका वाङ्गनाकायानां प्रवृतिः। मार्दव मृदुत्वम् । शमोऽन्तःकरणोपशमः। दमो बाह्यकरणापेशमः। इदमन्यद् योगलक्षणं संक्षेपत उच्यते-सर्वभूताविरोधो योगः, विरोघे हि भूतानां पीडा, तदभावेऽपीडा । स एव सर्वभूतापीडालक्षणो योगः। आर्यम् आर्याणां भावः अक्षुद्रता । आनृशंसम् आनृशंस्यम् , अक्रौर्यम् । तुष्टिः लब्धव्यस्याऽलाभेऽपि चेतसा प्रसन्नतयाऽवस्थानं लाभ इव । सर्व भताविरोलक्षणांहिला परिव्राजकस्यैव सम्भवतीत्यायर्यादीनां त्रया. णामन्येषां चाविरुद्धानां सर्वाश्रमान प्रति प्राप्तिरितीतिशब्दसाम द्,ि इतिशब्दस्य च प्रकारवचनत्वादार्यादीनीत्थंप्रकाराणि सर्वाश्र मान् प्रति गमयति सर्वाश्रमाणां समयपदानोति । समयस्थानानीत्ये तत् । अवश्यानुष्ठेयानीत्यर्थः । तान्येतानि यथोक्तान्यनुतिष्ठन् विधिना सर्वगामी सर्वगमनशीलः, शानाभिव्यक्तिक्रमेण । भवति मुच्यते इत्यर्थः ।। इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवत्पादाचार्यस्य कृतिषु आपस्तम्बीयधर्मशास्त्राध्यात्मपटलविवरणम् ॥

इति अष्टमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
4. आप० ध० १.३०.८.↩
5. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
6. आप० ध० १.३०.८.↩
7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
9. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

12. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

13. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

**၀၉①**

# २४①

## 01 क्षत्रियं हत्वा गवां④

क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् १

▼

## ⑤

>
▼ Bühler

1. He who has killed a Kṣatriya shall give a thousand cows (to Brāhmaṇas) for the expiation of his sin. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् ॥ १ ॥

## टिप्पनी⑥

क्षत्रियं हत्वा गवां सहस्रं ब्राह्मणेभ्यो दद्यात्। किमर्थम् ? वैरयातनार्थं वैरं पापं तस्य यातनं निहरणं तदर्थम् "ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थ" (२४.४)इति वक्ष्यति । तेन प्रायश्चित्तरूपमिदं दानम्। प्रायश्चित्तं च पापक्षयार्थम् । तत्किमर्थं वैरयातनार्थमित्युच्यते ? केचिन्मन्यन्ते नाऽभुक्तं क्षीयते कर्म पुण्यमपुण्यं च । प्रायश्चित्तं तु नैमित्तिकं कर्मान्तरं 2यथा गृहदाहादौ क्षामवत्यादय इति । तान्निराकर्तुमिदमुक्तम् । श्रौतेऽप्युक्तं-3दोषनिघातार्थानि भवन्ती'ति । अपर आह-यो येन हन्यते स हतो म्रियमाणस्तस्मिन्वैरं करोति-अपि नामाऽहमेनं जन्मान्तरेऽपि वध्यासमिति । तस्य वैरस्य यातनार्थमिदमिति प्रायश्चित्तार्थत्वमपि वक्ष्यमाणेन सिद्धमिति ॥ १॥

#### 02 शतं वैश्ये

शतं वैश्ये २

▼

## ⑤

>
▼ Bühler

2. (He shall give) a hundred cows for a Vaiśya, 4

▼ हरदत्त-टीका

## सूत्रम्⑥

शतं वैश्ये ॥२॥

## टिप्पनी⑥

वैश्ये हते गवां शतं दद्यात् ॥ २॥

#### 03 दश शूद्रे

दश शूद्रे ३

▼

## ⑤

>
▼ Bühler

3. Ten for a Śūdra, 5

▼ हरदत्त-टीका

## सूत्रम्⑥

दश शूद्रे ॥३॥

## टिप्पनी⑥

शूद्रे हते दश दद्यात् । गा इति प्रकरणागम्यते ॥३॥

#### 04 ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थः

ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थः ४

▼

## ⑤

>
▼ Bühler

4. And in every one (of these cases) one bull (must be given) in excess (of the number of cows) for the sake of expiation.

▼ हरदत्त-टीका

## सूत्रम्⑥

ऋषभश्चाऽत्राधिकः सर्वत्र प्रायश्चित्तार्थः॥ ४॥

## टिप्पनी⑥

सर्वेष्वेतेषु निमित्तेषु ऋषभोऽप्यधिको देयः। न केवलं गा एव । इदं प्रायश्चित्तत्रयं मानवेन समानविषयम् । यथाऽऽह—

6अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः ।
ऋषभैकसहस्रा गा दद्याच्छुद्ध्यर्थमात्मनः ॥
त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम् ।
वलन् दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः।
प्रमाप्य वैश्यं वृत्तस्थ दद्याद्वैकशतं गवाम् ॥
एतदेव व्रतं कृत्स्नं षण्मासान्श्छूद्रहा चरेत् ।
ऋषभैकादशा वाऽपि दयाद्विप्राय गास्सिताः ॥ इति ॥४॥

#### 05 स्त्रीषु चैतेषामेवम्

स्त्रीषु चैतेषामेवम् ५

▼

## ⑤

>
▼ Bühler

5. And if women of the (three castes mentioned have been slain) the same (composition must be paid).

▼ हरदत्त-टीका

## सूत्रम्⑥

स्त्रीषु चैतेषामेवम् ॥ ५॥

## टिप्पनी⑥

एतेषां क्षत्रियादीनां स्त्रीषु च हतासु एवमेव प्रायश्चित्तं यथा पुरुषेषु॥५॥

#### 06 पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं

पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाभिशस्तः ६

▼

## ⑤

>
▼ Bühler

6. He who has slain a man belonging to the two (first-mentioned castes) who has studied the Veda, or had been initiated for the performance of a Soma-sacrifice, becomes an Abhiśasta. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाऽभिशस्तः ॥६॥

## टिप्पनी⑥

उक्तेषु यौ पूर्वौ वर्णौ क्षत्रियवैश्यौ तयोर्यो वेदाध्यायः अधीतवेदः तं हत्वा अभिशस्तो भवति । अभिशस्त इति ब्रह्मघ्नोऽभिधानम् । सवनगतं वा, तयोरेव वर्णयोः यः सवनगतः सवनशब्देन न प्रातस्सवनादीन्युच्यन्ते, नापि यागमात्रम् । किं तर्हि ? सोमयागः। तत्र यो दीक्षितः सवनगतः 'ब्राह्मणो वा एष जायते यो दीक्षित' इति दर्शनात्। तं च हत्वाऽभिशस्तो भवति । पूर्वयोर्वर्णयोरिति किम् ? ब्राह्मणे मा भूत् । इष्यते ब्राह्मणे। वक्ष्यति च 'ब्राह्मणमात्रं 'चे'(२४.७.)ति। एवं तर्हि शूद्रे मा भूत् । न शुद्रो वेदाध्यायः सवनगतो वा भवति । इदं तर्हि प्रयोजनं पूर्वयोर्वर्णयोरेव यथा स्यात्तयोरेव यावनुलोमी8 करणाम्बष्ठौ तयोर्मा भूदिति । तेनान्ये वर्णधर्मा अनुलोमानामपि भवन्ति ॥ ६ ॥

#### 07 ब्राह्मणमात्रञ् च

ब्राह्मणमात्रं च ७

▼

## ⑤

>
▼ Bühler

7. And (he is called an Abhiśasta) who has slain a man belonging merely to the Brāhmaṇa caste (though he has not studied the Veda or been initiated for a Soma-sacrifice),

▼ हरदत्त-टीका

## सूत्रम्⑥

ब्राह्मणमात्रं च ॥ ७ ॥

## टिप्पनी⑥

हत्वाऽभिशस्तो भवति । मात्रग्रहणान्नाऽभिजनविद्यासंस्काराद्यपेक्षा ॥

#### 08 गर्भञ् च तस्याविज्ञातम्

गर्भं च तस्याविज्ञातम् ८

▼

### ⑤

>
▼ Bühler

8. Likewise he who has destroyed an embryo of a (Brāhmaṇa, even though its sex be) undistinguishable,

▼ हरदत्त-टीका

## सूत्रम्⑥

गर्भ च तस्याऽविज्ञातम् ॥ ८॥

## टिप्पनी⑥

तस्य ब्राह्मणमात्रस्य । गर्भं च स्त्रीपुन्नपुंसकभेदेनाऽविज्ञातम् । हत्वाभिशस्तो भवति ॥८॥

#### 09 आत्रेयीञ् च स्त्रियम्

आत्रेयीं *(=ऋतुस्नाताम्)* च स्त्रियम् ९

▼

### ⑤

>
▼ Bühler

9. Or a woman (of the Brāhmaṇa caste) during her courses. 9

▼ हरदत्त-टीका

## सूत्रम्⑥

आत्रेयीं च स्त्रियम् ॥९॥

## टिप्पनी⑥

10 'ऋतुस्नातामात्रेयीमाहु'रिति वसिष्ठः । तस्येति वर्तते । आत्रेयीं च ब्राह्मणनस्त्रियं हत्वाऽभिशस्तो भवति । ब्रह्महा भवति । सम्भवत्यस्यां ब्राह्मणगर्भ इति । अत्रिगोत्रजा आत्रेयीत्यन्ये ॥ ९॥

#### 10 तस्य निर्वेषः

तस्य निर्वेषः *(=प्रायश्चित्तम्)* १०

▼

### ⑤

>
▼ Bühler

10. (Now follows) the penance for him (who is an Abhiśasta).

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्य निर्वेषः ॥ १० ॥

## टिप्पनी⑥

तस्य सर्वप्रकाराभिशस्तस्य निर्वेषः प्रायश्चित्तं वक्ष्यते ॥१०॥

#### 11 अरण्ये कुटिङ् कृत्वा

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽर्धशाणीपक्षमधोनाभ्युपरिजान्वाच्छाद्य ११

▼

### ⑤

>
▼ Bühler

11. He (himself) shall erect a hut in the forest, restrain his speech, carry (on his stick) the skull (of the person slain) like a flag, and cover the space from his navel to his knees with a quarter of a piece of hempen cloth. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽधशाणोपक्षमधोनाभ्युपरिजान्वाच्छाद्य ॥ १ ॥

## टिप्पनी⑥

कृत्वेति वचनान्न परकृता कुटी ग्राह्या । वाक् यता नियता येन स वाग्यतः वाचयमः। आहिताग्न्यादिषु दर्शनात् निष्ठान्तस्य परनिपातः। शवशिरः ध्वजो यस्य स शवशिरोध्वजः । सकारलोपश्छान्दसः। स्वव्यापादितस्य शिरो ध्वजदण्डस्याग्रे प्रोतं कृत्वेत्यर्थः यस्य कस्यचिच्छवस्येत्यन्ये । शणस्य विकारःशाणी पटी तस्या अर्धमर्धशाणी तस्याः पक्षमर्धशाणीपक्ष आयामविस्तारयोरुभयोरप्यर्धम् । अधो नाभि उपरिजानु च यथा भवति तथा तावन्तं प्रदेशमाच्छाद्य । सापेक्षत्वात् 'ग्रामे प्रतिष्ठेते'(२४.१४.)ति वक्ष्यमाणेन सम्बन्धः । मध्ये क्रियान्तरविधिः ॥११॥

#### 12 तस्य पन्था अन्तरा

तस्य पन्था अन्तरा वर्त्मनी १२

▼

## ⑤

>
▼ Bühler

12. The path for him when he goes to a village, is the space between the tracks (of the wheels).

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्य पन्था अन्तरा वर्मनी ॥ १२॥

## टिप्पनी⑥

तस्य ग्रामं प्रविशतः वर्त्मनी अन्तरा शकटादेर्वत्मनोर्मध्ये पन्था वेदितव्यः । अपर आह- यत्र रथ्यादावुभयोः पार्श्वयोर्वर्त्मनी भवतः तत्र तयोर्मध्येन सूकरादिपथेन सञ्चरेदिति ॥ १२ ॥

#### 13 दृष्ट्वा चान्यमुत्क्रामेत्

दृष्ट्वा चान्यमुत्क्रामेत् १३

▼

## ⑤

>
▼ Bühler

13. And if he sees another (Ārya), he shall step out of the road (to the distance of two yards).

▼ हरदत्त-टीका

## सूत्रम्⑥

दृष्ट्रा चाऽन्यमुत्क्रामेत् ॥ १३ ॥

## टिप्पनी⑥

अन्यमार्यं दृष्ट्वा पथ उत्क्रामेत् । तत्र कौटिल्यः12 'पञ्चारत्नयो रथपथश्चत्वारो हस्तिपथः द्वौ क्षुद्रपशुमनुष्याणा'मिति । तेन मनुष्येषु द्वौ हस्तावुत्क्रामेदिति ॥ १३॥

#### 14 खण्डेन लोहितकेन शरावेण

खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत १४

▼

## ⑤

>
▼ Bühler

14. He shall go to the village, carrying a broken tray of metal of an inferior quality.

▼ हरदत्त-टीका

## सूत्रम्⑥

खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत ॥१४॥

## टिप्पनी⑥

खर्परमात्रं खण्डम् । 13लोहितकमनाप्रीतम् । एवम्भूतं शरावं भिक्षा पात्रं गृहीत्वा ग्रामे प्रतिष्ठेत । ग्रामं गच्छेत् ॥ १४ ॥

#### 15 कोऽभिशस्ताय भिक्षामिति सप्तागाराणि

कोऽभिशस्ताय भिक्षामिति सप्तागाराणि चरेत् १५

▼

## ⑤

>
▼ Bühler

15. He may go to seven houses only, (crying,) 'Who will give alms to an Abhiśasta?'

▼ हरदत्त-टीका

## सूत्रम्⑥

कोऽभिशस्ताय भिक्षामिति14 सप्ताऽगारं चरेत् ॥१५॥

## टिप्पनी⑥

15अभिशस्तो ब्रम्हहा । तस्मै मह्यं को धार्मिको भिक्षां ददातीति उच्चैर्ब्रुवाणः सप्ताऽगाराणि चरेत् । सप्तग्रहणमधिकनिवृत्यर्थम् । द्वित्रेष्वागारेषु यदि पर्याप्तं लभ्यते तदा तावत्येव ॥ १५ ॥

#### 16 सा वृत्तिः

सा वृत्तिः १६

▼

## ⑤

>
▼ Bühler

16. That is (the way in which he must gain) his livelihood.

▼ हरदत्त-टीका

## सूत्रम्⑥

सा वृत्तिः॥ १६॥

## टिप्पनी⑥

सप्तस्वगारेषु या च यावती लभ्यते सैव वृत्तिः अपर्याप्ताऽपि ॥१६॥

#### 17 अलब्धोपवासः

अलब्धोपवासः १७

▼

## ⑤

>
▼ Bühler

17. If he does not obtain anything (at the seven houses), he must fast.

▼ हरदत्त-टीका

## सूत्रम्⑥

अलब्ध्वोपवासः ॥ १७ ॥

## टिप्पनी⑥

यदि सप्तागारेषु न किञ्चिल्लभ्यते तदोपवास एव तस्मिन्नहनि ॥

#### 18 गाश्च रक्षेत्

गाश्च रक्षेत् १८

▼

## ⑤

>
▼ Bühler

18. And (whilst performing this penance) he must tend cows.

▼ हरदत्त-टीका

## सूत्रम्⑥

गाश्च रक्षेत् ॥१८॥

## टिप्पनी⑥

एवं प्रायश्चित्तं कुर्वन्नहरहर्गाश्च रक्षेत् ॥ १८॥

#### 19 तासान् निष्क्रमणप्रवेशने द्वितीयो

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः १९

▼

## ⑤

>
▼ Bühler

19. When they leave and enter the village, that is the second occasion (on which he may enter) the village.

▼ हरदत्त-टीका

## सूत्रम्⑥

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः ॥ १९ ॥

## टिप्पनी⑥

तासां गवां निष्क्रमणसमये प्रवेशनसमये च द्वितीयो ग्रामेऽर्थः प्रयोजनम् । भिक्षार्थ प्रथममुक्तम् । नाऽन्यथा ग्रामं प्रविशेदित्युक्तं भवति ॥

#### 20 द्वादश वर्षाणि चरित्वा

द्वादश वर्षाणि चरित्वा सिद्धः सद्भिः संप्रयोगः २०

▼

## ⑤

>
▼ Bühler

20. After having performed (this penance) for twelve years, he must perform) the ceremony known (by custom), through which he is re-admitted into the society of the good. 16

▼ हरदत्त-टीका

## सूत्रम्⑥

द्वादश वर्षाणि17 चरित्वा सिद्धः सद्भिस्सम्प्रयोगः ॥२०॥

## टिप्पनी⑥

एवं द्वादश वर्षाणि व्रतमेतच्चरित्वा सद्भिः सम्प्रयोगः कर्तव्यः । सद्भिः सह सम्प्रयुज्यते येन विधिना स कर्तव्यः। स शिष्टाचारे शास्त्रान्तरे च सिद्धः स उच्यते-कृतप्रायश्चित्तः स्वहस्ते यवसं गृहीत्वा गामाह्वयेत् । सा यद्यागत्य श्रद्धाना भक्षयति तदा सम्यगनेन व्रतं चरितमिति जानीयात् , अन्यथा नेति ॥ २० ॥

#### 21 आजिपथे वा कुटिम्कृत्वा

आजिपथे वा कुटिङ्कृत्वा ब्राह्मणगव्योपजिगीषंआणो वसेत्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः २१

▼

## ⑤

>
▼ Bühler

21. Or (after having performed the twelve years' penance), he may build a hut on the path of robbers, and live there, trying to take from them the cows of Brāhmaṇas. He is free (from his sin), when thrice he has been defeated by them, or when he has vanquished them. 18

▼ हरदत्त-टीका

## सूत्रम्⑥

आजिपथे वा कुटिं कृत्वा ब्राह्मणगव्योऽपजिगीषमाणो वसेस्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः ॥ २१ ॥

## टिप्पनी⑥

सङ्ग्रामेण जेतव्या दस्यवो येन पथा ग्रामं प्रविश्य गवादिकमपहृत्याऽपसरन्ति स आजिपथः । तस्मिन्वा कुटिं कृत्वा वसेत् । किं चिकीर्षन् ? ब्राह्मणगव्यः 19 'वा छन्दसी'ति पूर्वसवर्णाभावे यणादेशः। ब्राह्मणगवीरपजिगीषमाणः दस्यूनपजित्य प्रत्याहर्तुमिच्छन् । एष वसन् दस्युभिर्ह्रियमाणं गवादिकमुद्दिश्य तैर्युद्धं कुर्वन् त्रिः प्रतिराद्धः तैरपजितः अपजित्य वा तान् गवादिकं प्रत्याहृत्य ब्राह्मणेभ्यो दत्वा मुक्तो भवति तस्मादेनसः । द्वादशवार्षिके प्रवृत्तस्येदम् । एवमुत्तरमपि ॥ २१ ॥

#### 22 आश्वमेधिकं वावभृथमवेत्य मुच्यते

आश्वमेधिकं वावभृथमवेत्य मुच्यते २२

▼

## ⑤

>
▼ Bühler

22. Or he is freed (from his sin), if (after the twelve years' penance) he bathes (with the priests) at the end of a horse-sacrifice. 20

▼ हरदत्त-टीका

## सूत्रम्⑥

आश्वमेधिकं वाऽवभृथमवेत्य मुच्यते ॥ २२ ॥

## टिप्पनी⑥

अथ वाऽश्वमेधावभृथे स्नात्वा मुच्यते ॥ २२ ॥

#### 23 धर्मार्थसन्निपातेऽर्थग्राहिण एतदेव

धर्मार्थसंनिपातेऽर्थग्राहिण एतदेव २३

▼

## ⑤

>

▼ Bühler

23. This very same (penance is ordained) for him who, when his duty and love of gain come into conflict, chooses the gain. 21

▼ हरदत्त-टीका

## सूत्रम्⑥

धर्मार्थसन्निपातेऽर्थग्राहिण एतदेव ॥ २३ ॥

## टिप्पनी⑥

धर्मस्याऽग्निहोत्रादेः, अर्थस्य च कुड्यकरणादेः 22 युगपद्यत्र सन्निपातः तोभयानुग्रहासम्भवे धर्मलोपेन योऽर्थं गृह्णाति तस्याऽप्येतदेव प्रायश्चित्तम् । अथवा धर्मं हित्वाऽर्थहेतोः कौटसाक्ष्यादि करोति तद्विषयमेतत् । अत्र गौतमः—
23 'कौटसाक्ष्यं राजगामि पैशुनं गुरोरनृताभिशंसनं महापातकसमानी'ति । मनुरपि—
24 अनृतं च समुत्कर्षे राजगामि च पैशुनम् ॥
गुरोश्चाऽलीकनिर्बन्धः समानि ब्रह्महत्यया' ॥ इति ॥ २३ ॥

#### 24 गुरुं हत्वा श्रोत्रियं

गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् २४

▼

## ⑤

>

▼ Bühler

24. If he has slain a Guru or a Brāhmaṇa, who has studied the Veda and finished the ceremonies of a Soma-sacrifice, he shall live according to this very same rule until his last breath. 25

▼ हरदत्त-टीका

## सूत्रम्⑥

गुरुं हत्वा श्रोत्रियं वा कर्मसमासमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् ॥ २४ ॥

## टिप्पनी⑥

गुरुः पित्राचार्यादिः । श्रोत्रियोऽधीतवेदः । स यदि कर्मसमाप्तो भवति सोमान्तानि कर्माणि समाप्तानि यस्य स कर्मसमाप्तः । तो हत्वा एतेनैवाऽनन्तरोक्तेन विधिना ओत्तमादुच्छ्वासात् । उत्तम उच्छ्वासःप्राणविनियोगः । आ तस्माच्चरेत् ॥ २४॥

#### 25 नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्मषन्

नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते २५

▼

## ⑤

>
▼ Bühler

25. He cannot be purified in this life. But his sin is removed (after death). 26

▼ हरदत्त-टीका

## सूत्रम्⑥

नास्याऽस्मिंल्लोके प्रत्यापत्तिर्विद्यते ॥ २५ ॥

## टिप्पनी⑥

खटाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति । ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाऽभ्युपाश्रये'न्न हिम आर्यैः सह सम्प्रयोगो विद्यते । एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् । नाऽस्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते॥ १ ॥

## टिप्पनी⑥

षडङ्गस्य वेदस्याऽध्येता, तदर्थवित्, प्रगोगशास्त्रस्य सव्याख्यस्यार्थवित् कर्मणामनुष्ठाताऽनुष्ठापयिता च ब्राह्मणो भ्रूणः । तथा च बौधायनः— 1'वेदानां किञ्चिदधीत्य ब्राह्मणः । एका शाखामधीत्य श्रोत्रियः । अङ्गाध्याय्यनूचानः । कल्पाध्याय्यृषिकल्पः। सूत्रप्रवचनाप्यायी भ्रूणः' इति । तं यो हतवान् स भ्रूणहा । स शुनः खरस्य वाऽजिनं वहिर्लोमपरिधाय पुरुषस्य यस्य कस्यचिन्मृतस्य शिरः, प्रतीपानार्थम् । प्रतिर्धात्वानुवादः 2 'उपसर्गस्य घञ्यमनुष्ये बहुल'मिति बाहुलको दीर्घः । पानमेव प्रतीपानम् । पानग्रहणमुपलक्षणम् । भोजनमपि तत्रैव । खटाङ्गं दण्डार्थे, खट्वाया अङ्गं खट्वाङ्गमीषादि तण्द्ण्डकृत्ये आदाय । "भ्रणहाऽस्मीत्येवं कर्मनिबन्धनमात्मनो नामधेयं प्रब्रुवाणश्चक्रम्येत इतस्ततश्चरेत् । कापालिकतन्त्रप्रसिद्धस्य खट्वाङ्गस्य वा ग्रहणम् । भिक्षाचरणकाले च को भ्रूणघ्ने भिक्षा ददातीति चरेत् । चरित्वा प्रामे प्राणवृत्तिं प्राणयात्रामात्रं प्रतिलभ्य शून्यागारं वृक्षमूलं वा निवासार्थमभ्युपाश्रयेत्- 'न हि म आर्यैः सह सम्प्रयोगो विद्यत' इत्येवं मन्यमानः । कियन्तं कालमेवं चरितव्यमित्यत आह— एतेनैवेत्यादि । गतम् ।

'श्रोत्रियं वा कर्मसमाप्त(२४.२४.) मित्यत्र यः श्रोत्रियः 3ग्रन्थधारी अर्थज्ञश्च न भवति अनुष्ठापयिता च न भवति तस्य प्रहणम् ॥२॥

## सूत्रम्⑥

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ २॥

## टिप्पनी⑥

'क्षत्रियं हत्वे'त्येवमादिकेऽनुक्रान्तेऽपि विषये यः प्रमत्तो हन्ति प्रमादे नाऽबुद्धिपूर्वं हन्ति तस्याऽपि दोषफलं प्राप्तमेव । न तु प्रमादकृतमिति दोषाभावः ॥२॥
#### 02 यः प्रमत्तो

यः प्रमत्तो हन्ति, प्राप्तं दोषफलम् २

▼

## ⑤

>
▼ Bühler

2. He even who slays unintentionally, reaps nevertheless the result of his sin.

▼ हरदत्त-टीका

## सूत्रम्⑥

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ २॥

## टिप्पनी⑥

'क्षत्रियं हत्वे'त्येवमादिकेऽनुक्रान्तेऽपि विषये यः प्रमत्तो हन्ति प्रमादे नाऽबुद्धिपूर्वं हन्ति तस्याऽपि दोषफलं प्राप्तमेव । न तु प्रमादकृतमिति दोषाभावः ॥२॥

#### 03 सह सङ्कल्पेन भूयः

सह संकल्पेन भूयः ३

▼

## ⑤

>
▼ Bühler

3. (His guilt is) greater, (if he slays) intentionally.

▼ हरदत्त-टीका

## सूत्रम्⑥

सह सङ्कल्पेन भूयः ॥ ३ ॥

## टिप्पनी⑥

सङ्कल्पेन सह वधे कृते भूयः प्रभूततरं भवति । तेन प्रमादकृते लघुप्रायश्चित्तम् , बुद्धिपूर्वं तु गुर्विति । यत्पुनः पूर्वमुक्तं 'दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वे(२६.७)'ति तत्र तेषु प्रायश्चित्तेषु विशेषाभावादिदमुक्तम् ॥ ३ ॥

#### 04 एवमन्येष्वपि दोषवत्सु कर्मसु

एवमन्येष्वपि दोषवत्सु कर्मसु ४

▼

## ⑤

>
▼ Bühler

4. The same (principle applies) also to other sinful actions,

▼ हरदत्त-टीका

## सूत्रम्⑥

एवमन्येष्वपि दोषवत्सु कर्मसु ॥ ४ ॥

## टिप्पनी⑥

अन्येष्वपि हननव्यतिरिक्तेषु दोषवत्सु कर्ममु एवमेव द्रष्टव्यम्-अबुद्धिपूर्वं कृतेऽल्पो दोषः , बुद्धिपूर्वे महानिति ॥ ४॥

#### 05 तथा पुण्यक्रियासु

तथा पुण्यक्रियासु ५

▼

## ⑤

>
▼ Bühler

5. And also to good works. 4

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा पुण्यक्रियासु ॥ ५ ॥

## टिप्पनी⑥

पुण्यक्रियास्वप्येष एव न्यायः— अबुद्धिपूर्वेऽल्पं फलम्, बुद्धिपूर्वे महदिति। तद्यथा— ब्राह्मणस्स्वान्यपहृत्य चोरेषु धावत्सु यदृच्छया कश्चिच्छूर आगतस्तान् हन्यात्, स्वयमेव वा शूरं दृष्ट्वा चोरा अपहृतानि द्रव्याण्युत्सृज्य पलायेरन् तदा शूरस्याऽल्पं पुण्यफलम् । यदा तु बुद्धिपूर्वं स्वयमेव चोरेभ्यः प्रत्याहृत्य स्वानि स्वामिभ्यो ददाति तदा महदिति । एवं स्वभार्याबुद्ध्या परदारगमनेऽल्पम्, अन्यत्र महदिति ॥५॥

#### 06 परीक्षार्थोऽपि ब्राह्मण आयुधन्

परीक्षार्थोऽपि ब्राह्मण आयुधं नाददीत ६

▼

## ⑤

>
▼ Bühler

6. A Brāhmaṇa shall not take a weapon into his hand, though he be only desirous of examining it.

▼ हरदत्त-टीका

## सूत्रम्⑥

परीक्षार्थोऽपि ब्राह्मण आयुधं नाऽऽददीत ॥ ६॥

## टिप्पनी⑥

गुणदोषज्ञानं परीक्षा । तया अर्थः प्रयोजनं यस्य सः । एवंभूतोऽपि ब्राह्मण आयुधं न गृह्णीयात् किं पुनर्हिंसार्थ इत्यपिशब्दार्थः ॥ ७ ॥

#### 07 यो हिंसार्थमभिक्रान्तं हन्ति

यो हिंसार्थमभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन्दोष इति पुराणे ७

▼

## ⑤

>
▼ Bühler

7. In a Purāṇa (it has been declared), that he who slays an assailant does not sin, for (in that case) wrath meets wrath.

▼ हरदत्त-टीका

## सूत्रम्⑥

यो हिंसार्थमभिकान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन् दोष इति पुराणे ॥ ७ ॥

## प्रस्तावः⑥

अस्य प्रतिप्रसवः—

## टिप्पनी⑥

यस्तु हिंसार्थं मारणार्थमभिक्रान्तमभिपतितं हन्ति न तस्मिन् दोषो विद्यत इति पुराणे श्रुतम् । दोषाभावे हेतुः-यस्मान्मन्युरेव मन्युं स्पृशति न पुनः पुरुषः पुरुषम् । अत्र वसिष्ठबौधायनौ—

5स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम् ।
न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमृच्छति ॥ इति ॥
मनुस्तु—

6शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुद्ध्यते । द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥
आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ।
स्त्रीविप्राभ्यवपत्तौ च घ्नन् धर्मेण न दुष्यति ॥ इति ॥

गौतमः- 7'प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीते'ति ॥

वसिष्ठः— 8अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥
आततायिनमायान्तमपि वेदान्तपारगम् ।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत् ॥' इति ॥७॥

#### 08 अथाभिशस्ताः समवसाय पतितपुत्रेषु

अथाभिशस्ताः समवसाय
पतित-पुत्रेषु चरेयुर् धार्म्यम् इति
सांशित्येतरेतर-याजका इतरेतराध्यापका मिथो विवहमानाः ८

▼

## ⑤

>
▼ Bühler

8. But Abhiśastas shall live together in dwellings (outside the village); considering this their lawful (mode of life), they shall sacrifice for each other, teach each other, and marry amongst each other.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाऽभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवाहमानाः ॥८॥

## प्रस्तावः⑥

पतितैरकृतप्रायश्चित्तैरुत्पादितानां पुत्राणामपि पातित्यमस्तीति प्रतिपादयितुं पूर्वपक्षमाह —

## टिप्पनी⑥

अथशब्दोऽर्थान्तरप्रस्तावं सूचयति । अभिशस्ताः पतिताः । समवसाय चरेयुः । अवसानं गृहम् । समित्येकीभावे । ग्रामाद्बहिरेकस्मिन् प्रदेशे गृहाणि कृत्वा चरेयुः । धार्म्यं धर्म्ये वक्ष्यमाणं वृत्तमिति । सांशित्य संशितां तीक्ष्णां बुद्धिं कृत्वा । निश्चित्येत्यर्थः । इतरेतरं याजयन्तः । इतरेतरमध्यापयन्तः परस्परं विवाहसम्बन्धं च कुर्वन्तश्चरेयुः वर्तेरन्निति ॥८ ॥

#### 09 पुत्रान्सन्निष्पाद्य ब्रूयुर्विप्र व्रजततास्मदेवं

पुत्रान्संनिष्पाद्य ब्रूयुर् -
"विप्रव्रजततास्मद् -
एवं ह्य् अस्मत्स्व् आर्याः संप्रत्यपत्स्यते"ति ९

▼

## ⑤

>
▼ Bühler

9. If they have begot sons, let them. say to them: 'Go out from amongst us, for thus the Āryas, (throwing the guilt) upon us, will receive you (amongst their number).' 9

▼ हरदत्त-टीका

## सूत्रम्⑥

पुत्रान् सन्निष्पाद्य ब्रूयुर्विप्रजताऽस्मदेवं ह्यस्मत्स्वार्यास्सम्प्रत्यपत्स्यतेति ॥९॥

## टिप्पनी⑥

अथ ते पुत्रान् सन्निष्पाद्य ब्रूयुः हे पुत्राः अस्मत् अस्मत्तः। विप्रव्रजत विविधं प्रकर्षेण च स्नेहमुत्सृज्याऽऽर्यसमीपं गच्छत ।
एवं ह्यस्मासु अस्मास्व् आर्याः शिष्टाः सम्प्रत्यपत्स्यत । 10
'आशंसायां भूतवच्चेति' भविष्यति लुङ् । सकारात्परो यकारोऽपपाठश्छान्दसो वा ।
सम्प्रतिपत्तिं करिष्यन्ति । आर्याणामप्येतदभिप्रेतं भविष्यति । यस्मादस्माभिरेव पतनीयं कर्माऽनुष्ठितं न भवद्भिः । न च पतितेनोत्पादितस्य पातित्यम्, अन्यत्वात् ॥९॥

#### 10 अथापि न सेन्द्रि

अथापि न सेन्द्रि यः पतति १०

▼

### ⑤

>
▼ Bühler

10. For the organs do not become impure together with the man.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाऽपि न सेन्द्रियः पतति ॥ १०॥

## प्रस्तावः⑥

एतदेवोपपादयति

## टिप्पनी⑥

न हि पतितो भवन् सहेन्द्रियेण पतति, पुरुष एव पतति, नेन्द्रियं शुक्लमिति । अथापिशब्दावपि चेत्यस्याऽर्थे ॥ १० ॥

#### 11 तदेतेन वेदितव्यम् अङ्गहीनो

तदेतेन वेदितव्यम् । अङ्गहीनो हि साङ्गं जनयति ११

▼

### ⑤

>
▼ Bühler

11. (The truth of) that may be learned from this (parallel case); a man deficient in limbs begets a son who possesses the full number of limbs. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

तदेतेन वेदितव्यमङ्गहीनो ऽपि साङ्गं जनयति ॥ ११ ॥

## प्रस्तावः⑥

कथं न सेन्द्रियः पततीत्याह—

## टिप्पनी⑥

तदनन्तरोक्तमर्थरूपमेतेन वक्ष्यमाणेन निदर्शनेन वेदितव्यम् । चक्षुराद्यङ्गहीनोऽपि साङ्गं चक्षुरादिमन्तं जनयति, एवमधिकारविकलः साधिकारं जनयिष्यति । स्त्रिया अपि कारणत्वात् तस्याश्च दोषाभावात् ॥ ११ ॥

#### 12 मिथ्यैतदिति हारीतः

मिथ्यैतदिति हारीतः १२

▼

## ⑤

>
▼ Bühler

12. Hārita declares that this is wrong.

▼ हरदत्त-टीका

## सूत्रम्⑥

मिथ्येतदिति हारीतः ॥ १२ ॥

## प्रस्तावः⑥

दूषयति—

## टिप्पनी⑥

एतदनन्तरोक्तमर्थरूपं मिथ्या न युक्तमिति हारीतो मन्यते ॥ १२॥

#### 13 दधिधानीसधर्मा स्त्री भवति

दधिधानीसधर्मा स्त्री भवति १३

▼

## ⑤

>
▼ Bühler

13. A wife is similar to the vessel which contains the curds (for the sacrifice). 12

▼ हरदत्त-टीका

## सूत्रम्⑥

दधिधानीसधर्मा स्त्री भवति ॥ १३ ॥

## प्रस्तावः⑥

कुत इत्याह—

## टिप्पनी⑥

दधि धीयते यस्यां सा दधिधानी स्थाली । तया सधर्मा सदृशी स्त्री भवति ॥

#### 14 यो हि दधिधान्यामप्रयतम्

यो हि दधिधान्यामप्रयतं पय आतच्य मन्थति न तेन धर्मकृत्यं क्रियते । एवमशुचि शुक्लं यन्निवर्तते न तेन सह संप्रयोगो विद्यते १४

▼

## ⑤

>
▼ Bühler

14. For if one makes impure milk curdle (by mixing it with whey and water) in a milk-vessel and stirs it, no sacrificial rite can be performed with (the curds produced from) that. Just so no intercourse can be allowed with the impure seed which comes (from an Abhiśasta).

▼ हरदत्त-टीका

## सूत्रम्⑥

यो हि दधिधान्यामप्रयत्तं पय आतञ्च्य मन्थति न तेन धर्मकृत्यं क्रियेत एवमशुचि शुक्लं यन्निवर्तते न तेन सह सम्प्रयोगो विद्यते ॥ १४ ॥

## प्रस्तावः⑥

ततः किम् ?

## टिप्पनी⑥

यो हि पुरुषः दधिधान्यां स्थाल्याम्, अप्रयतं श्वाद्युपहतम् , पय आतञ्च्य तक्राद्यातञ्चनेन संस्कृत्य मन्थति न तेन तदुत्पन्नेन घृतादिना धर्मकृत्यं यागादिकं क्रियते। एवं पतितसम्बन्धेनाऽशुचि शुक्लं स्त्रियां निषितं शोणितेनाकं यन्निवर्तते येन रूपेण निष्पद्यते न तेन सह सम्प्रयोगो विद्यते शिष्टानाम् । अत्र चा'शुचि शुक्ल'मित्येत'दथापि न सेन्द्रिय पतती'त्यस्य दूषणम् । न हि वाचनिकेऽर्थे युक्तय क्रमन्ते । तथा च समानायामप्युत्पत्तौ पुत्र एव पतति न दुहिता । यथाऽऽह वसिष्ठः—

13 'पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः । सा हि परगामिनी तामरिक्थामुपेयात्' । इति ॥ १४ ॥

#### 15 अभीचारानुव्याहारावशुचिकरावपतनीयौ

अभीचारानुव्याहारावशुचिकरावपतनीयौ १५

▼

## ⑤

>
▼ Bühler

15. Sorcery and curses (employed against a Brāhmaṇa) cause a man to become impure, but not loss of caste.

▼ हरदत्त-टीका

## सूत्रम्⑥

अभीचारा14नुव्याहारावशुचिकरावपतनीयौ ॥ १५ ॥

## टिप्पनी⑥

अभिचारः एवाऽभीचार । 15 'उपसर्गस्य धञी'ति दीर्घः । अभीचारः श्येनादिः । अनुव्याहारः शापः । तौ ब्राह्मणविषयेऽपि क्रियमाणावशुचिः करावेव, न तु पतनीयौ ॥ १५ ॥

#### 16 पतनीयाविति हारीतः

पतनीयाविति हारीतः १६

▼

## ⑤

>
▼ Bühler

16. Hārita declares that they cause loss of caste.

▼ हरदत्त-टीका

## सूत्रम्⑥

पतनीयाविति हारीतः ॥ १६ ॥

## टिप्पनी⑥

हारीतस्तु तावपि पतनीयाविति मन्यते ॥ १६ ॥

#### 17 पतनीयवृत्तिस्त्वशुचिकराणान् द्वादश मासान्द्वादशार्धमासान्द्वादश

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान्द्वादशार्धमासान्द्वादश द्वादशाहान्द्वादश सप्ताहान्द्वादश त्र्यहान्द्वादशाहं सप्ताहं त्र्यहमेकाहम् १७

▼

## ⑤

>

▼ Bühler

17. But crimes causing impurity must be expiated, (when no particular penance is prescribed,) by performing the penance enjoined for crimes causing loss of caste during twelve months, or twelve half months, or twelve twelve-nights, or twelve se’nnights, or twelve times three days, or twelve days, or seven days, or three days, or one day.

▼ हरदत्त-टीका

## सूत्रम्⑥

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान् द्वादशाऽर्धमासान् द्वादश द्वादशाहान् द्वादश सप्ताहान् द्वादश त्र्यहान् द्वादश द्व्यहान् द्वादशाहं सप्ताहं त्र्यहं द्व्यहमेकाहम् ॥ १७ ॥

## टिप्पनी⑥

अशुचिकराणामपि कर्मणां येषामाहत्य प्रायश्चित्तं नोक्तं तेषामपि पतनीयेषु कर्मसु या वृत्तिः प्रायश्चित्तं सैव प्रायश्चित्तिः। कियन्तं कालम् ? द्वादश मासाद्येकाहान्तम् ॥ १७ ॥

#### 18 इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः १८

▼

⑤

>
▼ Bühler

18. Thus acts causing impurity must be expiated according to the manner in which the (sinful) act has been committed (whether intentionally or unintentionally).

▼ हरदत्त-टीका

## सूत्रम्⑥

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः ॥ १८ ॥

## प्रस्तावः⑥

किमविशेषेण सर्वेष्वेवाऽशुचिकरेष्वयं कालविकल्पः ? नेत्याह—

## टिप्पनी⑥

इत्येषोऽशुचिकरनिर्वेषो यथा कर्माभ्यासस्तथा वेदितव्यः । बुद्धिपूर्वे सानुबन्धेऽभ्यासे च भूयांसं कालम्, विपरीते विपर्यय इति ॥१८॥

॥ इत्यापस्तम्बसूत्रवृत्तौ प्रथमप्रश्ने एकोनत्रिंशी कण्डिका ॥ २९ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्ने दशमः पटलः ॥ १० ॥

इति दशमः पटलः

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3. आप० ध० १. ३१. १.↩
4. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩
5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
7. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
8. आप० ध० १.३०.८.↩
9. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. Manu II, 35.↩

12. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

15. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

११①

# ३०①

## 01 विद्यया स्नातीत्येके④

विद्यया स्नातीत्येके १

▼

### ⑤

>
▼ Bühler

1. Some declare, that a student shall bathe after (having acquired) the knowledge of the Veda, (however long or short the time of his studentship may have been). 1

▼ हरदत्त-टीका

### सूत्रम्⑥

विद्यया स्नातीत्येके १

### प्रस्तावः⑥

'न समावृत्ता वपेरन्' ( ८. ७. ) स्नातस्तु काल' (१०.७.) इत्यादिषु प्रसक्तस्य स्नानस्य कालमाह —

### टिप्पनी⑥

वेदविद्या विद्या । तया सम्पन्नः स्नानं कुर्यादित्येके मन्यन्ते । मनुरित्याह—
2वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥ इति ॥ १॥

#### 02 तथा व्रतेनाष्टाचत्वारिंशत्परीमाणेन

तथा व्रतेनाष्टाचत्वारिंशत्परीमाणेन २

▼

### ⑤

>
▼ Bühler

2. (He may) also (bathe) after having kept the student's vow for forty-eight, (thirty-six or twenty-four) years, (though he may not have mastered the Veda).

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा व्रतेनाऽष्टाचत्वारिंशत्परीमाणेन ॥२॥

## टिप्पनी⑥

परिमाणमेव परीमाणम् । छान्दसो दीर्घः । अष्टाचत्वारिंशद्ग्रहणं 3 'पादूनम्, अर्धेने'(२.१३,१४)त्यादिपूर्वोक्तस्याप्युपलक्षणम् । अष्टाचत्वारिंशदादिपरिमाणेन व्रतेन 4वा सम्पन्नः स्नायात् असम्पन्नोऽपि विद्यया ॥२॥

पादूनम् , अर्धेन, त्रिभिर्वा' इत्येतेषां पूर्वोक्तानामुपलक्षणम् । इति. क. पु.

'अथ ब्रह्मचर्यविधिः' इत्यारभ्य प्रपञ्चितेन समिदाधानभिक्षाचरणगन्धादिवर्जनादिरूपेण । अस्ति च तेषु व्रतशब्दः 'यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः" इति । इह तु समुदायाभिप्रायमेकवचनम् । तेन वा व्रतेन सम्पन्नस्स्नायात् । असम्पन्नोऽपि विद्यया । 'चत्वारि वेदव्रतानी'त्येषां तु ग्रहणमत्र नाऽऽङ्कनीयम् । यथोक्तं विश्वरूपे । इत्यधिकः पाठो ग. पु.

#### 03 विद्याव्रतेन चेत्येके

विद्याव्रतेन चेत्येके ३

▼

## ⑤

>
▼ Bühler

Some declare, that the student (shall bathe) after (having acquired) the knowledge of the Veda and after (the expiration of) his vow.

▼ हरदत्त-टीका

## सूत्रम्⑥

विद्या व्रतेन चेत्येके ॥३॥

## टिप्पनी⑥

विद्येति तृतीयैकवचनस्याकारस्य5 'सुपां सुलुक्' इत्यादिना लुक् । विद्यया व्रतेन चोभाभ्यां सम्पन्नः स्नायादित्येके मन्यते । एवं च 6'वेदमधीत्य स्नास्य'नित्यत्र वेदमधीत्येत्युपलक्षणम् । अत्र याज्ञवल्क्यः —

7वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
अविप्लुतब्रह्मचर्यो लक्षण्या स्त्रियमुद्वहेत् ॥ इति ।

- अत्र व्रतशब्देनाऽग्नीन्धनभैक्षाचरणादयो ब्रह्मचारिधर्मा उच्यते। तेषु हि कालपरिमाणस्य श्रुतत्वातू पारं नीत्वेति युज्यते । दृश्यते च तेषु व्रतशब्दः। 'यथा व्रतेषु समर्थस्स्याद्यानि वक्ष्याम इति। न तु सावित्र्यादीनि वेदव्रतान्युच्यन्ते । तेषां तत्तत्प्रदेशाध्ययनशेषतया तदभावेऽभावाद्वेदं व्रतानि वेति विकल्पानुपपत्तेः । अतः कालविशेषावच्छिन्नानि व्रतानि वेदमुभयं वा पारं नीत्वेत्यर्थः * ॥ ३ ॥

- *.एतच्चिन्हान्तर्गतो भागोऽधिकपाठतया परिगणितः ख. पुस्तके । ग. पुस्तके नास्ति पाठः । अन्यत्र तु यथायथमस्ति ।

#### 04 तेषु सर्वेषु स्नातकवद्वृत्तिः

तेषु सर्वेषु स्नातकवद्वृत्तिः ४

▼

## ⑤

>
▼ Bühler

4. To all those persons who have bathed (In accordance with any of the above rules must be shown) the honour due to a Snātaka.

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषु सर्वेषु स्नातकवद्वृत्तिः ॥ ४ ॥

## टिप्पनी⑥

विद्यास्नातको व्रतस्नातक उभयस्नातक इति त्रयः स्नातका उक्ताः तेषु सर्वेषु स्नातकवत् 'तदर्हती'ति वतिः । स्नातकार्हा वृत्तिः पूजा8 'यत्राऽस्मा अपचिति'मित्यादिः कार्या । न तु व्रतस्नातके न्यूना, उभयस्नातकेऽधिकेति ॥ ४॥

#### 05 समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायाम् फलविशेषः

समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ५

▼

## ⑤

>
▼ Bühler

5. The reverence (shown to a Snātaka) brings, however, different rewards according to the degree of devotion or of learning (possessed by the person honoured).

▼ हरदत्त-टीका

## सूत्रम्⑥

समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ॥५॥

## प्रस्तावः⑥

यद्यप्येवं तथाऽपि पूजयितुः फलविशेषोऽस्तीत्याह—

## टिप्पनी⑥

कर्तव्येषु कर्मस्ववधानं समाधिः श्रुतिः श्रुतम् ॥ ५ ॥

#### 06 अथ स्नातकव्रतानि

अथ स्नातकव्रतानि ६

▼

## ⑤

>
▼ Bühler

6. Now follow the observances (chiefly to be kept) by a Snātaka.

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ स्नातकव्रतानि ॥ ६ ॥

## टिप्पनी⑥

इत उत्तरं स्नातकव्रतान्यधिकृतानि वेदितव्यानि । यद्यपि वक्ष्यमाणेषु कानिचित् साधारणान्यपि भवन्ति तथाऽपि भूम्ना स्नातकव्रतान्यधिक्रियन्ते ॥ ६॥

#### 07 पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण

पूर्वेण ग्रामान् निष्क्रमण-प्रवेशनानि शीलयेद्, उत्तरेण वा ७

▼

## ⑤

>
▼ Bühler

7. He shall usually enter the village and leave it by the eastern or the northern gate.

▼ हरदत्त-टीका

## सूत्रम्⑥

पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण वा ॥ ७ ॥

## टिप्पनी⑥

यदा ग्रामान्निष्कामति ग्रामं वा प्रविशति तदा पूर्वेण द्वारणोत्तरेण वा कुर्यात्, न द्वारान्तरेण । शीलयेदिति वचनाद्यदृच्छया द्वारान्तरेण निष्क्रमणप्रवेशनयोरपि न प्रायश्चितम् ॥ ७ ॥

#### 08 सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च

संध्योश् च बहिर्ग्रामाद् आसनं, वाग्-यतश् च ८

▼

## ⑤

>
▼ Bühler

8. During the morning and evening twilights, he shall sit outside the village, and not speak anything (referring to worldly matters).

▼ हरदत्त-टीका

## सूत्रम्⑥

सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च ॥ ८ ॥

## टिप्पनी⑥

अहोरात्रयोः सन्धानं सन्धिः ।
तौ च द्वौ - सायं प्रातश् च । 9
'सज्योतिष्याज्योतिषोऽदर्शनात्' इति गौतमः ।
तयोस् सन्ध्ययोर् ग्रामाद् बहिर् आसीत ।

वाग्यतश् च भवेत् । मनुः पुनराह—

> 10 'पूर्वां सन्ध्यां जपंस् तिष्ठेत्
> सावित्रीम् आर्कदर्शनात् ॥
> पश्चिमां तु समासीत
> सम्यगृक्षविभावनात् ॥'

इति

> 11तिष्ठेत् पूर्वाम् आसीतोत्तराम्

इति गौतमः। एते ब्रह्मचारि-विषये।
स्नातके आसनस्य वाङ्-निमनस्य चाऽत्र विधानात् ॥
अन्ये तु -
आसनग्रहणं स्थानस्याऽप्य् उपलक्षणम्,
वाग्यमश् च लौकिक्या वाचो निवृत्तिः,
न सावित्रीजपस्येति वर्णयन्ति ॥ ८ ॥

#### 09 विप्रतिषेधे श्रुतिलक्षणम् बलीयः

विप्रतिषेधे श्रुतिलक्षणं *(सन्ध्याग्निहोत्रादिचोदकम्)* बलीयः ९

▼

## ⑤

>
▼ Bühler

9. (But an Agnihotrī, who is occupied at home by oblations in the morning and evening, must not go out; for) in the case of a conflict (of duties), that enjoined by the Veda is the more important.

▼ हरदत्त-टीका

## सूत्रम्⑥

विप्रतिषेधे श्रुतिलक्षणं बलीयः ॥ ९॥

## प्रस्तावः⑥

अहिताग्निविषयेऽस्याऽपवादः—

## टिप्पनी⑥

विरोधो विप्रतिषेधः अग्निहोत्रिणो बहिर् आसनम् अग्निहोत्रहोमश् च विरुध्येते । तथा च श्रूयते-"समुद्रो वा एष यद् अहो-रात्रः, तस्यैते गाथे तीर्थे यत् सन्धी, तस्मात् सन्धौ होतव्यम्" इति । तत्र श्रुति-लक्षणम् अग्निहोत्रम् एव कर्तव्यम्, न स्मार्तं बाहिरासनम् । तस्य कल्प्य-मूलत्वाद् इतरस्य च , क्लृप्त-मूलत्वाद् अति । 12जैमिनिरत्याह— 13विरोधे त्वनपेक्षं स्यादसति हनुमानमिति ॥९॥

#### 10 सर्वान्रागान्वाससि वर्जयेत्

सर्वान् रागान् वाससि वर्जयेत् १०

▼

### ⑤

>
▼ Bühler

10. He shall avoid all dyed dresses, 14

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वान्रागान्वाससि वर्जयेत् ॥ १० ॥

## टिप्पनी⑥

कुसुम्भादयस्सर्वे रागाः वाससि वर्जनीयाः, न केनचिद्रक्त-वासो बिभृयादिति ॥ १०॥

#### 11 कृष्णञ् च स्वाभाविकम्

*(वस्त्रं यत्)* कृष्णं च स्वाभाविकम् ११

▼

### ⑤

>
▼ Bühler

11. And all naturally black cloth.

▼ हरदत्त-टीका

## सूत्रम्⑥

कृष्णं च स्वाभाविकम् ॥ ११ ॥

## टिप्पनी⑥

यश् च स्वभावतः कृष्णं कम्बलादि तदपि न वसीत ॥ ११ ॥

#### 12 अनूद्भासि वासो वसीत

अनूद्भासि वासो वसीत १२

▼

⑤

>
▼ Bühler

12. He shall wear a dress that is neither shining,

▼ हरदत्त-टीका

## सूत्रम्⑥

अनूद्भासि वासो वसीत ॥ १२ ॥

## टिप्पनी⑥

उद्भासनशीलमुद्भासि उल्बणम् । ततोऽन्यदनूद्भासि । छान्दसो दीर्घः । एवंभूतं वासो वसीत् आच्छादयेत् ॥ १२ ॥

#### 13 अप्रतिकृष्टञ् च शक्तिविषये

अ-प्रतिकृष्टं *(जीर्णत्वादेः)* च शक्तिविषये १३

▼

⑤

>
▼ Bühler

13. Nor despicable, if he is able (to afford it). 15

▼ हरदत्त-टीका

## सूत्रम्⑥

अप्रतिकृष्टं च शक्तिविषये ॥ १३ ॥

## टिप्पनी⑥

**प्रतिकृष्टं** निकृष्टं जीर्णं मलवत् स्थूलं च । तद्विपरीतमप्रतिकृष्टम् । तादृशं च वासो वसीत शक्तौ सत्याम् ॥ १३ ॥

#### 14 दिवा च शिरसः

दिवा च शिरसः प्रावरणं वर्जयेन् - मूत्र-पुरीषयोः कर्म परिहाप्य १४

▼

## ⑤

>
▼ Bühler

14. And in the day-time he shall avoid to wrap up his head, except when voiding excrements.

▼ हरदत्त-टीका

## सूत्रम्⑥

दिवा च शिरसः प्रावरणं वर्जयेन् - मूत्र-पुरीषयोः कर्म परिहाप्य ॥ १४॥

## टिप्पनी⑥

चकारः पूर्वापेक्षया समुच्चयार्थः । दिवा शिरसः प्रावरणं पटादिना न कुर्यात् । किमविशेषेण ? नेत्याह- मूत्रपुरीषयोः कर्म क्रियां परिहाप्य वर्जयित्वा ॥ १४ ॥

#### 15 शिरस्तु प्रावृत्य मूत्रपुरीषे

शिरस् तु प्रावृत्य मूत्र-पुरीषे कुर्याद् - भूम्यां किंचिद् *(तृणादि)* अन्तर्धाय १५

▼

## ⑤

>
▼ Bühler

15. But when voiding excrements, he shall envelop his head and place some (grass or the like) on the ground. 16

▼ हरदत्त-टीका

## सूत्रम्⑥

शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्यात् भूम्यां किञ्चिदन्तर्धाय ॥ १५ ॥

## टिप्पनी⑥

दिवा रात्रौ च मूत्रपुरीषे कुर्वन् शिरः प्रावृत्त्य कुर्यात् । भूम्यां किञ्चिदन्तर्धाय तृणादिकम्, न साक्षात् भूम्यामेव । इह कामचारे प्राप्ते 'दिवा च शिरसः प्रावरणं वर्जये'दित्युक्तम् । तस्य पर्युदासः कृतः-'मूत्रपुरीषयोः कर्म परिहाप्ये'ति । तत्र मूत्रपुरीषकाले स एव कामचारः स्थितः। अत आरभ्यते- शिरस्तु प्रावृत्येति । एवं तर्हीदमेवाऽस्तु । न पूर्वः पर्युदासः। सोऽप्यवश्यं कर्तव्यः । अन्यथा 'शिरस्तु प्रावृत्ये'त्यस्य रात्रौ चरितार्थत्वात् दिवा प्रतिषेध एव स्यात् । गौतमस्त रात्रौ सदैव प्रावरणमाह17 'न प्रावृत्त्य शिरोऽहनि पर्यटेत्, प्रावृत्य रात्री, मुत्रोच्चारे चे'ति ॥ १५ ॥

#### 16 छायायाम्मूत्रपुरीषयोः कर्म वर्जयेत्

छायायाम् मूत्रपुरीषयोः कर्म वर्जयेत् १६

▼

## ⑤

>
▼ Bühler

16. He shall not void excrements in the shade (of a tree, where travellers rest).

▼ हरदत्त-टीका

## सूत्रम्⑥

छायायां मूत्रपुरीषयोः कर्म वर्जयेत् ॥ १६ ॥

## टिप्पनी⑥

'न चोपजीव्यच्छायास्वि'ति स्मृत्यन्तरे दर्शनात् यस्यां पथिकादयो विश्राम्यन्ति सा गृह्यते । तेन छत्रछायादेरप्रतिषेधः मेघच्छायाया अप्यप्रतिषेधः, अवर्जनीयत्वात् ॥ १६ ॥

#### 17 स्वान् तु छायामवमेहेत्

स्वां तु छायाम् अव-मेहेत् १७

▼

## ⑤

>
▼ Bühler

17. But he may discharge urine on his own shadow.

▼ हरदत्त-टीका

## सूत्रम्⑥

स्वां तु छायामवमेहेत् ॥ १७॥

## टिप्पनी⑥

छान्दसस्तुगभावः । द्वितीयाश्रुतेः प्रतिशब्दाध्याहारः । अवमेहनं मूत्रकर्म । अनुपजीव्यत्वान्नायं पूर्वस्य प्रतिषेधस्य विषय इति प्रतिप्रसवोऽयं न भवति । तेन सति सम्भवे स्वामेव छायां प्रत्यवमेढव्यम् ॥१७॥

#### 18 न सोपानह्मूत्रपुरीषे कुर्यात्कृष्टे

न सोपानह् मूत्र-पुरीषे कुर्यात्, कृष्टे, पथ्य्, अप्सु च १८

▼

## ⑤

>
▼ Bühler

18. He shall not void excrements with his shoes on, nor on a ploughed field, nor on a path, nor in water. 18

▼ हरदत्त-टीका

## सूत्रम्⑥

19 न सोपानन्मूत्रपुरीषे कुर्यात् ॥ १८ ॥

## टिप्पनी⑥

*(अग्रिमे सूत्रे द्रष्टव्यम्)*

## सूत्रम्⑥

कृष्टे ॥ १९ ॥

## सूत्रम्⑥

पथि ॥२०॥

## सूत्रम्⑥

अप्सु च ॥२१॥

## टिप्पनी⑥

स्पष्टानि चत्वारि ॥ १८-२१ ॥

#### 19 तथा ष्ठेवनमैथुनयोः कर्माप्सु

तथा ष्ठेवन-मैथुनयोः कर्माप्सु वर्जयेत् १९

▼

## ⑤

>
▼ Bühler

19. He shall also avoid to spit into, or to have connection with a woman in water. 20

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा21ष्ठेवनमैथुनयोः कर्माऽप्सु वर्जयेत् ॥२२॥

## टिप्पनी⑥

ष्ठेवनमास्यश्लेष्मादीनामुत्सर्गः ॥ २२ ॥

#### 20 अग्निमादित्यमपो ब्राह्मणङ् गा

अग्निम् आदित्यम् अपो ब्राह्मणं गा देवताश् चाभिमुखो मूत्र-पुरीषयोः कर्म वर्जयेत् २०

▼

## ⑤

>
▼ Bühler

20. He shall not void excrements facing the fire, the sun, water, a Brāhmaṇa, cows, or (images of) the gods. 22

▼ हरदत्त-टीका

## सूत्रम्⑥

अग्निमादित्यमपो ब्राह्मणं गा देवताश्चाऽभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत् ॥ २३ ॥

## टिप्पनी⑥

देवताः देवता प्रतिमाः ॥२३॥

#### 21 अश्मानं लोष्ठमार्द्राअनोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः

अश्मानं, लोष्ठम्,
आर्द्रान् ओषधि-वनस्पतीन्*(←पुष्पैर् विना फलन्ति)* ऊर्ध्वान् *(→वातादिभिर् अभग्नान्)* आच्छिद्य,
मूत्र-पुरीषयोः शुन्धने वर्जयेत् २१

▼

## ⑤

>
▼ Bühler

21. He shall avoid to clean his body from excrements with a stone, a clod of earth, or with (boughs of) herbs or trees which he has broken off, whilst they were on the tree and full of sap.

▼ हरदत्त-टीका

## सूत्रम्⑥

अश्मानं लोष्टमानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेत् ॥ २४ ॥

## टिप्पनी⑥

फल-पाकावसाना **ओषधयः** ।
ये पुष्पैर् विना फलन्ति ते **वनस्पतयः** ।
**आर्द्रान्** इति वचनात् शुष्केषु न दोषः ।
**ऊर्ध्वान्** इति वचनाद् वातादि-निमित्तेन भग्नेषु न दोषः। 'एतैरश्मादिभिमूत्रपुरीषयोश्शोधनं न कुर्यात् ॥

#### 22 अग्निमपो ब्राह्मणङ् गा

अग्निम्, अपो, ब्राह्मणं, गा, देवता, द्वारं, प्रतीवातं च
शक्ति-विषये नाभिप्रसारयीत *(पादौ)*२२

▼

## ⑤

>
▼ Bühler

22. If possible, he shall not stretch out his feet towards a fire, water, a Brāhmaṇa, a cow, (iniages of) the gods, a door, or against the wind. 23

▼ हरदत्त-टीका

## सूत्रम्⑥

अग्निमादित्यमपो ब्राह्मणं गा देवताद्वारं प्रति पादं च शक्तिविषये नाऽभिप्रसारयीत ॥ २५॥

## टिप्पनी⑥

शक्तौ सत्यां अग्न्यादीन्प्रति पादौ न प्रसारयेत् ॥ २५ ॥

#### 23 अथाप्युदाहरन्ति

अथाप्य् उदाहरन्ति *(ऽग्रे वक्ष्यमाणम्)* २३

▼

## ⑤

>

▼ Bühler

23. Now they quote also (the following verse):

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाऽप्युदाहरन्ति ॥ २६ ॥

## टिप्पनी⑥

॥ इत्यापस्तम्बधर्मसूत्र प्रथमप्रश्ने त्रिंशी कण्डिका ॥ ३०॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. आप० ध० १.३०.८.↩

6. मनु० स्मृ० २.६↩

7. गौ० ध० १. १, २↩

8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

9. गौ० २, ११, 'सज्योतिषि' इत्यादि 'गौतम' इत्यन्तं नास्ति छ. पु.↩

10. आप० ध० १. ३१. १.↩

11. यत्किञ्चनदिड्मुखेन इति क० पु० ।↩

12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

13. आप० ध० १.३०.८.↩

14. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

15. Manu II, 35.↩

16. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

17. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

18. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

21. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

22. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

23. Manu II, 69; Yājñ. I, 15.↩

## ३१①

### 01 प्राङ्मुखोऽन्नानि भुञ्जीत उच्चरेद्दक्षिणामुखः④

> प्राङ्-मुखो ऽन्नानि भुञ्जीत
> उच्चरेद् दक्षिणा-मुखः ।
> उदङ्-मुखो मूत्रं कुर्यात्
> प्रत्यक्-पादावनेजनम्

इति १

▼

### ⑤

>
▼ Bühler

1. He shall eat facing the east, void fæces facing, the south, discharge urine facing the north, and wash his feet turned towards the west.

▼ हरदत्त-टीका

### सूत्रम्⑥

प्राङ्मुखोऽन्नानि भुञ्जीत्तोच्चरेद्दक्षिणामुखः ।
उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनमिति ॥१॥

### टिप्पनी⑥

उच्चारः पुरीषकर्म । पादावनेजनं पादप्रक्षालनम् । भोजनादिषु चतस्रो नियम्यन्ते । मनुस्तु—
1 'आयुष्यं प्राङ्मुखो भुक्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्त2 ऋतं भुङ्क्ते उदङ्मुखः' ॥ इति।
याज्ञल्क्वश्च —
3 'दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्यान्मूत्रपुरीषे तु रात्री चेद्दक्षिणामुखः ॥' इति ॥ १॥

#### 02 आराच्चावसथान्मूत्रपुरीषे कुर्याद्दक्षिणान् दिशन्

आराच् चावसथान् मूत्रपुरीषे कुर्याद्, दक्षिणां दिशं दक्षिणापरां वा २

▼

### ⑤

>
▼ Bühler

2. He shall void excrements far from his house, having gone towards the south or south-west. 4

▼ हरदत्त-टीका

## सूत्रम्⑥

आराच्चाऽऽवसथान्मूत्रपुरीषे कुर्याद्दक्षिणां दिशं दक्षिणापरां वा ॥ २॥

## टिप्पनी⑥

आवसथो गृहम् । तस्य दूरतो मूत्रपुरीषे कुर्यात्, दक्षिणां दिशम् । द्वितीयानिर्देशादभिनिष्क्रम्येति गम्यते । दक्षिणापरा नैऋती ॥२॥

#### 03 अस्तमिते च बहिर्ग्रामादारादावसथाद्वा

अस्तम् इते च
बहिर् ग्रामाद्,
आराद् आवसथाद् वा मूत्रपुरीषयोः कर्म वर्जयेत् ३

▼

## ⑤

>

▼ Bühler

3. But after sunset he must not void excrements outside the village or far from his house.

▼ हरदत्त-टीका

## सूत्रम्⑥

अस्तमिते च बहिर्ग्रामादारादावसथान्मूमूत्रपुरीषयोः कर्म वर्जयेत् ॥ ३ ॥

## टिप्पनी⑥

अस्तमित आदित्ये बहिर्ग्रामान्मूत्रपुरीषे न कुर्यात् । तथा अन्तर्ग्रामेऽपि गृहस्य दूरतो न कुर्यात् । दृष्टार्थोऽयं प्रतिषेधश्चोरव्याघ्रादिशङ्कया । निर्भये देशे नाऽस्ति दोषः ॥ ३ ॥

#### 04 देवताभिधानञ् चाप्रयतः

देवताभिधानं चाप्रयतः ४

▼

## ⑤

>
▼ Bühler

4. And as long as he is impure he (shall avoid) to pronounce the names of the gods.

▼ हरदत्त-टीका

## सूत्रम्⑥

देवताभिधानं चाऽप्रयतः॥ ४ ॥

## टिप्पनी⑥

देवतानामन्यादीनामभिधानं चाऽप्रयतस्मन् वर्जयेत् । 5अपिधानमित्यपि पाठे एष एवार्थः ॥ ४॥

#### 05 परुषञ् चोभयोर् देवतानां

परुषं *(वचनं)* चोभयोर् देवतानां राज्ञश् च *(वर्जयेत्)* ५

▼

## ⑤

>
▼ Bühler

5. And he shall not speak evil of the gods or of the king. 6

▼ हरदत्त-टीका

## सूत्रम्⑥

परुषं चोभयोर्देवतानां राज्ञश्च ॥५॥

## टिप्पनी⑥

देवतानां राज्ञश्चेत्युभयोः । राश्यपेक्षया द्विवचनम् । परुष निन्दां वर्जयेत् ॥५॥

#### 06 ब्राह्मणस्य गोरिति पदोपस्पर्शनं

ब्राह्मणस्य गोर् इति पदोपस्पर्शनं वर्जयेत् ६

▼

## ⑤

>
▼ Bühler

6. He shall not touch with his foot a Brāhmaṇa, a cow, nor any other (venerable beings).

▼ हरदत्त-टीका

## सूत्रम्⑥

ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जयेत् ॥ ६॥

## टिप्पनी⑥

ब्राह्मणं गां च पादेन नोपस्पृशेत् । इतिशब्दः प्रकारे । तेन विद्यावयोवृद्धानामब्राह्मणानामपि वर्जनम् ॥ ॥६॥

#### 07 हस्तेन चाकारणात्

हस्तेन चाकारणात् ७

▼

## ⑤

>
▼ Bühler

7. (Nor shall he touch them) with his hand, except for particular reasons.

▼ हरदत्त-टीका

## सूत्रम्⑥

हस्तेन चाऽकारणात् ॥ ७॥

## टिप्पनी⑥

कारणमभ्यङ्गकण्डूयनादि । तेन विना हस्तेनाऽप्युपस्पर्शनं वर्जयेत् पूर्वोक्तानाम् ॥ ७॥

#### 08 गोर्दक्षिणानाङ् कुमार्याश्च परीवादान्

गोर्, दक्षिणानां, कुमार्याश् च परीवादान् वर्जयेत् ८

▼

## ⑤

>
▼ Bühler

8. He shall not mention the blemishes of a cow, of sacrificial presents, or of a girl. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

गोर्दक्षिणानां कुमार्याश्च परीवादान्वर्जयेत् ॥ ८ ॥

## टिप्पनी⑥

गोरदक्षिणाया अपि दक्षिणानामगवामपि हिरण्यादीनां कुमार्याः कन्यायाश्च दोषान् सतोऽपि न कथयेत् । अध्यात्मप्रकरणे योगाङ्गतया परीवादः प्रतिषिद्धः । अनन्तरं च वक्ष्यति8 'क्रोधादींश्च भूतदाहीयान् वर्जयेदिति । इदं तु वचनं गवादिषु प्रायश्चित्तातिरेकार्थम् ॥ ८ ॥

#### 09 स्पृहतीञ् च गान्

*(सस्यधान्यादिकं भक्षयन्तीं←)* स्पृहतीं च गां नाचक्षीत *(तत्स्वामिने)* ९

▼

## ⑤

>
▼ Bühler

9. And he shall not announce it (to the owner) if a cow does damage (by eating corn or grass in a field).

▼ हरदत्त-टीका

## सूत्रम्⑥

स्पृहतीं च गां नाऽऽचक्षीत ॥ ९ ॥

## टिप्पनी⑥

स्पृहतीं सस्यधान्यादिकं भक्षयन्तीं गां स्वामिने न ब्रूयात् ॥ ९ ॥

#### 10 संसृष्टाञ् च वत्सेनानिमित्ते

संसृष्टां *(गां)* च वत्सेनानिमित्ते *(नाचक्षीत तत्स्वामिने)*१०

▼

⑤

>
▼ Bühler

10. (Nor shall he call attention to it) if a cow is together with her calf, except for a particular reason.

▼ हरदत्त-टीका

## सूत्रम्⑥

संसृष्टां च वत्सेनाऽनिमित्ते ॥१०॥

## टिप्पनी⑥

या च गौर्वत्सेन संसृजते तामपि न ब्रूयादनिमित्ते-इयं ते गौर्वत्सेन पीयत इति । 'अनिमित्ते' इति वचनात्9 'यस्य हविषे वत्सा अपाकृता धयेयुरि'त्यादिके निमित्ते सति वक्तुर्नास्ति दोषः ॥ १०॥

#### 11 नाधेनुमधेनुरिति ब्रूयात् धेनुभव्येत्येव

नाधेनुम् अधेनुर् इति ब्रूयात् - "धेनुभव्ये"त्य् एव ब्रूयात् ११

▼

⑤

>
▼ Bühler

11. And of a cow which is not a milch-cow he shall not say, 'She is not a milch-cow.' He must say, 'This is a cow which will become a milch-cow.'

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽधेनुमधेनुरिति ब्रूयात् । धेनुभव्येत्येव ब्रयात् ॥ ११ ॥

## टिप्पनी⑥

या च गौरधेनुः पयस्विनी भवति तामप्यधेनुरिति न ब्रूयात् ॥१९॥

किं तर्हि धेनुभव्येत्येव ब्रूयात- भविष्यन्ती धेनुर्धेनुभव्या । 'धेनोर्भव्यायां (मुम् वक्तव्य) इति मुम् न भवति । च्व्यग्तत्वेनाऽव्ययत्वात् । वक्तव्यत्वे च सति शब्दनियमोऽयम् । न पुनरधेनुदर्शन एवं वक्तव्यम् ॥१२॥

#### 12 न भद्रम्भद्रमिति ब्रूयात्

न भद्रम् "भद्रम्" इति ब्रूयात् । *(तत्-स्थाने)* "पुण्यं प्रशास्तम्" इत्येव ब्रूयात् १२

▼

### ⑤

>
▼ Bühler

12. He shall not call 'lucky' that which is lucky. He shall call it 'a mercy, a blessing.' 10

▼ हरदत्त-टीका

## सूत्रम्⑥

11 न भद्रं भद्रमिति ब्रूयात् ॥ १३ ॥

## टिप्पनी⑥

यत् भद्रं तत् भद्रमिति न ब्रूयात् ॥ १३ ॥

## सूत्रम्⑥

पुण्यं प्रशास्तमित्येव ब्रूयात् ॥१४॥

## प्रस्तावः⑥

किं तु?

## टिप्पनी⑥

पुण्यं प्रशास्तमित्यनयोरन्यतरेण शब्देन ब्रूयात् । प्रशास्तं प्रशस्तम् । छान्दसो दीर्घः ॥ १४॥

#### 13 वत्सतन्तीञ् च नोपरि

वत्स-तन्तीं च नोपरि गच्छेत् १३

▼

### ⑤

>
▼ Bühler

13. He shall not step over a rope to which a calf (or cow) is tied. 12

▼ हरदत्त-टीका

## सूत्रम्⑥

13 वत्सतन्ती च नोपरि गच्छेत् ॥ १५ ॥

## टिप्पनी⑥

वत्सानां बन्धरज्जुर्वत्सतन्ती । तस्या उपरि न गच्छेत् तां न लङ्घयेत् । वत्सग्रहणं गोजातेरुपलक्षणम् ॥ १५॥

#### 14 प्रेङ्खावन्तरेण (डोलास्तम्भौ) च

प्रेङ्खाव्*(=डोलास्तम्भौ)* अन्तरेण च नातीयात् १४

▼

## ⑤

>
▼ Bühler

14. He shall not pass between the posts from which a swing is suspended. 14

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रेङ्खावन्तरेण च नाऽतीयात् ॥ १६॥

## टिप्पनी⑥

**प्रेङ्खौ** डोलास्तम्भौ । तोरणस्तम्भावित्यन्ये । ताव् **अन्तरेण** नाऽतीयात्- तयोर्मध्ये न गच्छेत् ॥ १६ ॥

#### 15 नासौ मे सपत्न

न "+असौ मे सपत्न" ब्रूयात् । यद्यसौ मे सपत्न इति ब्रूयाद्, द्विषन्तं भ्रातृव्यं जनयेत् १५

▼

## ⑤

>
▼ Bühler

15. (In company) he shall not say, 'This person is my enemy.' If he says, 'This person is my enemy,' he will raise for himself an enemy, who will show his hatred.

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽसौ मे सपत्न इति ब्रूयात् यद्यसौ में सपत्न इति ब्रूयात् द्विषन्तं भ्रातृव्यं जनयेत् ॥ १७ ॥

## टिप्पनी⑥

असौ देवदत्तो मे सपत्न इति न ब्रूयात् सदसि । किं कारणम् ? यद्यसौ मे सपत्न इति ब्रूयात्, द्विषन्तं, क्रियाशब्दोऽयम्, विद्विषाणं भ्रातृव्यं सपत्नं जनयेत् 'व्यन् सपत्ने' इति भ्रातृशब्दे व्यन् प्रत्ययः । एवं युक्ते स मन्येत-नाऽकस्मादयं ब्रूते नूनमस्य मयि द्वेषो वर्तत इति । ततश्च तत्प्रतीकारार्थं यतमानस्सपत्न एव जायते इति ॥ १७ ॥

#### 16 नेन्द्रधनुरिति परस्मै प्रब्रूयात्

नेन्द्र-धनुर् इति परस्मै प्रब्रूयात् १६

▼

## ⑤

>
▼ Bühler

16. If he sees a rainbow, he must not say to others, 'Here is Indra's bow.' 15

▼ हरदत्त-टीका

## सूत्रम्⑥

नेन्द्रधनुरिति परस्मै प्रब्रूयात् ॥ १८ ॥

## टिप्पनी⑥

इन्द्रधनुराकाशे पश्यन् परस्मै तेन शब्देन न ब्रूयात् । यद्यवश्यं वक्तव्यं मणिधनुरिति ब्रूयात् । गौतमीये 16 दर्शनात् ॥ १८ ॥

#### 17 न पततः सञ्चक्षीतः

न पततः *(=पक्षिणः/ asteroids)* संचक्षीतः*(=गणयेत्)* १७

▼

⑤

>
▼ Bühler

17. He shall not count (a flock of) birds. 17

▼ हरदत्त-टीका

## सूत्रम्⑥

न पततः सञ्चक्षीत ॥ १९ ॥

## टिप्पनी⑥

पततः पक्षिणः सङ्घीभूय स्थितान्न सञ्चक्षीत न गणयेत्— इयन्त एत इति । अपर आह— 'पुण्यक्षयेण स्वर्गात्पततः सुकृतिनः परस्मै न सञ्चक्षीत-ज्योतींषि पतन्तीति न कथयेत् ॥ १९ ॥

#### 18 उद्यन्तमस्तं यन्तञ् चादित्यन्

उद्यन्तम् अस्तं यन्तं चादित्यं दर्शने वर्जयेत् १८

▼

⑤

>
▼ Bühler

18. He shall avoid to look at the sun when he rises or sets. 18

▼ हरदत्त-टीका

## सूत्रम्⑥

उद्यन्तमस्तं यन्तं चाऽऽदित्यं दर्शने वर्जयेत् ॥२०॥

## टिप्पनी⑥

उदयसमये अस्तमयसमये वा आदित्यं न पश्येत् ।
19मनुस्तु —

> नेक्षेतोद्यन्तम् आदित्यं
> नाऽस्तं यन्तं कदाचन ।

> नोपरक्तं न वारिस्थं
> न मध्यं नभसो गतम् ॥

इति ॥ २० ॥

#### 19 दिवादित्यः सत्त्वानि गोपायति

दिवादित्यः सत्त्वानि गोपायति,
नक्तं चन्द्रमास्,
तस्माद् अमावास्यायां निशायां स्वाधीय*(=साधीय)* आत्मनो गुप्तिम् इच्छेत्
प्रायत्य-ब्रह्मचर्य-काले चर्यया च १९

▼

**⑤**

>
▼ Bühler

19. During the day the sun protects the creatures, during the night the moon. Therefore let him eagerly strive to protect himself on the night of the new moon by purity, continence, and rites adapted for the season.

▼ हरदत्त-टीका

## सूत्रम्⑥

दिवाऽऽदित्यः सत्वानि गोपायति नक्तं चन्द्रमाः । तस्मादमावास्यायां निशायां स्वाधीय आत्मनो गुप्तिमिच्छेत् प्रायत्यब्रह्मचर्यकाले चर्यया च ॥ २१ ॥

## टिप्पनी⑥

**दिवा** अहनि । **आदित्यः** सत्वानि **गोपायति** प्राणिनो रक्षति, आलोकदानेन ।
**नक्तं** रात्रौ **चन्द्रमाः** ।
**तस्माद् अमावास्यायां निशायां** रात्रौ
**स्वाधीयः** । वकारश्छान्दसः । अन्तिकवाढयोर्नेदसाधौ ।
**बाढतरं** भृशतरं आत्मनो गुप्तिं रक्षणमिच्छेत् ।

केन प्रकारेण ?
प्रायत्य-ब्रह्मचर्याभ्यां काले चर्यया च । अयं तावदर्थानुरूपः पाठः। अधीयमानस्तु प्रमादश्छान्दसो वा । प्रयतस्य भावः प्रायत्यं नित्यप्रायत्यादधिकेन प्रायत्येन स्नानादिजेन । ब्रह्मचर्येण मैथुनत्यागेन । काले कृतया चर्यया देवार्चनजपादिकया च ॥ २१ ॥

#### 20 सह ह्येतां रात्रिं

सह ह्य् एतां रात्रिं सूर्याचन्द्रमसौ वसतः २०

▼

**⑤**

>
▼ Bühler

20. For during that night the sun and the moon dwell together.

▼ हरदत्त-टीका

## सूत्रम्⑥

सह ह्येतां रात्रिं सूर्याचन्द्रमसौ वसतः ॥ २२ ॥

## प्रस्तावः⑥

कस्मात्पुनरस्यां रात्रौ चन्द्रमा न गोपायतीत्याह —

## टिप्पनी⑥

एतां रात्रिम् । अत्यन्तसंयोगे द्वितीया । सर्वामेतां रात्रिं सूर्याचन्द्रमसौ सह वसतः । न च सूर्येण सह वसतश्चन्द्रमसः प्रकाशोऽस्ति ॥ २२ ॥

#### 21 न कुसृत्या ग्रामम्

न कुसृत्या ग्रामं प्रविशेत् ।
यदि प्रविशेन् "नमो रुद्राय वास्तोष्पतय" इत्येताम् ऋचं जपेद् अन्यां वा रौद्रीम् २१

▼

## ⑤

>
▼ Bühler

21. He shall not enter the village by a by path. If he enters it thus, he shall mutter this Ṛk-verse, 'Praise be to Rudra, the lord of the dwelling,' or some other (verse) addressed to Rudra. 20

▼ हरदत्त-टीका

## सूत्रम्⑥

न कुसृत्या ग्रामं प्रविशेत् ॥ २३ ॥

## टिप्पनी⑥

कुसृतिः कुमार्गः । तया ग्रामं न प्रविशेत् ॥ २३॥

## सूत्रम्⑥

यदि प्रविशे'न्नमो रुद्राय वास्तोष्पत्तय' इत्येतामृचं जपेदन्यां वा रौद्रीम् ॥ २४ ॥

## टिप्पनी⑥

यदि गत्यन्तराभावात् प्रविशेत21 'नमो रुद्राये'त्यादिकामृचं जपेत् । अन्यां वा रौद्रीम्22 'इमां रुद्राय तवस'इत्यादिकाम् । अत्र वाजसनेयगृह्ये— 23 वनं प्रवेक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय वनसदे स्वस्ति मा सम्पारये'ति । पन्थानमारोक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय पथिपदे स्वस्ति मा सम्पारये'ति । अपः प्रवेक्ष्यन्ननुमन्त्रयते— 'नमो रुद्रायाऽप्सुषदे स्वस्ति मा सम्पारयेति । तस्माद्यत्किञ्चन कर्म कुर्वन् स्यात् सर्वं 'नमो रुद्राये'त्येव कुर्यात् 'सर्वो ह्येष रुद्र' इति श्रुतेरिति । भारद्वाजगृह्येऽप्यस्मिन्विषये कियानेव भेदः ॥२४॥

#### 22 नाब्राह्मणायोच्छिष्टम् प्रयच्छेत् यदि

नाब्राह्मणायोच्छिष्टं प्रयच्छेत् ।
यदि प्रयच्छेद् - दन्तान् स्कुप्त्वा, तस्मिन्न् अवधाय प्रयच्छेत् २२

▼

## ⑤

>
▼ Bühler

22. He shall not (ordinarily) give the residue of his food to a person who is not a Brāhmaṇa. When he gives it (to such a one), he shall clean his teeth and give (the food) after having placed in it (the dirt from his teeth). 24

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽब्राह्मणायोच्छिष्टं प्रयच्छेत् ॥ २५ ॥

## टिप्पनी⑥

अब्राह्मणः शुद्रः । 25 'न शूद्रायोच्छिष्टमनुच्छिष्टं वा दद्या'दिति वासिष्ठे दर्शनात् । तस्मा उच्छिष्टं न प्रयच्छे'दित्यनाश्रितविषयम् ॥ २५ ॥

## सूत्रम्⑥

यदि प्रयच्छेद्दन्तान् स्कुप्त्वा तस्मिन्नवधाय प्रयच्छेत् ॥२६॥

## टिप्पनी⑥

इदमाश्रितविषयम् । दन्तान्नखेन स्कुपवा विलिख्य तन्मलं तस्मिन्नुच्छिष्टेऽवधाय प्रयच्छेत् । 'स्कुप्त्वे'ति स्कुभ्नातेः क्त्वाप्रत्यये छान्दसं भकारस्य चर्त्वम् । स्कुनोतेर्वा पकार उपजनः ॥ २६ ॥

#### 23 क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत्

क्रोधादींश् च भूत-दाहीयान् दोषान् वर्जयेत् २३

▼

## ⑤

>
▼ Bühler

23. And let him avoid the faults that destroy the creatures, such as anger and the like. 26

▼ हरदत्त-टीका

## सूत्रम्⑥

क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत् ॥ २७ ॥

## टिप्पनी⑥

**क्रोधादयो** भूतदाहीया अध्यात्मपटले(२२.५) व्याख्याताः । तद्वचनं योगिविषयमित्ययोगिनोऽपि स्नातकस्य क्रोधादिनिवृत्त्यर्थमिदं वचनम् । इदमेव तर्ह्युभयार्थमस्तु-योग्यर्थमयोग्यर्थं च । एवं सिद्धे तद्वचनं क्रोधादिवर्जनस्य योगाङ्गत्वप्रतिपादनार्थम् । तेन क्रोधाद्यनुष्ठाने योगसिद्धिर्न भवति । न पुनः स्नातकव्रतलोपप्रायश्चितमिति ॥२७॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने एकत्रिंशी कण्डिका ॥ ३१ ॥

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
4. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
7. Manu II, 35.↩
8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

13. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

14. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

15. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

16. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

17. Manu II, 69; Yājñ. I, 15.↩

18. Manu II, 144.↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. Manu II, 146-148.↩

21. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

22. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

23. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

24. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

25. आप० ध० १.३०.८.↩

26. Manu II, 147.↩

# ३२①

## 01 प्रवचनयुक्तो वर्षाशरदम् मैथुनं④

प्रवचन-युक्तो वर्षा-शरदं मैथुनं वर्जयेत् १

▼

## ⑤

>
▼ Bühler

1. Let him who teaches, avoid connubial intercourse during the rainy season and in autumn. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रवचनयुक्तो वर्षाशरदं मैथुनं वर्जयेत् ॥ १॥

## टिप्पनी⑥

प्रवचनमध्यापनम् । तेन युक्तो वर्षासु शरदि च मैथुनं वर्जयेत् ऋतावपि ॥१॥

#### 02 मिथुनीभूय च न

मिथुनी-भूय च, न तया सह सर्वां रात्रिं शयीत २

▼

## ⑤

>
▼ Bühler

2. And if he has had connection (with his wife), he shall not lie with her during the whole night 2

▼ हरदत्त-टीका

## सूत्रम्⑥

मिथुनीभूय च न तया सह सर्वां रात्रिं शयीत ॥ २॥

### टिप्पनी⑥

मिथुनीभूय मैथुनं कृत्वा तया भार्यया सह तां रात्रिं सर्वां न शयीत ॥ २ ॥

#### 03 शयानश्चाध्यापनं वर्जयेत्

शयानश् चाध्यापनं वर्जयेत् ३

▼

### ⑤

>
▼ Bühler

3. He shall not teach whilst he is lying on a bed.

▼ हरदत्त-टीका

### सूत्रम्⑥

शयानश्चाऽध्यापनं वर्जयेत् ॥ ३॥

### टिप्पनी⑥

दिवा नक्तं च शयानस्याऽध्यापनप्रतिषेधः। स्वयं तु धारणार्थमधीयानस्य न दोषः ॥ ३ ॥

#### 04 न च तस्यां

न च तस्यां शय्यायाम् अध्यापयेद् यस्यां शयीत ४

▼

### ⑤

>
▼ Bühler

4. Nor shall he teach (sitting) on that couch on which he lies (at night with his wife).

▼ हरदत्त-टीका

### सूत्रम्⑥

न च तस्यां शय्यायामध्यापयेद्यस्यां शयीत ॥४॥

## टिप्पनी⑥

यस्या शय्यायां भार्यया सह शयीत रात्रौ तस्यां शय्यायामासीनोऽपि नाऽध्यापयेत् ॥ ४॥

#### 05 अनाविःस्रगनुलेपणः स्यात्

अन्-आविः*(भूत)*-स्रग्-अनुलेपणः स्यात् ५

▼

## ⑤

>
▼ Bühler

5. He shall not show himself adorned with a garland, or anointed with ointments. 3

▼ हरदत्त-टीका

## सूत्रम्⑥

अनाविःस्रगनुलेपणस्स्यात् ॥ ५ ॥

## टिप्पनी⑥

आविर्-भूते प्रकाशिते स्रगनुलेपने यस्य एवंभूतो न स्यात् । णत्वं पूर्ववत् ॥ ५ ॥

#### 06 सदा निशायान् दारम्

सदा निशायां दारं प्रत्य् अलंकुर्वीत ६

▼

## ⑤

>
▼ Bühler

6. At night he shall always adorn himself for his wife.

▼ हरदत्त-टीका

## सूत्रम्⑥

सदा निशायां दारं प्रत्यलङ्कुर्वीत ॥ ६ ॥

## टिप्पनी⑥

'दारं प्रतीति वचनादुपगमनार्थमलङ्करणम् । तेन भार्या अशक्त्यादिना उपगमनायोग्यत्वे नाऽयं नियमः ॥ ६ ॥

#### 07 सशिरावमज्जनमप्सु वर्जयेत्

*(नित्य-स्नाने स्नातकोचिते)* सशिरा वमज्जनम् अप्सु वर्जयेत् ७

▼

## ⑤

>
▼ Bühler

7. Let him not submerge his head together with his body (in bathing),

▼ हरदत्त-टीका

## सूत्रम्⑥

सशिरा वमज्जनमप्सु वर्जयेत ॥७॥

## टिप्पनी⑥

**वमज्जनम्** अवमज्जनम् ।

'वष्टि वागुरिरल्लोपमवाप्योरुपसर्गयो'रित्य् अकारलोपः ।
तत् **सशिरा** वर्जयेत् ।
सह शिरसा स्नानं न कुर्यात् ।

अवगाहन-विधयः सर्वे स्नातक-व्यतिरिक्ते चरितार्थाः, नैमित्तिकाश् च ।
स्नातकस्य तु नित्य-स्नानम् अवगाहन-रूपं न भवतीत्य् आचार्यस्य पक्षः ॥ ७ ॥

#### 08 अस्तमिते च स्नानम्

अस्तम् इते च स्नानम् *(वर्जयेत्)*८

▼

## ⑤

>
▼ Bühler

8. And (let him avoid) to bathe after sunset.

▼ हरदत्त-टीका

## सूत्रम्⑥

अस्तमिते च स्नानम् ॥ ८ ॥

## टिप्पनी⑥

अस्तमिते आदित्ये सर्वप्रकारं स्नानं वर्जयेत् ॥ ८॥

#### 09 पालाशमासनम् पादुके दन्तप्रक्षालनमिति

पालाशम् {आसनं, पादुके, दन्त-प्रक्षालनम्} इति च वर्जयेत् ९

▼

## ⑤

>
▼ Bühler

9. Let him avoid to use a seat, clogs, sticks for cleaning the teeth, (and other utensils) made of Palāśa-wood.

▼ हरदत्त-टीका

## सूत्रम्⑥

पालाशमासनं पादुके दन्तप्रक्षालनमिति च वर्जयेत् ॥ ९ ॥

## टिप्पनी⑥

पालाशमासनादि वर्जयेत् । दन्तप्रक्षालनं दन्तकाष्ठम् । इतिशब्दः प्रकारे। तेनाऽन्यदपि गृहोपकरणं पालाशं वर्जयेत् ॥ ६ ॥

#### 10 स्तुतिञ् च गुरोः

स्तुतिं च गुरोः समक्षं - यथा "सुस्नातम्" इति १०

▼

## ⑤

>
▼ Bühler

10. Let him avoid to praise (himself) before his teacher, saying, 'I have properly bathed or the like.'

▼ हरदत्त-टीका

## सूत्रम्⑥

स्तुतिं च गुरोस्समक्षं यथा सुस्नातमिति ॥१०॥

## टिप्पनी⑥

'सुस्नात'मित्यादिकां च स्तुतिं गुरोस्सन्निधौ वर्जयेत् ॥१०॥

#### 11 आ निशाया जागरणम्

आ *(मध्य)*निशाया जागरणम् *(स्यात्)* ११

▼

## ⑤

>
▼ Bühler

11. Let him be awake from midnight.

▼ हरदत्त-टीका

## सूत्रम्⑥

आ निशाया जागरणम् ॥ ११ ॥

## टिप्पनी⑥

निशा रात्रेर्मध्यमो भागः । आ तस्मात् जागृयात् न स्वप्यात् ॥११॥

#### 12 अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः

अनध्यायो निशायाम् *(=रात्रेर् मध्यभागः)* - अन्यत्र धर्मोपदेशाच् छिष्येभ्यः १२

▼

## ⑤

>
▼ Bühler

12. Let him not study (or teach) in the middle of the night; but (he may point out) their duties to his pupils.

▼ हरदत्त-टीका

## सूत्रम्⑥

अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः ॥१२॥

## टिप्पनी⑥

निशायामनध्यायः अध्ययनमध्यापनं च न कुर्यात् । शिष्येभ्यस्तु धर्मोपदेशोऽनुज्ञायते ॥ १२ ॥

#### 13 मनसा वा स्वयम्

मनसा वा स्वयम् *(अधीयीत)*॥ १३ ॥

▼

## ⑤

>
▼ Bühler

13. Or (he may) by himself mentally (repeat the sacred texts).

▼ हरदत्त-टीका

## सूत्रम्⑥

मनसा वा स्वयम् ॥ १३ ॥

## टिप्पनी⑥

निशायामनध्यायस्य प्रतिप्रसवः-मनसा वा स्वयं चिन्तयेदिति ॥ १३ ॥

#### 14 ऊर्ध्वम् अर्धरात्राद् अध्यापनम्

ऊर्ध्वम् अर्धरात्राद् अध्यापनम् १४

▼

## ⑤

>
▼ Bühler

14. After midnight he may teach.

▼ हरदत्त-टीका

## सूत्रम्⑥

ऊर्ध्वमर्धरात्रादध्यापनम् ॥ १४ ॥

## टिप्पनी⑥

अयमपि प्रतिप्रसवः । निशायामपि षोडश्या नाडिकाया आरभ्याध्यापनं भवतीति ॥१४॥

#### 15 नापररात्रमुत्थायानध्याय इति संविशेत्

नापररात्रम् उत्थायानध्याय इति संविशेत् १५

▼

## ⑤

>

▼ Bühler

15. When he has risen (at midnight, and taught) during the third watch of the night, let him not lie down again (saying), 'Studying is forbidden.' 4

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽपररात्रमुत्थायाऽनध्याय इति संविशेत् ॥ १५ ॥

## टिप्पनी⑥

रात्रेस्तृतीयो भागोऽपररात्रः । ऊर्ध्वमर्धरात्रादुत्थायाऽध्यापयन्नपररात्रे न संविशेत् न शयीत । यद्यपि तस्मिन्नष्टम्यादिरनध्यायः प्राप्तो भवति । किं पुनः स्वाध्याये । तथा च मनुः—
5'न निशान्ते परिश्रान्तो ब्रह्माऽधीत्य पुनः स्वपेत् ।' इति ॥१५॥

#### 16 काममपश् शयीत

कामम् *(स्तम्बादिषु लीनः)* अपश्-शयीत १६

▼

## ⑤

>
▼ Bühler

16. At his pleasure he may (sleep) leaning (against a post or the like).

▼ हरदत्त-टीका

## सूत्रम्⑥

6काममपशयीत ॥ १६ ॥

## टिप्पनी⑥

अनेन स्तम्भाद्य्-उपाश्रयणेनाऽऽसीनस्य स्वापो ऽनुशायते । श्रिञ् सेवायाम् । तत्र रेफलोपश् छान्दसः। तथा शकारस्य द्विर्वचनम् ॥ १६ ॥

#### 17 मनसा वाधीयीत

मनसा वाधीयीत १७

▼

## ⑤

>
▼ Bühler

17. Or he may mentally repeat (the sacred texts).

▼ हरदत्त-टीका

## सूत्रम्⑥

मनसा वाऽधीयीत ॥ १७ ॥

## टिप्पनी⑥

अयमप्यूर्ध्वमर्धरात्रादुत्थायाऽध्यापयतोऽनध्यायप्राप्तावेवोच्यते। म नसा प्राप्तं प्रदेशमधीयीत स्वयं चिन्तयेत् । उपाश्रित्य वा स्वप्यात् ॥१७॥

#### 18 क्षुद्रान्क्षुद्राचरितांश्च देशान्न सेवेत

क्षुद्रान्, क्षुद्राचरितांश् च देशान् न सेवेत १८

▼

## ⑤

>
▼ Bühler

ननु च प्रागन्याधानात् कर्मभिस्सम्बध्यते गार्ह्यैस्स्मार्तैश्च, तत्किमुच्यते आधाने हि सती कर्मभिस्सम्बध्यत इति ? सत्यम् , अस्मादेव च हेतुनिर्देशादवसीयते-प्रागाधानात् सत्यामपि धर्मसम्पत्तौ प्रजासम्पत्तौ च रागान्धस्य कदाचिद्दारग्रहणे नाऽतीव दोष इति । अथ यस्याहिताग्नेर्भार्या सत्येव कर्मण्यश्रद्दधाना अशक्ता वा भवति पुत्राश्च मृता अनुत्पन्ना वा तस्य कथम् । यद्येषा युक्तिः 'धर्मप्रजासम्पन्न' इति कर्मभिस्सम्बध्यत इति च, तदा कर्तव्यो विवाहः । (न च 'प्रागग्न्याधेया'दित्यस्य विरोधः । अन्यतराभावे कार्येत्यस्यैव स शेषः । न पुनरुभयाभावे कार्येत्यस्य । भारद्वाजसूत्रे तु यद्यप्यविशेषेणाऽहिताग्नेर्दारानुज्ञा प्रतीयते-“अथ यद्याहिताग्निः पुनर्दारक्रियां कुर्वीत यद्यग्नीनोत्सृजेत् लौकिकास्सम्पद्येरन् तस्य पुनरग्न्याधेयं कुर्वीतेत्याश्मरथ्या, पुनराधनमित्यालेखनः, पुनरग्न्याधेयमित्यौडुलोमि,रिति । तथापि तस्याप्ययमेव विषयः) ॥ १४ ॥

#### 15 सगोत्राय दुहितरन् न

सगोत्राय दुहितरं न प्रयच्छेत् १५

▼

⑤

>

▼ Bühler

15. He shall not give his daughter to a man belonging to the same family (Gotra), 16

▼ हरदत्त-टीका

## सूत्रम्⑥

सगोत्राय दुहितरं न प्रयच्छेत् ॥ १५ ॥

## टिप्पनी⑥

कन्यागोत्रमेव गोत्रं यस्य तस्मै कन्या न देया । यथा-हारीताय हारीतीं, वात्स्याय वात्सीमित्यादि ॥ १५ ॥

#### 16 मातुश्च योनिसम्बन्धेभ्यः

मातुश्च योनिसंबन्धेभ्यः १६

▼

## ⑤

>
▼ Bühler

16. Nor to one related (within six degrees) on the mother's or (the father's) side. 17

▼ हरदत्त-टीका

## सूत्रम्⑥

मातुश्च योनिसम्बन्धेभ्यः ॥ १६ ॥

## टिप्पनी⑥

मातुर्योनिसम्बन्धाः कन्याया मातुलादयः । चकारात् पितुरप्येवम् । तेभ्यः असगोत्रेभ्योऽपि न देया कन्यका । अत्र मनुः—
18 'असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां 19दारकर्मण्यमैथुनी ॥

20 स्नात्वा समुद्वहेत्कन्यां सवर्णं लक्षणान्विताम् ।
यवीयसी भ्रातृमतीमसगोत्रां प्रयत्नतः ॥
मातुस्सगोत्रामप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञाने नोद्वहेदविशङ्कितः ॥
मातुस्सपिण्डा यत्नेन वर्जनीया द्विजातिभिः ॥ इति।'

गौतमः —
21 असमानप्रवरैर्विवाहः । ऊर्ध्वं सप्तमात्पितबन्धुभ्यो बीजिनश्च । मातृबन्धुभ्यः पञ्चमात्, इति । कात्यायनः— 'प्रवर एषामविवाह इत्येतेषु प्रत्यध्यायमाहत्य वचनं येषामेव प्रवरः तेषामेवाऽविवाह' इति । कारिका च भवति —
रातीयानामविवाह एषामिति येषां सूत्रकृदब्रवीत् ।
तेषामेव विवाहः स्यात् नान्येषामिति धारणेति ॥
शङ्खः22 —
'दारानाहरेत्सदृशानसमानार्षेयानसम्बन्धानासप्तमपञ्चमात्पितृमातृबन्धुभ्यः, इति ।

वसिष्ठः —
23 गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुरज्ञातः स्नात्वाऽसमानार्षेयामस्पृष्टमैथुनामवरवयसीं भ्रातृमतीं सदृशीं भार्यां विन्देत । पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः' इति ।
हारीत24 —
'शिवत्री कुष्ठ्युदरी यक्ष्मामयाव्यल्पायुरनार्षेयमब्रह्म समानार्षेयमित्येतान्यपतितान्यपि कुलानि वर्जनीयानि भवन्ति । कुलानुरूपाः प्रजा भवन्तीति । आदितष्षडयज्ञियत्वादनार्षेयम् । अवेदत्वादब्रह्म । एककुलत्वात् समानार्षेयमिति । तस्मात् सप्त पितृतः परीक्ष्य पञ्च मातृतोऽनग्निकां श्रेष्ठां भ्रातृमतीं भार्यां विन्देत ॥

पैठीनसिः—असमानायां कन्यां वरयेत् । पञ्चमातृतः परिहरेत्सप्तपितृतः त्रीन्मातृतः पञ्च पितृतो वा'।

याज्ञवल्क्यः —
25 अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥'
विष्णुः—
26 असगोत्रामसमानप्रवरां भार्यां विन्देत मातृतः पञ्चमात् पितृतस्सप्तमात् ।

नारदः —
27आसप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः । अविवाह्यास्सगोत्रास्स्युस्समानप्रवरास्तथा ।'

शातातपः—
28 परिणीय सगोत्रां तु समानप्रवरां तथा ।
कृत्वा तस्यास्समुत्सर्गमतिकृच्छ्रो विशोधनम् ॥
मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजचान्द्रायणं चरेत् ॥'

मनुः —
29पैतृष्वसेयीं भगिनीं स्वस्नीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ।
ज्ञातित्वेनाऽनुपेयास्ताः पतति ह्युपयन्नधः ॥'

बौधायनः— 30 'सगोत्रां चेदमत्योपयच्छेत मातृवदेनां विभृयात्' । 31 सगोत्रां गत्वा चान्द्रायणमुपदिशेत् ॥ व्रते परिनिष्ठिते ब्राह्मणीं न त्यजेत् मातृवद्भगिनीवद्गर्भो न दुष्यतीति काश्यप इति विज्ञायते । अथ सान्निपात अविवाहः तदाध्यायं वर्जयेत् । बोधायनस्य तत्प्रमाणं कर्तव्यम् । मानव्यो हि प्रजा इति विज्ञायते इति ।
गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥
एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्वद्भृग्वाङ्गिरोगणात ॥' इति ।

सुमन्तुः —
32पितृपत्न्यस्सर्वा मातरस्तद्भ्रातरो मातुलाः तत्सुता मातुलसुतास्तस्मात्ता नोपयन्तव्या' इति ॥ १६ ॥

#### 17 ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्याणि

ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्याणि बुद्ध्वा प्रजासहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणालंकृत्य १७

▼

⑤

>
▼ Bühler

17. At the wedding called Brāhma, he shall give away (his daughter) for bearing children and performing the rites that must be performed together (by a husband and his wife), after having enquired regarding (the bridegroom's) family, character, learning, and health, and after having given (to the bride) ornaments according to his power. 33

▼ हरदत्त-टीका

## सूत्रम्⑥

ब्राह्मे विवाहे बन्धुशीललक्षणसम्पन्नश्रुतारोग्याणि बुद्ध्वा प्रजां सहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणाऽलंकृत्य ॥ १७ ॥

## टिप्पनी⑥

ब्रह्मणा इष्टो ब्राह्मः । तस्मिन् विवाहे वरस्य बन्ध्वादीन् बुद्ध्वा परीक्ष्य प्रजां दुहितरं सहत्वकर्मभ्यः सहकर्तव्यानि यानि कर्माणि तेभ्यः, तानि कर्तुम्, प्रतिपादयेत् दद्यात् । शक्तिविषयेण विभक्तिप्रतिरूपोऽयं निपातो यथाशक्तीत्यस्यार्थे द्रष्टव्यः । यथाशक्त्यलंकृत्य दद्यादित्येष ब्राह्मो विवाहः । प्रजासहत्वकर्मभ्य' इति पाठे प्रजार्थं सहत्वकर्मार्थं चेति ॥ १७॥

#### 18 आर्षे दुहितृमते मिथुनौ

आर्षे दुहितृमते मिथुनौ गावौ देयौ १८

▼

⑤

>
▼ Bühler

18. At the wedding called Ārsha, the bridegroom shall present to the father of the bride a bull and a cow. 34

▼ हरदत्त-टीका

## सूत्रम्⑥

आर्षे दुहितृमते मिथुनौ गावौ देयौ ॥ १८ ॥

## टिप्पनी⑥

ऋषिभिर्दष्टे विवाहे मिथुनौ गावौ स्त्रीगवी पुंगवश्च दुहितृमते देयौ । एष आर्षः ॥ १८ ॥

#### 19 दैवे यज्ञतन्त्र ऋत्विजे

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् १९

▼

## ⑤

>
▼ Bühler

19. At the wedding called Daiva, (the father) shall give her to an officiating priest, who is performing a Śrauta-sacrifice. 35

▼ हरदत्त-टीका

## सूत्रम्⑥

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् ॥ १९॥

## टिप्पनी⑥

देवैर्दृष्टे विवाहे यज्ञतन्त्रे वितते ऋत्विजे कर्म कुर्वते कन्यां दद्यात् । एष दैवो विवाहः ॥ १९॥

#### 20 मिथः कामात्सांवर्तेते स

मिथः कामात्सांवर्तेते स गान्धर्वः २०

▼

## ⑤

>
▼ Bühler

20. If a maiden and a lover unite themselves through love, that is called the Gāndharva-rite. 36

▼ हरदत्त-टीका

## सूत्रम्⑥

मिथः कामात्सांवर्तेते स गान्धर्वः ॥ २० ॥

## टिप्पनी⑥

यत्र कन्यावरौ रहसि कामात् मिथः परस्परं रागात् सांवर्तेते मिथुनी भवतः स गान्धर्वो विवाहः । समो दीर्घः पूर्ववत् । अत्र संयोगोत्तरकालं विवाहसंस्कारः कर्तव्यः ॥ २०॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकादशी कण्डिका ॥ ११ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition. ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
5. Manu II, 35.↩
6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
7. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
8. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
11. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
12. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
16. Manu II, 69; Yājñ. I, 15.↩
17. Manu II, 144.↩
18. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

19. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

20. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

21. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

> विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
> तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

22. आप० ध० १ ३१. ६.↩

23. इदं च तर्किकादिमतमनुसृत्य प्रभाकरमतञ्च । भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणां चोदनालक्षणानां धर्मत्वाङ्गीकारात् । उक्तं हि भट्टपादैः-

> श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः ।
> चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥ इति । श्लो. वा. १२. १९१.

↩

24. पक्षेऽप्राप्तांशस्य पूरणकरणादित्यर्थः ।↩

25. या०स्मृ० १.५२,५३.↩

26. मुद्रितश्लोकात्मकविष्णुस्मृतौ नेदं वचनमुपलभ्यते परन्तु ग्रन्थान्तरेष्वस्याविष्णुस्मृतित्वमुक्तम् ।↩

27. नार०स्मृ० व्यवहा० १२. श्लो० ७.↩

28. मुद्रितशातातपस्मृतौ लघुशततातपस्मृतौ बृद्धशातातपस्मृतौ वा नेदं वचनमुपलभ्यते ॥↩

29. म.स्मृ. ११.१७१, १७१.↩

30. बौ. ध. २.१.३८.↩

31. महाप्रवरे समाप्तिसूत्रकाण्डे । बौ० सू० (प्रवर) १३.५५.↩

32. सु० स्मृ०↩

33. Manu II, 146-148.↩

34. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

35. Manu II, 147.↩

36. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

# १२①

## 01 शक्तिविषयेण द्र व्याणि④

शक्ति-विषयेण द्रव्याणि दत्वा वहेरन् - स आसुरः १

▼

### ⑤

>
▼ Bühler

1. If the suitor pays money (for his bride) according to his ability, and marries her (afterwards), that (marriage is called) the Āsura-rite. 1

▼ हरदत्त-टीका

### सूत्रम्⑥

शक्तिविषयेण द्रव्याणि दत्वाऽऽवहरेन् स आसुरः ॥१॥

### टिप्पनी⑥

यत्र विवाहे कन्यावते यथाशक्ति द्रव्याणि दत्त्वाऽऽवहेरन् कन्यां स आसुरः । 2 'वित्तेनाऽऽनतिस्त्रीमतामासुर' इति गौतमः। तेन कन्यायै गृहक्षेत्राभरणादिदानेन विवाहो नाऽऽसुरः ॥१॥

#### 02 दुहितृमतः प्रोथयित्वा वहेरन्स

दुहितृमतः प्रोथयित्वा वहेरन् - स राक्षसः २

▼

### ⑤

>
▼ Bühler

2. If the (bridegroom and his friends) take away (the bride), after having overcome (by force) her father (or relations), that is called the Rākṣasa-rite. 3

▼ हरदत्त-टीका

### सूत्रम्⑥

दुहितृमतः प्रोथयित्वाऽऽवहेरन् स राक्षसः ॥२॥

## टिप्पनी⑥

दुहितृमतः कन्यावतः पित्रादीन् प्रोथयित्वा प्रमथ्य यत्राऽऽवहेरन् स राक्षसो विवाहः।
4 'हत्वा मित्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत् स राक्षस' इत्याश्वलायनः । अत्रापि विवाहसंस्कारः कर्तव्यः। द्वौ चाऽपरौ विवाहौ शास्त्रान्तरेषुक्तौ । तत्राऽऽश्वलायनः-5 'सह धर्मं चरतमिति प्राजापत्यः । सुप्तां प्रमत्तां वाऽपहरेत् स पैशाच' इति । ताविह पृथङ्नोक्तौ ब्राह्मराक्षसयोरन्तर्भावादिति ॥२॥

#### 03 तेषान् त्रय आद्याः

तेषां त्रय आद्याः प्रशस्ताः, पूर्वः पूर्वः श्रेयान् ३

▼

## ⑤

>
▼ Bühler

3. The first three amongst these (marriage-rites are considered) praiseworthy; each preceding one better than the one following. 6

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषां त्रय आद्याः प्रशस्ताः पूर्वः पूर्वः श्रेयान् ॥ ३ ॥

## टिप्पनी⑥

तेषां विवाहानां मध्ये आद्यास्त्रयो ब्राह्मार्षदैवा प्रशस्ताः । तत्रापि पूर्वः पूर्वोऽतिशयेन प्रशस्त इति ॥ ३ ॥

#### 04 यथा युक्तो विवाहस्तथा

यथा युक्तो विवाहस् - तथा युक्ता प्रजा भवति ४

▼

## ⑤

>
▼ Bühler

4. The quality of the offspring is according to the quality of the marriage-rite. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

यथायुक्तो विवाहस्तथा युक्ता प्रजा भवति ॥ ४ ॥

## टिप्पनी⑥

प्रशस्ते विवाहे जाता प्रजापि प्रशस्ता भवति । निन्दिते निन्दिता तत्र मनुः—
8ब्राह्मादिषु विवाहेषु चतुर्वेदानुपूर्वशः ।
ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसम्मताः ॥
रूपसत्त्वगुणापेता धनवन्तो यशस्विनः ।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥
उत्तरेषु च शिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मसमुज्झिताः ॥
प्राजापत्येन सह ब्राह्माद्याश्चत्वारो ब्राह्मणस्य ।
गान्धर्वराक्षसौ क्षत्रियस्य । आसुरं तु वैश्यशूद्रयोः ।
पैशाचो न कस्यचिदपि ॥४॥

#### 05 पाणिसमूढम् ब्राह्मणस्य नाप्रोक्षितम्

पाणि-समूढं *(भूभागम्)* ब्राह्मणस्य नाप्रोक्षितम् अभितिष्ठेत् ५

▼

## ⑤

>
▼ Bühler

5. He shall not step on a spot which has been touched by the hand of a Brāhmaṇa, without having sprinkled it with water.

▼ हरदत्त-टीका

## सूत्रम्⑥

पाणिसमूढं ब्राह्मणस्य नाऽप्रोक्षितमभितिष्ठेत् ॥ ५॥

## टिप्पनी⑥

**ब्राह्मणस्य** पाणिना **समूढम्** उपलिप्तं सम्मृष्टं वा भूप्रदेशम् **अप्रोक्षितं नाभितिष्ठेत्** नाधितिष्ठेत् । प्राध्यैवाऽधितिष्ठेदिति ॥ ५॥

#### 06 अग्निम् ब्राह्मणञ् चान्तरेण

अग्निं ब्राह्मणं चान्तरेण नातिक्रामेत् ६

▼

⑤

>
▼ Bühler

6. He shall not pass between a fire and a Brāhmaṇa,

▼ हरदत्त-टीका

## सूत्रम्⑥

अग्निं ब्राह्मणं चाऽन्तरेण नाऽतिक्रामेत् ॥ ६॥

## टिप्पनी⑥

अग्नेर्ब्राह्मणस्य च मध्ये न गच्छेत् ॥ ६ ॥

#### 07 ब्राह्मणांश्च

ब्राह्मणांश्च ७

▼

⑤

>
▼ Bühler

7. Nor between Brāhmaṇas.

▼ हरदत्त-टीका

## सूत्रम्⑥

ब्राह्मणांश्च ॥ ७ ॥

## टिप्पनी⑥

अन्तरेण नातिक्रामेदित्येव । ब्राह्मणानां च मध्ये न गच्छेत् ॥७॥

#### 08 अनुज्ञाप्य वातिक्रामेत्

अनुज्ञाप्य वातिक्रामेत् ८

▼

⑤

>
▼ Bühler

8. Or he may pass between them after having received permission to do so.

▼ हरदत्त-टीका

## सूत्रम्⑥

अनुज्ञाप्य वाऽतिक्रामेत् ॥ ८ ॥

## टिप्पनी⑥

स्पष्टम् ॥८॥

#### 09 अग्निमपश्च न युगपद्धारयीत

अग्निमपश्च न युगपद्धारयीत ९

▼

⑤

>
▼ Bühler

9. He shall not carry fire and water at the same time.

▼ हरदत्त-टीका

## सूत्रम्⑥

अग्निमपश्च न युगपद्धारयीत ॥ ९ ॥

## टिप्पनी⑥

अग्निमुदकञ्च न युगपद्धारयेत् ॥९॥

#### 10 नानाग्नीनाञ् च सन्निवापं

नानाग्नीनां च संनिवापं वर्जयेत् १०

▼

⑤

>
▼ Bühler

10. He shall not carry fires (burning in) separate (places) to one (spot). 9

▼ हरदत्त-टीका

## सूत्रम्⑥

नानाग्नीनां च सन्निपातं वर्जयेत् ॥ १० ॥

## टिप्पनी⑥

पृथगवस्थितानामग्नीनामेकत्र समावपनं वर्जयेत् न कुर्यात् । अग्नावग्निं न प्रक्षिपेदित्यन्ये10 ॥१०॥

#### 12 प्रतिमुखमग्निमाह्रियमाणम् नाप्रतिष्ठितम् भूमौ

प्रतिमुखमग्निमाह्रियमाणम् नाप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् *(प्रतिष्ठिते तु प्रदक्षिणीकुर्यात्)*११

▼

⑤

>
▼ Bühler

11. If, whilst he walks, fire is being carried towards him, he shall not walk around it with his right hand turned towards it, except after it has been placed on the ground. 11

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रतिमुखमग्निमाह्रियमाणं नाऽप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् ॥ ११ ॥

## टिप्पनी⑥

यदाऽस्य गच्छतः प्रतिमुखमग्निर्ह्रियते तदा न तं प्रदक्षिणीकुर्यात् स चेद्भूमौ प्रतिष्ठितो न भवति । प्रतिष्ठिते त्वग्नौ दृष्टे प्रदक्षिणीकुर्यादिति ॥११॥

#### 12 पृष्ठतश्चाऽऽत्मनः पाणी

पृष्ठतश्चात्मनः पाणी न संश्लेषयेत् १२

▼

### ⑤

>
▼ Bühler

12. He shall not join his hands on his back.

▼ हरदत्त-टीका

### सूत्रम्⑥

पृष्ठतश्चाऽऽत्मनः पाणी न संश्लेषयेत् ॥१२॥

### टिप्पनी⑥

स्वस्य पृष्ठभागे स्वपाणिद्वयं न सश्लेषयेन्न बध्नीयात् ॥ १२॥

#### 13 स्वपन्न् अभिनिम्रुक्तो नाश्वान्

स्वपन्न् अभिनिम्रुक्तो *(=सूर्यास्तसमये निद्रालुः)* नाश्वान् *(=अनश्नन्)* वाग्यतो रात्रिमासीत । श्वोभूत उदकमुपस्पृश्य वाचं विसृजेत् १३

▼

### ⑤

>
▼ Bühler

13. If the sun sets whilst he sleeps, he shall sit up, fasting and silent, for that night. On the following morning he shall bathe and then raise his voice (in prayer). 12

▼ हरदत्त-टीका

### सूत्रम्⑥

स्वपन्नभिनिम्रुक्तो नाश्वान् वाग्यतो रात्रिमासीत श्वोभूत उदकमुपस्पृश्य वाचं विमृजेत् ॥ १३ ॥

### टिप्पनी⑥

13 सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिम्रुक्ताभ्युदितौ तौ यथाक्रमम् ॥

स्वपन्नभिनिम्रुक्तो नाश्वानभुजानस्तूष्णीं भूतो रात्रिं सर्वामासीत न शयीत । अथाऽपरेद्युः उदकमुपस्पृश्य प्रातः स्नात्वा वाचं विसृजेत् । अयमस्य निर्वेषः ॥

#### 14 स्वपन्न् अभ्युदितो नाश्वान्

स्वपन्न् अभ्युदितो *(नाम सूर्योदये निद्रालुः)* नाश्वान्*(=अनश्नन्)* वाग्यतोऽहस्तिष्ठेत् १४

▼

⑤

>
▼ Bühler

14. If the sun rises whilst he is asleep, he shall stand during that day fasting and silent.

▼ हरदत्त-टीका

## सूत्रम्⑥

स्वपन्नभ्युदितो नाश्वान्वाग्यतोऽहस्तिष्ठेत् ॥१४॥

## टिप्पनी⑥

पूर्वेण गतम् । 'उदकमुपस्पृश्य वाचं विसृजेदिति चात्राऽपेक्ष्यते । तत्रास्तमिते स्नानप्रतिषेधात् सायमेव स्नात्वा वाचं विसृज्य सन्ध्यामुपासीत ॥१४॥

#### 15 आतमितोः प्राणमायच्छेदित्येके १५

आतमितोः प्राणमायच्छेदित्येके *(तावद् वा प्राणान् आयमयेद् यावद् अङ्ग्लानिर् न स्यात्)*१५

▼

⑤

>
▼ Bühler

15. Some declare that he shall restrain his breath until he is tired.

▼ हरदत्त-टीका

## सूत्रम्⑥

आतमितोः प्राणमायच्छेदित्येके ॥ १५ ॥

## टिप्पनी⑥

यावदङ्गानां ग्लानिर्भवति तावत्प्राणमायच्छेत् प्राणवायुमाकृष्य धारयेत् । प्राणायाम कुर्यादित्येके मन्यते । शक्त्यपेक्षो विकल्पः ।
तत्र मनुः — 14सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामस्स उच्यते ॥ इति ।
एवमावर्तयेद्यावद्ग्लानिः ॥ १५॥

#### 16 स्वप्नं वा पापकं दृष्ट्वा

स्वप्नं वा पापकं दृष्ट्वा १६

▼

## ⑤

>
▼ Bühler

16. And (he shall restrain his breath until he is tired) if he has had a bad dream,

▼ हरदत्त-टीका

## सूत्रम्⑥

स्वप्नं वा पापकं दृष्ट्वा ॥ १६ ॥

## टिप्पनी⑥

पापकस्वप्नो दुस्स्वप्नः मर्कटास्कन्दनादिः । तं च दृष्ट्वा ॥ १६ ॥

#### 17 अर्थं वा सिषाधयिषन्

अर्थं वा सिषाधयिषन् १७

▼

## ⑤

>
▼ Bühler

17. Or if he desires to accomplish some object,

▼ हरदत्त-टीका

## सूत्रम्⑥

अर्थं वा 15सिसाधयिषन् ॥ १७ ॥

## टिप्पनी⑥

अर्थः प्रयोजनम् । तञ्च दृष्टमदृष्टं वा साधयितुमिच्छन् ॥ १७ ॥

#### 18 नियमातिक्रमे चान्यस्मिन्

नियमातिक्रमे चान्यस्मिन् १८

▼

## ⑤

>
▼ Bühler

18. Or if he has transgressed some other rule. 16

▼ हरदत्त-टीका

## सूत्रम्⑥

नियमातिक्रमे चाऽन्यास्मिन् ॥ १८॥

## टिप्पनी⑥

नियमानां 'उदङ्मुखो मूत्रं कुर्यादि' (१.३१.१.) त्येवमादीनामतिक्रमे च आतमितो' प्राणमायच्छदिति सर्वत्र शेषः ॥ १८ ॥

#### 19 दोषफलसंशये न तत्कर्तव्यम्

दोषफलसंशये न तत्कर्तव्यम् १९

▼

## ⑤

>
▼ Bühler

19. (If he is) doubtful (whether) the result (of an action will be good or evil), he shall not do it.

▼ हरदत्त-टीका

## सूत्रम्⑥

दोषफलसंशये न तत् कर्तव्यम् ॥ १९ ॥

## टिप्पनी⑥

यस्मिन् कर्मणि कृते पक्षे दोषः फलं सम्भाव्यते न तत् कुर्यात, यथा सभये देशे एकाकिनो गमनमिति ॥ १९ ॥

#### 20 एवमध्यायानध्याये

एवमध्यायानध्याये २०

▼

## ⑤

>
▼ Bühler

20. (He shall follow) the same principle (if he is in doubt whether he ought) to study or not.

▼ हरदत्त-टीका

## सूत्रम्⑥

एवमध्यायानध्याये ॥ २० ॥

## टिप्पनी⑥

संशय इत्युपसमस्तमप्यपेक्ष्यते । अध्यायोऽनध्याय इति संशयेऽप्येवं न तत् कर्तव्यमिति । 'सन्धावनुस्तनित' (१.९.२०.) इत्युदाहरणम् । पूर्वस्यैवाऽयं प्रपञ्चः ॥ २० ॥

#### 21 न संशये प्रत्यक्षवद्ब्रूयात्

न संशये प्रत्यक्षवद्ब्रूयात् २१

▼

## ⑤

>
▼ Bühler

21. He shall not talk of a doubtful matter as if it were clear. 17

▼ हरदत्त-टीका

## सूत्रम्⑥

न संशये प्रत्यक्षवद्ब्रूयात् ॥ २१ ॥

### टिप्पनी⑥

संशयितमर्थमात्मनोऽज्ञानपरिहाराय प्रत्यक्षवत् निश्चितवन्न ब्रूयात् ॥

#### 22 अभिनिम्रुक्ताभ्युदितकुनखिश्यावदाऽग्रदिधिषु दिधिषूपति पर्याहितपरीष्टपरिवित्तपरिविन्नपरिविविदानेषु

अभिनिम्रुक्ताभ्युदित*(=सन्ध्याशायिनौ)*-कुनखि-श्यावदा-ऽग्रदिधिषु*(=कनिष्ठाया वोढा)*--दिधिषू-पति*(अग्रदिधिषौ ज्येष्ठायाः पश्चाद् वोढा)*-पर्याहित-परीष्ट-परिवित्त*(=अकृतविवाहः कनिष्ठे कृतविवाहे)*-परिविन्न*(=कनिष्ठे भागग्राहिणि ज्येष्ठः)*-परिविविदानेषु *(=परिविन्न-भ्राता)* चोत्तरोत्तरस्मिन् अशुचिकर-निर्वेषो गरीयान् गरीयान् २२

▼

### ⑤

>
▼ Bühler

22. In the case of a person who slept at sunset, of 18 one who slept at sunrise, of one who has black nails, or black teeth, of one who married a younger sister before the elder one was married, of one who married an elder sister whose younger sister had been married already, (of a younger brother who has kindled the sacred Gṛhya-fire before his elder brother,) of one whose younger brother has kindled the sacred fire first, (of a younger brother who offers a Soma-sacrifice before his elder brother,) of an elder brother whose younger brother offered a Soma-sacrifice first, of an elder brother who marries or receives his portion of the inheritance after his younger brother, and of a younger brother who takes a wife or receives his portion of the inheritance before his elder brother,--penances ordained for crimes causing impurity, a heavier one for each succeeding case, must be performed.

▼ हरदत्त-टीका

### सूत्रम्⑥

अभिनिर्मुक्ताभ्युदितकुनखिश्यावदाग्रदिधिषुदिधिषूपतिपर्याहितपरीष्टपरिवित्तपरिविन्नपरिविविदानेषु चोत्तरोत्तरस्मिन्नशुचिकरनिर्वेषो गरीयान् गरीयान् ॥ २२ ॥

### टिप्पनी⑥

आद्यौ द्वौ गतौ। कुनखी कृष्णनखः । श्यावा दन्ता यस्य स श्यावदन् विवर्णदन्तः। '19विभाषा श्यावारोकाभ्यामि'ति दत्रादेशः । तस्य न लोपश्छान्दसः । ज्येष्ठायामनूढायां पूर्वं कनीयस्या वोढा अग्रदिधिषुः । पश्चादितरस्या वोढा दिधिषूपतिः । ज्येष्ठे अकृताधाने कृताधानः कनिष्ठः पर्याधाता । ज्येष्ठः पर्याहितः । ज्येष्ठे अकृतसोमयागे कृतसोमयागः कनिष्ठः परियष्टा । ज्येष्ठः परीष्टः । अकृतविवाहे ज्येष्ठे कृतविवाहः कनिष्ठः 20परिवेत्तेति प्रसिद्धः । ज्येष्ठः 21परिवित्तः । 22ज्येष्ठस्य भार्यामुपयच्छमानः परिविन्नः। यस्मिन्नगृहातभागे वा कनिष्ठो भागं गृह्णाति स ज्येष्ठः परिविन्नः । कनिष्ठः परिविविदानः । चकारः पर्याधातृप्रभृतीनां समुच्चयार्थः । एतेष्वभिनिम्रुक्तादिषु यो य उत्तरस्तस्मिंस्तस्मिन्द्वादशमासादिरशुचिकर निर्वेषो यः पूर्वमुक्तः तत्र तत्र गरीयान् भवति । पूर्वत्र पूर्वत्र लघीयान् । अभिनिम्रुताभ्युदितयोरनन्तरोक्तं प्रायश्चित्तद्वयमपि विकल्पेन भवति ॥ २२ ॥

#### 23 तच्च लिङ्गञ् चरित्वोद्धार्यमित्येके

तच्च लिङ्गं *(=कुनखित्वादिकम्)* चरित्वोद्धार्यमित्येके २३

▼

### ⑤

>

▼ Bühler

23. Some declare, that after having performed that penance, he shall remove its cause. 23

▼ हरदत्त-टीका

## सूत्रम्⑥

तच्च लिङ्गं चरित्वोद्धार्यमित्येके ॥ २३ ॥

## टिप्पनी⑥

यस्मिन् कौनख्यादिके लिङ्गे यत् प्रायश्चितमुक्तं तच्चरित्वा तत् कौनख्यादिकं लिङ्गमुद्धरेदित्येके मन्यन्ते । अन्यत्राऽहिताग्निभ्य इति स्मृत्यन्तरम् ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने द्वादशी कण्डिका ॥१२॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने पञ्चमः पटलः ॥ ५ ॥

इति पञ्चमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
6. Manu II, 35.↩
7. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
8. आप० ध० १.३०.८.↩
9. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

12. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

13. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

14. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

15. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

16. Manu II, 69; Yājñ. I, 15.↩

17. Manu II, 144.↩

18. Manu II, 146-148.↩

19. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

20. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

21. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

22. आप० ध० १.३०.८.↩

23. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

**ဝဋ①**

# १३①

## 01 सवर्णाऽपूर्वशास्त्रविहितायां यथर्तु गच्छतः④

सवर्णा-ऽपूर्व*(=अनन्यव्यूढा)*-शास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबन्धः १

▼

## ⑤

>
▼ Bühler

1. Sons begotten by a man who approaches in the proper season a woman of equal caste, who has 1 not belonged to another man, and who has been married legally, have a right to (follow) the occupations (of their castes),

▼ हरदत्त-टीका

## सूत्रम्⑥

सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिस्सम्बन्धः ॥ १ ॥

## टिप्पनी⑥

सवर्णा चाऽसावपूर्वा च शास्त्रविहिता चेति कर्मधारयः । सवर्णा सजातीया, ब्राह्मणस्य ब्राह्मणीत्यादि । अपूर्वा । अनन्यपूर्वा अन्यस्मा अदत्ता, न विद्यते पूर्वः पतिरस्या इति । शास्त्रविहिता शास्त्रोक्तेन विवाहसंस्कारेण संस्कृता 'सगोत्राय दुहितरं न प्रयच्छे'( २. ११. १५) दित्यादिशास्त्रानुगुणा वा । एवम्भूतायां भार्यायां यथर्तु गृह्योक्तेन ऋतुगमनकल्पेन गच्छतो ये पुत्रा जायन्ते तेषां 'स्वकर्म ब्राह्मणस्ये' (२.१०.४)त्यादिना पूर्वमुक्तैः कर्मभिस्सम्बन्धो भवति । ( गच्छथ इति थकारोऽपपाठः) ॥१॥

- ( ) कुण्डलान्तर्गतो भागो नास्ति घ. ङ. पुस्तकयोः ।

#### 02 दायेनाव्यतिक्रमश्चोभयोः

दायेनाव्यतिक्रमश् चोभयोः *(मातापित्रोः)* २

▼

## ⑤

>
▼ Bühler

2. And to (inherit the) estate,
3. If they do not sin against either (of their parents). 2

▼ हरदत्त-टीका

## सूत्रम्⑥

दायेन चाऽव्यतिक्रमश्चोभयोः ॥ २ ॥

## टिप्पनी⑥

उभयोर्मातापित्रोर्दायेन च तेषां सम्बन्धो भवति अव्यतिक्रमश्च । च इति चेदर्थे अव्यतिक्रमश्चेत् , यदि ते मातरं पितरं च न व्यतिक्रमेयुः । व्यतिक्रमे तु दायहानिरिति ॥
अपर आह— 'उभयोरपि दायेन तेषां व्यतिक्रमो न कर्तव्यः । अवश्यं देयो दायस्तेभ्य इति ॥ २॥

#### 03 पूर्ववत्यामसंस्कृतायां वर्णान्तरे च

पूर्ववत्याम्, असंस्कृतायां, वर्णान्तरे च मैथुने दोषः ३

▼

## ⑤

>
▼ Bühler

4. If a man approaches a woman who had been married before, or was not legally married to him, or, belongs to a different caste, they both commit a sin.

▼ हरदत्त-टीका

## सूत्रम्⑥

पूर्ववत्यामसंस्कृतायां वर्णान्तरे च मैथुने दोषः ॥३॥

## टिप्पनी⑥

अन्येन पाणिग्रहणेन तद्वती पूर्ववती । असंस्कृता विवाहसंस्काररहिता । वर्णान्तरं ब्राह्मणादेः क्षत्रियादिः । तेषु पूर्ववत्यादिषु मैथुने सति दोषो भवति । कस्य ? तयोरेव मिथुनीभवतोः ॥ ३ ॥

#### 04 तत्रापि दोषवान्पुत्र एव

तत्रापि दोषवान्पुत्र एव ४

▼

## ⑤

>
▼ Bühler

5. Through their (sin) their son also becomes sinful.

▼ हरदत्त-टीका

## सूत्रम्⑥

तत्राऽपि दोषवान् पुत्र एव ॥ ४॥

## टिप्पनी⑥

तत्रेति सप्तम्यास्त्रल्3 'इतराभ्योऽपि दृश्यन्त' इति । ताभ्यामुभाभ्यामपि पुत्र एवाऽतिशयेन दोषवान् । तत्र पूर्ववत्यामुत्पन्नौ कुण्डगोलकौ 4 'पत्यौ जीवति कुण्डस्स्यान्मृते भर्तरि गोलक' इति ।
असंस्कृतायामुत्पन्नस्य नामान्तरं नास्ति । किं तु दुष्टत्वमेव ।

वर्णान्तरे तु जात्यन्तरम् । तत्र गौतमः —
5 अनुलोमाः पुनरनन्तरैकान्तरद्व्यन्तरासु जातास्सवर्णाम्बष्टोग्र निषाददौष्यन्तपारशवाः । प्रतिलोमास्तु सूतमागधायोगवक्षत्तृवैदेहकचण्डाला' इति । एवकारो दुहितृनिवृत्यर्थः । तथा च वसिष्ठः —
6 'पतितेनोत्पादितः पतितो भवत्यन्यत्र स्त्रियास्सा हि परगामिनी तामरिक्थामुपेयादिति । [^2३] स्त्रीरत्नं दुकुलादपी'ति मनुः ॥ ४ ॥

#### 05 उत्पादयितुः पुत्र इति

उत्पादयितुः पुत्र इति हि ब्राह्मणम् ५

▼

## ⑤

>

▼ Bühler

6. A Brāhmaṇa (says), 'The son belongs to the begetter.' 7

▼ हरदत्त-टीका

## सूत्रम्⑥

उत्पादयितुः पुत्र इति हि ब्राह्मणम् ॥ ५॥

## प्रस्तावः⑥

पुत्रेभ्यो दायभागं वक्ष्यन् अन्यस्य भार्यायामन्येनोत्पादितः किमुत्पादयितुः ? अहोस्वित् क्षेत्रिण इति विचारे निर्णयमाह —

## टिप्पनी⑥

न केवलं ब्राह्मणमेव । वैदिकगाथा अप्यत्रोदाहरन्तीत्याह—

#### 06 अथाप्युदाहरन्ति इदानीमेवाहञ् जनक

अथाप्युदाहरन्ति ।
इदानीमेवाहं जनक स्त्रीणामीर्ष्यामि नो पुरा ।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन् ६-१

रेतोधाः पुत्रं नयति परेत्य यमसादने ।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः ६-२

अप्रमत्ता रक्षथ तन्तुमेतं
मा वः क्षेत्रे परबीजानि वाप्सुः ।
जनयितुः पुत्रो भवति सांपराये
मोघं वेत्ता कुरुते तन्तुमेतम् ६ इति।

▼

### ⑤

>
▼ Bühler

7. Now they quote also (the following Gāthā from the Veda): '(Having considered myself) formerly a father, I shall not now allow (any longer) my wives (to be approached by other men), since they have declared that a son belongs to the begetter in the world of Yama. The giver of the seed carries off the son after death in Yama's world; therefore they guard 8 their wives, fearing the seed of strangers. Carefully watch over (the procreation of) your children, lest stranger seed be sown on your soil. In the next world the son belongs to the begetter, an (imprudent) husband makes the (begetting of) children vain (for himself).'

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाप्युदाहरन्ति —
इदानीमेवाहं 9जनकः स्त्रीणामीर्ष्यामि नो पुरा।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन् ।
रेतोधाः पुत्रं नयति परेत्य यमसादने ।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः ।
अप्रमत्ता रक्षथ तन्तुमेतं
मा वः क्षेत्रे परबीजानि वाप्सुः ।
जनयितुः पुत्रो भवति साम्पराये
मोघं वेत्ता कुरुते तन्तुमेतमिति ॥ ६ ॥

## टिप्पनी⑥

जनयितुः पुत्रः क्षत्रिणो वेति विवादे पराजितस्य क्षेत्रिणो वचनम् एतावन्तं कालमहं जनको मन्यमानः इदानीमेव स्त्रीणामीर्ष्यामि परपुरुषसंसर्गं न सहे । कदा इदानीम् ? यदा यमस्य सादने पितृलोके जनयितुः पुत्रो भवति पुत्रकृत्यं परलोकगतस्य जनयितुरेव न क्षेत्रिण इत्यब्रुवन् धर्मज्ञाः । उक्त एवार्थः किञ्चिद्विशेषेणोच्यते-रेतोधा बीजप्रदः पुत्रं नयति पुत्रदत्तं पिण्डादिकमात्मानं नयति प्रापयति । परेत्य मृत्वा । यमसादने यमलोके ।

तस्मात्कारणात् भार्यां रक्षन्ति पररेतसो बिभ्यन्तः । बिभ्यतः छान्दसो नुम् । अतो यूयमप्यप्रमत्ता अवहिता भूत्वा एतं तन्तुं प्रजासन्तानं रक्षथ । लोडर्थे लट् । रक्षतेत्यर्थः । किमर्थम् ? वः युष्माकम् क्षेत्रे परबीजानि पररेतांति मा वाप्सुः । व्यत्ययेनाऽयं कर्मणि कर्तृप्रत्ययः। मा वाप्सत उप्तानि मा भूवन् । मोप्येरन् ।

कथमिति ? (अपर आह-परशब्दाज्जसो लुक् । परे पुरुषाः वः क्षेत्रे बीजानि मा वाप्सुरिति ।) यस्मात् साम्पराये परलोके जनयितुरेव पुत्रफलं भवति वेत्ता 10परिणेता क्षेत्री तु एतं तन्तुं मोघं निष्प्रयोजनं कुरुते आत्मसात्करोति। इतिशब्दो गाथासमाप्तौ । एतच्च क्षेत्रिणोऽनुज्ञातमन्तरेण पुत्रोत्पादनविषयम् । यदा तु क्षेत्री वन्ध्यो रुग्णो वा प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयति, यदा वा सन्तानक्षये विधवां नियुञ्जते यथा विचित्रवीर्यस्य क्षेत्रे सत्यवतीं व्यासेन । तदुत्पन्नः पुत्र उभयोरपि पुत्रो भवति— बीजिनः क्षेत्रिणश्च । द्व्यामुष्यायणश्च स भवति । तथाचाचार्य एवाह —
11 'यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षये'दिति । याज्ञवल्क्योऽप्याह—
12 'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थो पिण्डदाता च धर्मतः ॥ इति ।
नारदोऽपि—
13द्व्यामुष्यायणको दद्याद्वाभ्यां पिण्डोदके पृथक् ।
रिक्थादर्धं समादद्याद्बीजक्षेत्रवतोस्तथा ॥' इति ॥६॥

- () एतत्कुण्डान्तर्गतोभागः ख च पुस्तकयोरेवास्ति । तत्र 'कथमिति' इति नास्ति ।

#### 07 दृष्टो धर्मव्यतिक्रमस् साहसम्

दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम् ७

▼

## ⑤

>
▼ Bühler

8. Transgression of the law and violence are found amongst the ancient (sages).

▼ हरदत्त-टीका

## सूत्रम्⑥

दृष्टो धर्मव्यतिक्रमस् साहसं च पूर्वेषाम् ॥ ७ ॥

## प्रस्तावः⑥

यदि पूर्ववत्यादिषु मैथुने दोषः कथं तर्हि 14 उचथ्यभारद्वाजौ व्यत्यस्य भार्ये जग्मतुः15 वसिष्ठश्चण्डालीमक्षमालाम् । 16प्रजापतिश्च स्वां दुहितरम् । तत्राऽऽह—

## टिप्पनी⑥

सत्यं दृष्टोऽयमाचारः पूर्वेषाम् । स तु धर्मव्यतिक्रमः, न धर्मः, गृह्यमाणकारणत्वात् । न चैतावदेव, साहसं च पूर्वेषां दृष्टम् । यथा17 जामदग्न्येन रामेण पितृवचनादविचोरण मातुश्शिरश्छिन्नम् ॥७॥

#### 08 तेषान् तेजोविशेषेण प्रत्यवायो

तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ८

▼

### ⑤

>
▼ Bühler

9. They committed no sin on account of the greatness of their lustre.

▼ हरदत्त-टीका

## सूत्रम्⑥

18तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ॥ ८॥

## प्रस्तावः⑥

किमिदानी तेषामपि दोषः ? नेत्याह—

## टिप्पनी⑥

तादृश हि तेषां तेजः यदेवंविधैरपि पाप्मभिर्न प्रत्यवयन्ति । 19 'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हाऽस्य पाप्मानः प्रदूयन्ते इति 20श्रुतेः ॥ ८॥

#### 09 तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः

तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः ९

▼

### ⑤

>
▼ Bühler

10. A man of later times who seeing their (deeds) follows them, falls.

▼ हरदत्त-टीका

## सूत्रम्⑥

तदन्वीक्ष्य प्रयुञ्जानस्सीदत्यवरः ॥ ९॥

**प्रस्तावः⑥**

न चैतावता ऽर्वाचीनानामपि तथा प्रसङ्ग इत्याह—

## टिप्पनी⑥

तदिति21 'नपुंसकमनपुंसकेने'त्येकशेष एकवद्भावश्च । तं व्यतिक्रमं तच्च साहसमन्वीक्ष्य दृष्ट्वा स्वयमपि तथा प्रयुञ्जानोऽवर इदानीन्तनः सीदति प्रत्यवैति । न ह्यग्निः सर्वं दहतीत्यस्माकमपि तथा शक्तिरिति ॥९॥

#### 10 दानङ् क्रयधर्मश्चापत्यस्य न

दानं क्रयधर्मश्चापत्यस्य न विद्यते १०

▼

## ⑤

>
▼ Bühler

11. The gift (or acceptance of a child) and the right to sell (or buy) a child are not recognised. 22

▼ हरदत्त-टीका

## सूत्रम्⑥

दानं क्रयधर्मश्चाऽपत्यस्य न विद्यते ॥ १० ॥

## प्रस्तावः⑥

पुत्रप्रसङ्गेनाऽऽह—

## टिप्पनी⑥

दानग्रहणेन विक्रयोऽपि गृह्यते, त्यागसामान्यात् । क्रयधर्म इति च प्रतिग्रहस्याऽपि ग्रहणम् । धर्मग्रहणात् स्वीकारसामान्याच्च । अपत्यस्य दानप्रतिग्रहक्रयविक्रया न कर्तव्याः । द्वादशविधेषु पुत्रेषु दत्तक्रीतयोरपि पुत्रयोर्मन्वादिभिः पठितवान्नाऽयं समान्येन प्रतिषेधः । किं तर्हि ? ज्येष्ठपुत्रविषयः, एकपुत्रविषयः, स्त्रीविषयो वा । तथा च वसिष्ठः —
23न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा । न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषाम् । न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्राऽनुशानाद्भर्तुः । पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञे निवेद्य निवेशनस्य मध्ये अग्निमुपसमाधाय सम्परिस्तीर्य व्याहृतीभिर्हुत्वाऽदूर बान्धवं सन्निकृष्टमेव प्रतिगृह्णीया'दिति । विश्वजिति च सर्वस्वदाने गवादिवदपत्यं न देयमिति । विक्रयस्तु सर्वत्र निषिद्धः । तत्र उपपात

केषु याज्ञवल्क्य आह —
24 'नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः ।' इति ।
बह्वृचब्राह्मणेऽपि शुनश्शेपाख्याने दृश्यते-25 स ज्येष्ठपुत्रं निगृह्णान उवाचे'त्यादि । पुत्रप्रकरणे अपत्यशब्दोपादानमपि ज्येष्ठपुत्रविषयत्वस्य लिङ्गम् ।

न पतन्त्यनेनेत्यपत्यमिति ।
26ऋणमस्मिन् सन्नयत्यनृतत्वं च गच्छति ।
पिता पुत्रस्य जातत्य पश्येच्चेज्जीवतो मुखम् ॥” इति ॥१०॥

#### 12 विवाहे दुहितृमते दानङ्

विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽधिरथं शतं देयं तन्मिथुया कुर्यादिति ११-१

तस्यां क्रयशब्दः संस्तुतिमात्रम् । धर्माद्धि संबन्धः ११-२

▼

### ⑤

>
▼ Bühler

12. It is declared in the Veda that at the time of marriage a gift, for (the fulfilment of) his wishes, should be made (by the bridegroom) to the father 27 of the bride, in order to fulfil the law. 'Therefore he should give a hundred (cows) besides a chariot; that (gift) he should make bootless (by returning it to the giver).' In reference to those (marriage-rites), the word 'sale' (which occurs in some Smṛtis is only used as) a metaphorical expression; for the union (of the husband and wife) is effected through the law.

▼ हरदत्त-टीका

## सूत्रम्⑥

विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽतिरथं शतं देयं तन्मिथुयाकुर्यादिति तस्यां क्रयशब्दस्संस्तुतिमात्रं धर्माद्धि सम्बन्धः ॥१२॥

## टिप्पनी⑥

आर्षे विवाहे दुहितृमते दानं क्वचिद्वेदे श्रूयते । तस्माद्दुहितृमते रथेनाधिकं गवां शत देयम् । तच्च दुहितृमान् मिथुया कुर्यात् । मिथ्या कुर्यात् । 28मा देवानां मिथुयाऽकर्भागधेय"मिति दृश्यते । मिथुया कुर्यादिति कोऽर्थः वरायैव पुनर्दद्यादिति । तद्दानं काम्यं कामनिमित्तम् । 'यथा युक्तो विवाहस्तथायुक्ता प्रजा भवतीति (२.१०.४) ऋषितुल्याः पुत्राः यथा स्युरिति ततश्च धमार्थं न प्रजार्थम्, विक्रयार्थम् । यस्तु तस्यां विवाहक्रियायां क्रयशब्दः क्वचित् स्मृतौ दृश्यते, स संस्तुतिमात्रम् द्रव्यप्रसादसाम्यातू । न मुख्यक्रयत्वप्रतिपादनार्थम् । कुतः ? हि यस्मात् धर्मादेव हेतोः सम्बन्धो दम्पत्योरिति । आर्षे दुहितृमते मिथुनौ गावौ देयावित्यत्राप्येष एव न्यायः ।
अत्र मनुः — 29 यासां नाऽऽददत्ते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ॥' इति ।
एतच्च सर्वं 'दानं क्रयधर्मश्चाऽपत्यस्य न विद्यत' इत्यस्य व्यभिचारनिवृत्यर्थं कर्तव्यमित्युक्तम् ॥ ११॥

#### 12 एकधनेन ज्येष्ठं तोषयित्वा

एकधनेन ज्येष्ठं तोषयित्वा १२

▼

### ⑤

>

▼ Bühler

13. After having gladdened the eldest son by some (choice portion of his) wealth,

▼ हरदत्त-टीका

## सूत्रम्⑥

एकधनेन ज्येष्ठं तोषयित्वा ॥ १२ ॥

## प्रस्तावः⑥

अथ दायविभागः —

## टिप्पनी⑥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्न त्रयोदशी कण्डिका ॥ १३ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
 ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. आप० ध० १. ३१. १.↩
6. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩
7. Manu II, 35.↩
8. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
9. आप० ध० १.३०.८.↩
10. आप० ध० १. ३१. १.↩
11. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩
12. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

    > विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
    > तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

    इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

13. आप० ध० १ ३१. ६.↩

14. मनु० स्मृ० २.६↩

15. गौ० ध० १. १, २↩

16. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

17. आप० ध० १ १२.१०.↩

18. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

21. आप० ध० १.३०.८.↩

22. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

23. मनु० स्मृ० २.६↩

24. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

25. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

26. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

27. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

28. आप० ध० १.३०.८.↩

29. मनु० स्मृ० २.६↩

# १४①

## 01 जीवन्पुत्रेभ्यो दायं विभजेत्समङ्④

जीवन्पुत्रेभ्यो दायं विभजेत्समं क्लीबमुन्मत्तं पतितं च परिहाप्य १

▼

## ⑤

>
▼ Bühler

1. He should, during his lifetime, divide his wealth equally amongst his sons, excepting the eunuch, the mad man, and the outcast. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

जीवन् पुत्रेभ्यो दायं विभजेत् समं क्लीबमुन्मत्तं पतितं च परिहाय ॥१॥

## प्रस्तावः⑥

अथ दायविभागः —

## टिप्पनी⑥

एकेन प्रधानेन केनचिद्धनेन गवादिना ज्येष्ठं पुत्रं तोषयित्वा तृप्तं कृत्वा जीवन्नेव पुत्रेभ्यो दायं विभजेत् । सममात्मना परस्परं च तेषाम् । सामान्याभिधानात् क्रमागतं स्वयमार्जिनं च क्लीबादीन् वर्जयित्वा । क्लीबादिग्रहणं जात्यन्धादीनामप्युपलक्षणम् । यथाह मनुः —
2 'अनंशी क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिनिरिन्द्रियाः ॥ इति ।
अन्धादीनां पुत्रसद्भावे तेऽप्यंशहराः। एवमुन्मत्तपतितौ3 निवृत्ते निमित्ते क्लीबादयस्तु न भर्तव्याः । अत्र विभागकालः स्मृत्यन्तरवशाद्ग्राह्यः । तत्र नारदः —
4 मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ।
निवृत्ते चापि मरणात्पितर्युपरतस्पृहे ॥' इति ।
यदा पुत्राणां पृथक्पृथक् धर्मानुष्ठाने शक्तिश्रद्धे भवतः सोऽपि कालः । 'तस्माद्धर्म्या पृथविक्रये'ति5 दर्शनादिति । 'जीवन्निनितिवचनं जीवन्नेवाऽवश्यं पुत्रान् विभजेत् एष धर्म इति प्रतिपादनाय । अन्यथा तदनर्थकम् । अजीवतोऽप्रसङ्गात् । स्मृत्यन्तरेषु स्वयमार्जित पितुरिच्छया विषमविभागो दर्शितः । न स धर्म्य इत्याचार्यस्य पक्षः । भार्याया अप्यंशो न दर्शितः । आत्मनः एवांशस्तस्या अपीति मन्यते । वक्ष्यति च 'जायापत्योर्न विभागो विद्यते' (२. १४.१६ ) इति ।
कोचित्तु पितुर्द्वावंशावित्याहुः । 'द्वावंशौ प्रतिपद्येत विभजनात्मनः पिते'ति दर्शनात् । अयमप्याचार्यस्य पक्षो न भवति । यथा पुत्राणामेकैक एवांशस्सभार्याणां तथा पितुरपीति । यद्वा पुत्राणामेवांशसाम्यं आत्मनस्त्वाधिक्येऽपि न दोषः। तत्र हारीतः —
'पिता ह्याग्रयणः पुत्रा इतरे ग्रहाः यद्याग्रयणः स्कन्देदुपदस्येद्वा इतरेभ्यो गृह्णीयादिति विभागादूर्ध्वं पित्रोर्जीवनाभावे पुत्रभागेभ्यो ग्राह्यमित्युक्तं भवति । इति जीवद्विभागः ॥१॥

#### 02 पुत्राभावे यः प्रत्यासन्नः

पुत्राभावे यः प्रत्यासन्नः सपिण्डः २

▼

## ⑤

>
▼ Bühler

2. On failure of sons the nearest Sapiṇḍa (takes the inheritance). 6

▼ हरदत्त-टीका

## सूत्रम्⑥

पुत्राभावे यः प्रत्यासन्नः सपिण्डः ॥२॥

## प्रस्तावः⑥

अथ मृते कुटुम्बिनि तद्धनस्य गतिमाह—

## टिप्पनी⑥

'पुत्राभावे' इति वचनात् सत्सु पुत्रेषु त एव गृह्णीयुरविशेषात्समम् । तत्र नारदीये विशेषः —
7 यच्छिष्टं प्रीतिदायेभ्यो दत्वार्णं पैतृकं च यत् ।
भ्रातृभिस्तद्विभक्तव्यमृणी स्यादन्यथा पिता ॥ इति ॥

कात्यायनस्तु—
8भ्रात्रा पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम् ।
विभागकाले देयं तद्रिक्थिभिस्सर्वमेव तु ॥ इति ।

अत्र याज्ञवल्क्यः —
9 'पितुरुर्ध्वं विभजतां माताऽप्यंशं समं हरे'दिति ।
तदत्र नोक्तं पुत्रैरेव सह वृत्तिरस्या इति ।

तथा च मनुः —
10 पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥ इति ।
एवं मातुरप्यभावे तद्धनं भर्तृकुललब्धं स्वयमार्जितं च तत्पुत्रा अप्रत्ताश्च दुहितरस्समं गृह्णीयुः ।
11स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी ।
अप्रत्ता चेत्समूढा तु लभते 12मानमात्रकम् ॥ इति बृहस्पतिः । पितृकुललब्धं चाऽप्रत्ता एव दुहितरः ।

13"मातुस्तु यौतकं यत्स्यात् कुमारीभाग एव सः ।" इति मनुः।

अथाऽप्रत्ता दुहितरः पुत्राश्च जननी तदा ।
14जनन्या संस्थितायां तु समं सर्वे सहोदराः ॥

भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः । इति मानवमेव ।

अत्र व्यासः —
15 असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात् ।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि ॥' इति ।
अत्र क्रमविवाहे बृहस्पतिः —
16 ब्रह्मक्षत्रियविट्छूद्रा विप्रोत्पन्नास्त्वनुक्रमात् ।
चतुस्त्रिद्व्येकभागेन भजेयुस्ते यथाक्रमम् ॥
क्षत्रजास्त्रिद्व्येकभागा विड्जौ तु द्व्येकभागिनौ ।' इति ।
मानवे च स्पष्टमुक्तम् —
17 सर्वं वा रिक्थजातं तद्दशधा प्रविभज्य तु ।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित ॥
चतुरोऽशान् हरेद्विप्रः त्रीनंशान् क्षत्रियासुतः ।
वैश्यापुत्रो हरेद्व्यंशमशं शूद्रासुतो हरेत् ॥ इति ।
यस्य तु ब्राह्मणी वन्ध्या मृता वा तत्र क्षत्रियादिसुतास्त्रिद्व्येकभागाः । यस्य त्वेकस्यामेव पुत्रस्सा सर्वं हरेत् शूद्रापुत्रवर्जम् ।

यथाह देवलः —
18आनुलोम्येकपुत्रस्तु पितुस्सर्वस्वभाग्भवेत् ।
निषाद एकपुत्रस्तु विप्रत्वस्य तृतीयभाक् ॥
द्वौ सपिण्डस्सकुल्यो वा स्वधादाता तु तं हरेत्' इति ।
निषादः पारशवः । क्षेत्रविषये बृहस्पतिः —
19न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै ।
यद्यप्यस्य पिता दद्यान्मृते विप्रासुतो हरेत् ॥
शुद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति ।
सजातावाप्नुयात्सर्वमिति धर्मो व्यवस्थितः ॥ इति ॥

याज्ञवल्क्य —
20जातो हि दास्यां शूद्रेण कामतोऽशहरो भवेत् ।
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिनम् ॥' इति ।

भार्याविषये विष्णुः —
21मातरः पुत्रभागानुसारतो भागहारिण्य' इति । अत्र, औरसः पुत्रिकाबीजक्षेत्रजौ पुत्रिकासुतः ।

पुनर्भवश्च कानीनस्सहोढो गूढसम्भवः ।
दत्तः क्रीतस्स्वयंदत्तः कृत्रिमश्चाऽपविद्धकः ।
यत्र क्वचोत्पादितश्च पुत्राख्या दश पञ्च च ।
अनेनैव क्रमेणैषां पूर्वाभावे परः परः ।
पिण्डदोंऽशहरश्चेति प्रायेण स्मृतिषु स्थिताः ।
औरसो धर्मपत्नीजः । 'सवर्णापूर्वशास्त्रविहिताया'मिति पूर्वमुक्तः । गौतमः22-"पितोत्सृजेत्पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वास्मदर्थमपत्यमति संवाद्ये'ति ।

बृहस्पतिः—
'एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः ।
तत्तुल्या पुत्रिका प्रोक्ता भर्तव्यास्त्वपरे स्मृताः॥' इति ।
मनुः —
23पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते ।
समस्तत्र विभागः स्यात् ज्येष्ठाता नास्ति हि स्त्रियाः ॥ इति ।

याज्ञवल्क्यः —
24अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥ इति ।
अयमेक एवोत्पादयितुर्बीजजः, क्षेत्रजस्तु क्षेत्रिणः ।

बृहस्पतिः —
'पुत्रोऽथ पुत्रिकापुत्रस्स्वर्गप्राप्तिकरावुभौ ।
रिक्थे पिण्डाम्बुदाने च समौ सम्परिकीर्तितौ ॥ इति ।

काश्यपः —
'सप्त पौनर्भवाः कन्याः वर्जनीयाः कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकं स्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रसवा च या'॥

कात्यायनः—
क्लीबं विहाय पतितं या पुनर्लभते पतिम् ।
तस्यां पौनर्भवो जातः व्यक्तमुत्पादकस्य सः ॥ इति ।

मनुः —
25पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेनाम्ना वोढुः कन्यासमुद्भवः ॥ इति ।

नारदः —
26कानीनश्च सहोढश्च गूढायां यश्च जायते ।
तेषां वोढा पिता ज्ञेयस्ते च भागहराः पितुः।' इति ॥

वसिष्ठः—
27'अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥' इति ।
अनूढायामेव मृतायां मातरि मातामहस्य पुत्रः । अन्यथा वोढुः । मनुः —
28 'या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।
वोढुस्स गर्भो भवति सहोढ इति चोच्यते ।
29उत्पद्यते गृहे यस्य न च ज्ञायेत कस्यचित् ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥
दत्तः पूर्वमेवोक्तः । पैठीनसिः—'अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण द्व्यार्ष्येण जाताः ते असंगतकुलीनाद्व्यामुष्यायणा भवन्तीति ।

मनुः —
30भ्रातृणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरवीत् ॥
31क्रीणीयाद्यस्त्वपत्यार्थे मातापित्रोर्यमन्तिकात् ।
स क्रीतकस्सुतस्तस्य सदृशोऽसदृशोऽपि वा ।
32मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्य स्वयं दत्तस्तु स स्मृतः ॥ इति ।
33सदृशं तु प्रकुर्यातां गुणदोषविवर्जितम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥
34मातापितृभ्यामुत्सृष्ट तयोरन्यतरेण वा ।
यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यते ॥ इति ।
सर्व एते समानजातीयाः,
35सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ॥ इति याज्ञवल्क्यवचनात् ।

विष्णुः—
'यत्र क्वचनोत्पादितस्तु द्वादशः, इति ।
याज्ञवल्क्यः —
36 'पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ।' इति 37

मनुः—
श्रेयसः श्रेयसोऽभावे पापीयान् रिक्थमर्हति ।' इति ।
'क्रमादेते प्रवर्तन्ते मृते पितरि तद्धने ।
नारदः—
38'ज्यायसो ज्यायसोऽभावे जघन्यस्तदवाप्नुयात् ॥' इति ।

देवलः —
'सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्येष्ठ्यं न तिष्ठति ॥

तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
शेषास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ॥' इति ।

मनुः —
39 षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ।
औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ॥ इति ।

बृहस्पतिः —
"क्षेत्रजाद्यास्सुतास्त्वन्ये पञ्चषट्सप्तभागिन;' इति ।

हारीतः—
'विभाजिष्यमाण एकविंशं कानीनाय दद्याद्विंशं पौनर्भवायैकोनविंशं द्व्यामुष्यायणायाऽष्टादशं क्षेत्रजाय सप्तदशं पुत्रिकापुत्रायेतरानौरसाये'ति ।

वसिष्ठः—
40 'पुत्रं प्रतिग्रहीष्य'न्निति प्रक्रम्य 'तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्यते चतुर्थभागभागि'ति ॥

एवमेतेषु शास्त्रेषु विद्यमानेषु यदाचार्येण पूर्वमुक्तं 'तेषां कर्मभिस्सम्बन्धो दायेनाऽव्यतिक्रमश्चोभयो'रिति तद्धर्मपत्नीजे पुत्रे सति क्षेत्रप्रजादीनां समांशहरत्वप्रतिषेधपरं वेदितव्यम् ।

अथाविभाज्यम् ।
अत्र मनुः —
41 अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत् ।
स्वयमर्हति लब्धं तन्नाऽकामो दातुमर्हतीति ।

कात्यायनः —
'नाऽविद्यानां तु वैद्येन देय विद्याधनात् क्वचित् ।
समं विद्याधनानां तु देयं वैद्येन तद्धनम् ॥
परभक्तप्रदानेन प्राप्तविद्यो यदाऽन्यतः।
तया प्राप्ते तु विधिना विद्याप्राप्तं तदुच्यते ॥ इति ।

व्यासः —
पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।
तस्य तन्नाऽपहर्तव्यं42 शौर्यहार्यं तथैव च ॥ इति ।

याज्ञवल्क्यः —
43"क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत् यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥
पत्यौ जीवति यस्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥'

व्यासः —
'साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥"
इति पुत्रदायविभागः । तदभावे तु मृतस्य यः प्रत्यासन्नः सपिण्डः, स किम्? 'दायं हरेते'ति ( १४. ५.) वक्ष्यमाणेन सम्बन्धः ।

44 लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
सप्तमः पिण्डदातैषा सापिण्ड्यं साप्तपूरुषम् ॥
इति सपिण्डलक्षणम् । तेषु यो यः प्रत्यासन्नस्स स गृह्णीयादिति । भार्यां तु रिक्थग्राहिणस्सपिण्डाद्या रक्षेयुः, न तु दायग्रहणमित्याचार्यस्य पक्षः ।
श्रूयते हि-45'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति । मनुरपि —
46'अनिन्द्रिया अदायादाः स्त्रियो नित्यमिति श्रुति'रिति ।
अत्र सपिण्डाद्यभावे बृहस्पतिः—
'अन्यत्र ब्राह्मणात्किं तु राजा धर्मपरायणः ।

तत्स्त्रीणां जीवनं दद्यादेष दायविधिस्स्मृतः ॥
अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम् ।
वसनं त्रिपणक्रीतं देवमेकं त्रिमासतः ॥
एतावदेव साध्वीनां चोदितं विधवाधनम् ।

वसनस्याऽशनस्यैव तथैव रजकस्य च ॥
धनं व्यपोह्य तच्छिष्टं दायादानां प्रकल्पयेत् ।
47धूमावसानिकं ग्राह्यं समायां स्नानतः पुरा ।
वसनाशनवासांसि विगणय्य धवे मृते ॥ इति ।

व्यासः—
'द्विषाहस्रः परो दायः स्त्रियै देयो धनस्य तु ।
यच्च भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात् ॥' इति ।
पणानां द्वे सहस्रे परिमाणमस्य द्विषाहस्रः । एष परो दायः स्त्रिया नाधिक इति । एतत् प्रभूते धने, ज्ञातयश्च न रक्षेयुरिति शङ्कायाम् । एवं 48 'पत्नी दुहितरश्चे'त्यादीनि यानि पत्न्या दायप्राप्तिपराणि तान्येवमेव द्रष्टव्यानि । गौतमस्तु पुत्राभावे पत्न्यास्सपिण्डादिभिस्समांशमाह—49 'पिण्डगोत्रर्षिसम्बन्धा रिक्थं भजेरन् । स्त्री चाऽनपत्यस्ये'ति। अस्यार्थः-अनपत्यस्य रिक्थं पिण्डसम्बन्धात्सपिण्डाः प्रत्यासतिक्रमेण भजेरन् । तदभावे गोत्रसम्बन्धास्सगोत्राः । तदभावे ऋषिसम्बन्धास्समानप्रवराः स्त्री च पत्नी च । ( अत्र स्त्रियाः पृथङ्निर्देशात् च शब्दाच्च यदा सपिण्डा भजेरन् तदा स्त्री सह तैरेकमंशं गृह्णीयात् । ततश्च 'पितुरूर्ध्वं विभजतां माताप्यंशं समं हरे"दिति सपिण्डादिभिस्सहग्रहणमुक्तमिति । वयमप्येतमेव पक्षं रोचयामहे )। अत्र पितरि भ्रातरि सोदर्ये च जीवति सोदर्यो भ्राता गृह्णीयादित्येके मन्यन्ते ।
तथा च शङ्ख—
'अपुत्रस्य स्वर्यातस्य द्रव्यं भ्रातृगामि, तदभावे मातापितरौ लभेयातां, पत्नी वा ज्येष्ठे'ति । देवलः—
'ततो दायमपुत्रस्य विभजरेन् सहोदराः।
कुल्या दुहितरो वापि ध्रियमाणः पिताऽपि च ॥
सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम् ॥ इति ।

- ( ) कुण्डलान्तर्गतो भागः च पुस्तकेऽधिकपाठतया परिगणितः ।

याज्ञवल्क्यः —
50संसृष्टिनस्तु ससृष्टी सोदर्यस्य तु सोदरः।
दद्याच्चाऽपहरेच्चांश जातस्य च मृतस्य च ॥
अन्योदर्यस्तु संसृष्टी नाऽन्योदर्यधनं हरेत् ।
असंसृष्ट्यापि चाऽऽदद्यात्सोदर्यो नान्यमातृजः ॥ इति ।

अत्र सोदर्य इति विशेषवचनात् 'पत्नी दुहितरश्चे'त्यत्र भ्रातृग्रहणं भिन्नोदरविषयमिति । प्रत्यासत्त्यतिशयात51 पितैवेत्याचार्यस्य पक्षः। तदभावे सोदर्यः, तदभावे तत्पुत्रः, तदभावे भिन्नोदराः, तदभावे पितृव्य इत्यादि द्रष्टव्यम् । मात्रादयोऽपि स्त्रियो जीवनमात्रं लभेरन्निति ॥२॥

#### 03 तदभाव आचार्य आचार्याभावेऽन्तेवासी

तदभाव आचार्य आचार्याभावेऽन्तेवासी हृत्वा तदर्थेषु धर्मकृत्येषु वोपयोजयेत् ३

▼

### ⑤

>
▼ Bühler

3. On failure of them the spiritual teacher (inherits); on failure of the spiritual teacher a pupil shall take (the deceased's wealth), and use it for religious works for the (deceased's) benefit, or (he himself may enjoy it);

▼ हरदत्त-टीका

## सूत्रम्⑥

तदभाव आचार्य आचार्याभावेऽन्तेवासी हृत्वा तदर्थेषु धर्मकृत्येषु वोपयोजयेत् ॥ ३ ॥

## टिप्पनी⑥

सपिण्डाभावे आचार्यो दायं हरेत् । तस्याऽप्यभावे अन्तेवासी हरेत् । हृत्वा तदर्थेषु धर्मकृत्येषु तडागखननादिषूपयोजयेत् । वाशब्दात् स्वयं वा उपयुञ्जीत ॥३॥

#### 04 दुहिता वा

दुहिता वा ४

▼

## ⑤

>
▼ Bühler

> 4. Or the daughter (may take the inheritance). 52

▼ हरदत्त-टीका

## सूत्रम्⑥

दुहिता वा ॥ ४ ॥

## टिप्पनी⑥

दुहिता वा दायं हरेत् । पुत्राभाव इत्येके । अनन्तरोक्ते विषय इत्यन्ये ॥४॥

#### 05 सर्वाभावे राजा दायं

सर्वाभावे राजा दायं हरेत ५

▼

## ⑤

>
▼ Bühler

> 5. On failure of all (relations) let the king take the inheritance. 53

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वाभावे राजा दायं हरेत् ॥ ५ ॥

## टिप्पनी⑥

सर्वग्रहणात् बन्धूनां सगोत्राणां चाऽप्यभावे ॥५॥

#### 06 ज्येष्ठो दायाद इत्येके

ज्येष्ठो दायाद इत्येके ६

▼

## ⑤

>
▼ Bühler

6. Some declare, that the eldest son alone inherits. 54

▼ हरदत्त-टीका

## सूत्रम्⑥

ज्येष्ठो दायाद इत्येके ॥ ६ ॥

## टिप्पनी⑥

एके मन्यन्ते ज्येष्ठ एव पुत्रो दायहरः । इतरे तु तमुपजीवेयुः । सोऽपि तान् पितेव परिपालयेदिति । तथा च गौतमः 55 'सर्वं वा पूर्वजस्येतरान् बिभृयात्पितृवदिति ॥ ६ ॥

#### 07 देशविशेषे सुवर्णम्कृष्णा गावः

देशविशेषे सुवर्णङ्कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य ७

▼

## ⑤

>
▼ Bühler

7. In some countries gold, (or) black cattle, (or) black produce of the earth is the share of the eldest. 56

▼ हरदत्त-टीका

## सूत्रम्⑥

देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य ॥७॥

## टिप्पनी⑥

क्वचिद्देशे सुवर्णादि ज्येष्ठस्य भाग इत्याहुः । भूमौ जातं भौमं धान्यं कृष्णं माषादि कृष्णायसमित्यन्ये ॥ ७॥

#### 08 रथः पितुः परीभाण्डञ्

रथः पितुः परीभाण्डं च गृहे ८

▼

## ⑤

>
▼ Bühler

8. The chariot and the furniture in the house are the father's (share). 57

▼ हरदत्त-टीका

## सूत्रम्⑥

रथः पितुः परिभाण्डं च गृहे ॥ ८॥

## टिप्पनी⑥

रथः पितुरंशः 58 गृहे च यत् परिभाण्डमुपकरणं पीठादि तदपि ॥ ८॥

#### 09 अलङ्कारो भार्याया ज्ञातिधनञ्

अलंकारो भार्याया ज्ञातिधनं चेत्येके ९

▼

## ⑤

>
▼ Bühler

9. According to some, the share of the wife consists of her ornaments, and the wealth (which she may have received) from her relations. 59

▼ हरदत्त-टीका

## सूत्रम्⑥

अलङ्कारो भार्यायाः ज्ञातिधनं चेत्येके ॥ ९ ॥

## टिप्पनी⑥

भार्यायास्तु धृतोऽलङ्कारोऽशः, ज्ञातिभ्यः पित्रादिभ्यश्च यल्लब्धं धनं तच्चेत्येवमेके मन्यते ॥९॥*

- ◦ एतचिह्नानन्तरं यतोऽपि नानुवादः। ॥ ११॥ स्पष्टम् ॥ इत्यधिकपाठो दृश्यते छ. पुस्तके।

#### 10 तच्छास्त्रैर्विप्रतिषिद्धम्

तच्छास्त्रैर्विप्रतिषिद्धम् १०

▼

## ⑤

>
▼ Bühler

10. That (preference of the eldest son) is forbidden by the Śāstras. 60

▼ हरदत्त-टीका

## सूत्रम्⑥

तच्छास्त्रैविप्रतिषिद्धम् ॥ १० ॥

## टिप्पनी⑥

ज्येष्ठो दायद इति यदुक्तं तच्छास्त्रैर्विरुद्धम् ॥ १० ॥

#### 11 मनुः पुत्रेभ्यो दायं

मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते ११

▼

## ⑤

>
▼ Bühler

11. For it is declared in the Veda, without (marking) a difference (in the treatment of the sons): Manu divided his wealth amongst his sons. 61

▼ हरदत्त-टीका

## सूत्रम्⑥

62"मनुः पुत्रेभ्यो दायं व्यभज"दित्यविशेषेण श्रूयते ॥११॥

## प्रस्तावः⑥

येन विरुद्धं तदर्शयति—

## टिप्पनी⑥

पुत्रेभ्य इति बहुवचननिर्देशादविशेषेण श्रवणम् ॥११॥

#### 12 अथापि तस्माद्ज्येष्ठम् पुत्रन्

अथापि तस्माद्ज्येष्ठं पुत्रं धनेन निरवसाययन्तीत्येकवच्छ्रुयते १२

▼

## ⑤

>
▼ Bühler

12. Now the Veda declares also in conformity with (the rule in favour of the eldest son) alone: They distinguish the eldest by (a larger share of) the heritage. 63

▼ हरदत्त-टीका

## सूत्रम्⑥

अथापि64 "तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ती" त्येकवच्छ्रूयते ॥ १२ ॥

## प्रस्तावः⑥

अत्र चोद्यम्—

## टिप्पनी⑥

अथापि ननु चेत्यर्थः । ज्येष्ठं पुत्रं धनेन निरवसाययन्ति पृथक्कुर्वन्तीत्येकवदपि श्रूयते । यथा एक एव ज्येष्ठो दायादः तदनुरूपमपि श्रूयते इति ॥ १२॥

#### 13 अथापि नित्यानुवादमविधिमाहुर्न्यायविदो, यथा

*(समाधानम् -)* अथापि नित्यानुवादमविधिमाहुर्न्यायविदो, यथा - "तस्मादजावयः पशूनां सह चरन्तीति" "तस्मात्स्नातकस्य मुखं रेभायतीव" "तस्माद्बस्तश्च श्रोत्रियश्चस्त्रीकामतमाविति" १३

▼

### ⑤

>
▼ Bühler

13. (But to this plea in favour of the eldest I answer): Now those who are acquainted with the interpretation of the law declare a statement of facts not to be a rule, as for instance (the following): 'Therefore amongst cattle, goats and sheep walk together;' (or the following), 'Therefore the face of a learned Brāhmaṇa (a Snātaka) is, as it were, resplendent;' (or), 'A Brāhmaṇa who has studied the Vedas (a Śrotriya) and a he-goat evince the strongest sexual desires.' 65

▼ हरदत्त-टीका

## सूत्रम्⑥

अथापि नित्यानुवादमविधिमाहुर्न्यायविदो यथा तस्मादजावयः पशूनां सहचरन्तीति । तस्मात् स्नातकस्य मुखं रेफायतीव । तस्मात् वस्तश्च श्रोत्रियश्च स्त्रीकामतमाविति ॥ १३ ॥

## प्रस्तावः⑥

परिहरति —

## टिप्पनी⑥

अथापीति परिहारोपक्रमे । पशूनां मध्ये अजाश्चाऽवयवश्च जातिभेदेऽपि सह चरन्ति । रेफा शोभा । इह तु तद्वत्यभेदोपचारः। ततः क्यप् । स्नातकस्य मुखं कुण्डलादिना शोभते । इवशब्दो वाक्यालङ्कारे । श्रोत्रियस्य स्त्रीकामतमत्वमाचार्यकुले चिरकालं ब्रह्मचारिवासात्। यथैतानि वाक्यानि दृष्टान्तमात्रमनुवदन्ति न किञ्चिाद्विदधति तस्मात् 'ज्येष्ठं पुत्र'मित्यादिकमप्यविधिरिति न्यायविद आहुः । न केवलमयमेवानुवादः, किं तर्हि 'मनुः पुत्रेभ्य' इत्ययमप्यनुवाद एव ॥ १३ ॥

#### 14 सर्वे हि धर्मयुक्ता

सर्वे हि धर्मयुक्ता भागिनः १४

▼

### ⑤

>

▼ Bühler

14. Therefore all (sons) who are virtuous inherit.

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वे हि धर्मयुक्ता भागिनः ॥ १४ ॥

## टिप्पनी⑥

हिशब्दो हेतौ। यस्मादेवाऽनुवादौ न कस्यचिद्विधायकौ तस्माद्ये धर्मयुक्ताः पुत्रास्सर्व एते भागिनः ॥ १४ ॥

#### 15 यस्त्वधर्मेण द्रव्याणि प्रतिपादयति

यस्त्वधर्मेण द्रव्याणि प्रतिपादयति *(=व्ययीकरोति)* ज्येष्ठोऽपि तमभागं कुर्वीत १५

▼

## ⑤

>
▼ Bühler

15. But him who expends money unrighteously, he shall disinherit, though he be the eldest son. 66

▼ हरदत्त-टीका

## सूत्रम्⑥

यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभागं कुर्वीत ॥ १५ ॥

## टिप्पनी⑥

यस्तु ज्येष्ठोऽप्यधर्मेण द्रव्याणि प्रतिपादयति विनियुङ्क्ते तमभागं कुर्वीत जीवद्विभागे पिता भागं न दद्यात् । ऊर्ध्वं विभागे67 पितुर्भ्रातरः । अपिशब्दात् किमुतान्यमिति ज्येष्ठस्य प्राधान्यं ख्याप्यते ॥ १५ ॥

#### 16 जायापत्योर् न विभागो

जाया-पत्योर् न विभागो विद्यते १६

▼

## ⑤

>
▼ Bühler

16. No division takes place between husband and wife. 68

▼ हरदत्त-टीका

## सूत्रम्⑥

जायापत्योर्न विभागो विद्यते ॥ १६ ॥

## प्रस्तावः⑥

जीवन् पुत्रेभ्य69इत्यनेन दम्पत्योस्सहभावो दर्शितः । तत्र कारणमाह —

## टिप्पनी⑥

स्पष्टम् ॥ १६॥

#### 17 पाणिग्रहणाद्धि सहत्वङ् कर्मसु

पाणिग्रहणाद्धि सहत्वं कर्मसु १७

▼

## ⑤

>
▼ Bühler

17. For, from the time of marriage, they are united in religious ceremonies,

▼ हरदत्त-टीका

## सूत्रम्⑥

पाणिग्रहणाद्धि सहत्वं कर्मसु ॥ १७॥

## प्रस्तावः⑥

कस्मात् ?

## टिप्पनी⑥

कर्मार्थं द्रव्यम् । जायायाश्च न पृथक्कर्मस्वधिकारः । किं तर्हि ? सहभावेन-'यस्त्वया धर्मश्च कर्तव्यस्सोऽनया सहति वचनात् । तत्र किं पृथक् द्रव्येणेति ॥ १७ ॥

#### 18 तथा पुण्यफलेषु

तथा पुण्यफलेषु १८

▼

## ⑤

>
▼ Bühler

 18. Likewise also as regards the rewards for works by which spiritual merit is acquired,

▼ हरदत्त-टीका

## सूत्रम्⑥

70तथा पुण्यफलेषु ॥ १८ ॥

## टिप्पनी⑥

पुण्यफलेषु स्वर्गादिष्वपि तथा सहत्वमेव । 71'दिवि ज्योतिरजरमारभेता'मित्यादिभ्यो मन्त्रलिङ्गेभ्यः ॥ १८ ॥

#### 19 द्रव्यपरिग्रहेषु च

द्रव्यपरिग्रहेषु च १९

▼

## ⑤

>
▼ Bühler

 19. And with respect to the acquisition of property.

▼ हरदत्त-टीका

## सूत्रम्⑥

द्रव्यपरिग्रहेषु च ॥ १९ ॥

## टिप्पनी⑥

द्रव्यपरिग्रहेषु च द्रव्यार्जनेष्वपि तथा सहत्वमेव । तत्र पतिरार्जयति, जाया गृहे निर्वहतीति योगक्षेमावुभयायत्ताविति द्रव्यपरिग्रहेऽपि सहत्वम् ॥ १९ ॥

#### 20 न हि भर्तुर्विप्रवासे

न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति २०

▼

## ⑤

>
▼ Bühler

20. For they declare that it is not a theft if a wife spends money on occasions (of necessity) during her husband's absence. 72

▼ हरदत्त-टीका

## सूत्रम्⑥

न हि भर्तुर्विप्रवासे नैमित्तिके दान स्तेयमुपदिशन्ति ॥२०॥

## प्रस्तावः⑥

एतदेवोपपादयति—

## टिप्पनी⑥

हि यस्मात् भर्तुर्विप्रवासे सति नैमित्तिके 'छिन्दत्पाणि दद्यादि'त्यादिके दाने कृते भार्यया न स्तेयमुपदिशन्ति धर्मज्ञाः । यदि भर्तुरेव द्रव्यं स्यात् स्यादेव स्तेयम् । नैमित्तिके दानं इति वचनात् व्ययान्तरे स्तेयं भवत्येव । एतदेव द्रव्यसाधारण्येऽपि दम्पत्योर्वैषम्यं— यत् पतिर्यथेष्टं विनियुङ्क्ते जाया त्वेतावदेवेति । न च पत्युस्स्वयमार्जितस्य विनियोगे जायाया अनुमत्यपेक्षा, स्वतन्त्रत्वात् । स्वतन्त्रो ह्यसौ गृहे, यथा राजा राष्ट्रे । अत एव भार्यायास्स्तेयशङ्का, न भर्तुः ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने चतुर्दशी कण्डिका ॥ १४ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. आप० ध० १.३०.८.↩

6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

10. आप० ध० १.३०.८.↩

11. मनु० स्मृ० २.६↩

12. गौ० ध० १. १, २↩

13. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

14. आप० ध० १ १२.१०.↩

15. आप० ध० १. ३१. १.↩

16. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

17. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

    > विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
    > तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

    इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

18. आप० ध० १ ३१. ६.↩

19. इदं च तर्किकादिमतमनुसृत्य प्रभाकरमतञ्च । भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणां चोदनालक्षणानां धर्मत्वाङ्गीकारात् । उक्तं हि भट्टपादैः-

    > श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः ।
    > चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥ इति । श्लो. वा. १२. १९१.

    ↩

20. पक्षेऽप्राप्तांशस्य पूरणकरणादित्यर्थः ।↩

21. तत्तन्निषेध्यक्रियाप्रागभावपरिपालनादिति यावत् ।↩

22. या०स्मृ० १.५२,५३.↩

23. मुद्रितश्लोकात्मकविष्णुस्मृतौ नेदं वचनमुपलभ्यते परन्तु ग्रन्थान्तरेष्वस्याविष्णुस्मृतित्वमुक्तम् ।↩

24. नार०स्मृ० व्यवहा० १२. श्लो० ७.↩

25. मुद्रितशातातपस्मृतौ लघुशतातपस्मृतौ बृद्धशातातपस्मृतौ वा नेदं वचनमुपलभ्यते ॥↩

26. सु० स्मृ०↩

27. व० स्मृ० १७. २५↩

28. म० स्मृ० ९. १७३.↩

29. म० स्मृ० ९. १७०.↩

30. म० स्मृ० ९ १८२.↩

31. म० स्मृ० ९. १७४.↩

32. म० स्मृ० ९. १७७.↩

33. म० स्मृ० ९. १६९.↩

34. म० स्मृ० १. १७१.↩

35. तै० ब्रा० १. १ २.↩

36. या० स्मृ० २. १३२.↩

37. म० स्मृ० १. १८४.↩

38. ना० स्मृ० १३. ४९.↩

39. म० स्मृ० ९. १३४.↩

40. व० ध० १५. ६. ९.↩

41. म० स्मृ० ९. २०८.↩

42. शौर्य विद्याधनं तथा इति. घ. पु. शौर्यं भार्याधनं तथा इति. ड. पु.↩

43. या० स्मृ० २. १९९.↩

44. मत्स्यपु० अ० १८ श्लो० २९.↩

45. तै०सं० ६, ५.८.↩

46. म० स्मृ० ९. १८. निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति श्रुतिः, इति मुद्रितपुस्तकपाठः । बोधायनसूत्रे तु प्रायस्संवदति ( ३. २. ४७.) पाठः ।↩

47. धूमावसानिकं श्रान्यं सन्ध्यायां स्नानतत्परा । इति ड. भूमावसनिकं इति. घ. पु.↩

48. या०स्मृ० २. १३८.↩

49. गो०ध० २८, २१, २२.↩

50. या० स्मृ० २. १३८, १३९,↩

51. पितैवेति वयम् इति च. पु.↩

52. Manu II, 35.↩

53. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

54. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

55. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

56. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

57. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

58. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

59. Manu II, 69; Yājñ. I, 15.↩

60. Manu II, 144.↩

61. Manu II, 146-148.↩

62. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

63. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

64. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

65. Manu II, 147.↩

66. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

67. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

68. Manu II, 37.↩

69. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

70. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

71. आप० ध० १.३०.८.↩

72. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

# १५①

## 01 एतेन देशकुलधर्मा व्याख्याताः④

एतेन देशकुलधर्मा *(=शास्त्राऽविरुद्धा एव)* व्याख्याताः १

▼

### ⑤

>
▼ Bühler

1. By this (discussion) the law of custom, which is observed in (particular) countries or families, has been disposed of. 1

▼ हरदत्त-टीका

### सूत्रम्⑥

एतेन देशकुलधर्मा व्याख्याताः ॥ १ ॥

### टिप्पनी⑥

'ज्येष्ठो दायाद' (२. १४. १६.) इत्यादिकं शास्त्रविप्रतिषेधादप्रमाणमित्युक्तम् । एतेन देशधर्माः कुलधर्माश्च व्याख्याताः । शास्त्रविप्रतिषिद्धा मातुलसुतापरिणयनादयोऽप्रमाणं विपरीताः प्रमाणमिति ।
गौतमोऽप्याह—
2 'देशकुलधर्माश्चाऽऽम्नायैरविरुद्धाः प्रमाण'मिति ॥ १॥

#### 02 मातुश् च योनिसम्बन्धेभ्यः

मातुश् च योनि-संबन्धेभ्यः पितुश् *(स्वेन साकं)* चासप्तमात् पुरुषाद्
यावता वा संबन्धो ज्ञायते
तेषां प्रेतेषूदकोपस्पर्शनं
*(मृतान्)* गर्भान् *(=बालान्)* परिहाप्यापरिसंवत्सरान् २

▼

### ⑤

>
▼ Bühler

2. On account of the blood relations of his mother and (on account of those) of his father within six degrees, or, as far as the relationship is traceable, he shall bathe if they die, excepting children that have not completed their first year. 3

▼ हरदत्त-टीका

## सूत्रम्⑥

मातुश्च योनिसम्बन्धेभ्यः पितुश्चाऽऽसप्तमाद्यावता वा सम्बन्धो ज्ञायते तेषां प्रेतेषूदकोपस्पर्शनं गर्भान् परिहाप्याऽऽपरिसंवत्सरान् ॥ २॥

## टिप्पनी⑥

**मातुर् योनि-सम्बन्धा** मातुलादयः ,
**पितुश् चासप्तमात् पुरुषात् सम्बन्धास्** सपिण्डादयः पैतृ-ष्वस्रेयादयश् च,
तेभ्य आरभ्याऽऽसप्तमाद् इत्य् अन्वय ।

**यावता वा** ऽन्तरेण **सम्बन्धो ज्ञायते** स्मर्यते जन्मना नाम्ना वा "ऽमुष्याऽयम् अस्मत्-कूटस्थस्य वंश्य एवंनामे"ति ।

तथा च मनुः —4

> सपिण्डता तु पुरुषे सप्तमे विनिवर्तते।
> समानोदकभावस्तु जन्मनाम्नोरवेदने ॥ इति ।

य एवंभूताः पुरुषास् **तेषां प्रेतेषु** मृतेषु उदकोपस्पर्शनं मरण-निमित्तं स्नानं कर्त्तव्यम् ।
**गर्भान्** बालान् **अपरि-संवत्सरान्** अपरिपूर्णसंवत्सरान् परिहाप्य वर्जयित्वा ।
बालेषु मृतेषु स्नानं न कर्तव्यम् इति ॥ २॥

#### 03 मातापितराव् एव तेषु

माता-पितराव् एव तेषु *(मृतापरिसंवत्सरेषु गर्भेषु)* ३

▼

## ⑤

>
▼ Bühler

3. On account of the death of the latter the parents alone bathe,

▼ हरदत्त-टीका

## सूत्रम्⑥

मातापितरावेव तेषु ॥ ३ ॥

## टिप्पनी⑥

बालेषु मृतेषु मातापितरावेवोदकस्पर्शनं कुर्याताम् ॥ ३ ॥

#### 04 हर्तारश् च

हर्तारश् च ४

▼

### ⑤

>
▼ Bühler

4. And those who bury them. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

हतारश्च ॥ ४ ॥

## टिप्पनी⑥

ये च तान् बालान् मृतान् हरन्ति तेऽप्युदकोपस्पर्शनं कुर्युरिति । एवमाचार्यस्य पक्षः ॥ ४॥

#### 05 भार्यायाम् परमगुरुसंस्थायाञ् चाकालम्

भार्यायां परम-गुरु*(=आचार्य-मातृ-पितृ)*-संस्थायां *(=मरणे)* च *(परेद्युर्)* +आकालम् *(२४ होराणाम्)* अभोजनम् ५

▼

### ⑤

>
▼ Bühler

5. If a wife or one of the chief Gurus (a father or Ācārya) die, besides, fasting (is ordained from the time at which they die) up to the same time (on the following day). 6

▼ हरदत्त-टीका

## सूत्रम्⑥

भार्यायां परमगुरुसंस्थायां चाकालभोजनम् ॥ ५ ॥

## टिप्पनी⑥

भार्या पत्नी । परमगुरवः आचार्यमातापितरः। संस्था मरणम् । भार्यायां संस्थितायां परमगुरूणां च संस्थायां सत्यां न केवलमुदकोपस्पर्शन, किं तर्हि ? अपरेद्युः आ तस्मात्कालातं अभोजन च ॥ ५ ॥

#### 06 आतुरव्यञ्जनानि कुर्वीरन्

आतुर*(=शोक)*व्यञ्जनानि कुर्वीरन् ६

▼

### ⑤

>
▼ Bühler

6. (In that case) they shall also show the (following) signs of mourning:

▼ हरदत्त-टीका

## सूत्रम्⑥

आतुरव्यञ्जनानि कुर्वीरन् ॥ ६॥

## प्रस्तावः⑥

किं च—

## टिप्पनी⑥

आतुरत्व व्यज्यते यैस्तानि च कुर्वीरन् भार्यादिमरणे ॥ ६ ॥

#### 07 केशान् प्रकीर्य पांसूना,

केशान् प्रकीर्य पांसूना, *(केशान्)* उप्य, एक-वाससो दक्षिणा-मुखाः सकृद्-उपमज्ज्योत्तीर्योपविशन्ति ७

▼

### ⑤

>
▼ Bühler

7. Dishevelling their hair and covering themselves with dust (they go outside the village), and, clothed with one garment, their faces turned to the south, stepping into the river they throw up water for the dead once, and then, ascending (the bank), they sit down. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

केशान्प्रकीर्य पासूनोप्यैकवाससो दक्षिणामुखास्सकृदुपमज्ज्योत्तीर्योपविशन्त्येवं त्रिः ॥ ७ ॥

## प्रस्तावः⑥

कानि पुनस्तानि?

## टिप्पनी⑥

**प्रकीर्य केशान् पासूना** ऽऽवपन्ति ।
ओप्य **एकवासस** अनुत्तरीयाः।
**दक्षिणामुखाः** दक्षिणां दिशं निरीक्षमाणाः
सकृद् उपमज्ज्य उदकादुत्तीर्य तीरे उपविशन्ति दक्षिणामुखा एव ॥ ७ ॥

#### 08 एवन् त्रिः

एवं त्रिः ८

▼

## ⑤

>
▼ Bühler

> 8. This (they repeat) thrice.

▼ हरदत्त-टीका

## सूत्रम्⑥

एवं त्रिः ॥८॥

## टिप्पनी⑥

एवम् उक्तप्रकारेण त्रिरुपमज्ज्योपविशेयुः ॥ ८ ॥

#### 09 तत्प्रत्ययम् उदकमुत्सिच्याप्रतीक्षा ग्रामम्

*("मह्यम् उदकं दत्तम्" इति)* तत्*(→प्रेत)*-प्रत्ययम् उदकम् उत्सिच्य
+अ-प्रतीक्षा ग्रामम् एत्य
यत् स्त्रिय आहुस् तत् कुर्वन्ति ९

▼

### ⑤

>
▼ Bühler

9. They pour out water consecrated in such a manner that the dead will know it (to be given to them). Then they return to the village without looking back, and perform those rites for the dead which (pious) women declare to be necessary.

▼ हरदत्त-टीका

## सूत्रम्⑥

तत्प्रत्ययमुदकमुत्सिच्याऽप्रतीक्षा ग्राममेत्य यस्त्रिय आहुस्तत्कुर्वन्ति ॥ ९ ॥

## टिप्पनी⑥

ततः **तत्प्रत्ययं** तेषां मृतानां भार्यादीनां यथा प्रत्ययो भवति— "मह्यम् उदकं दत्तम्" इति,
तथोदकम् उत्सिञ्चन्ति ।
त्रिर् इत्यनुवृत्तेस् त्रिः । आचारात्पित्र्यत्वाच्च वाससा तिलमिदं हस्ताभ्यां । भारद्वाजाय यज्ञशर्मणे एतत्तिलोदकं ददामीति प्रयोगः । उत्सिच्या प्रतीक्षाः पृष्ठतोऽनिरीक्षमाणा ग्राममेत्य गृहं प्रविश्य । अनेन बहिरिदं कर्मेति गम्यते । यत्तत्र मृतविषये स्त्रियः कर्तव्यमित्याहुः तत्कुर्वन्ति अग्न्युपस्पर्शनगवालम्भनादीनि । एतत्प्रथमेऽहनि । द्वितीयादि8ष्वहरहरञ्जलिनैकोत्तरवृद्धिरैकादशाहरिति पितृमेध उक्तं द्रष्टव्यम् ॥९॥

#### 10 इतरेषु चैतदेवैक उपदिशन्ति

इतरेषु चैतद् एवैक उपदिशन्ति १०

▼

### ⑤

>
▼ Bühler

10. Some declare, that these same (observances) shall also be kept in the case (of the death) of other (Sapiṇḍas).

▼ हरदत्त-टीका

## सूत्रम्⑥

इतरेषु चैतदेवैक उपदिशन्ति ॥ १० ॥

## टिप्पनी⑥

'आकालमभोजन' (२. १५, १)मित्यादि यदुक्तं तदितरेषु भार्यादिभ्योऽन्येष्वपि सपिण्डेषु मृतेषु कर्तव्यमित्येके आचार्या उपदिशन्ति ॥१०॥*

- - एतदन्तर—
    ब्राह्मणश्चैतस्मिन् कालेऽमात्यान् केशश्मश्रूणि वा वापयते ॥ ११ ॥
    अमात्याः प्रधानाः । स्पष्टमन्यत् ॥ ११॥ समावृत्ता न वापेरन् ॥ १२ ॥ पूर्वापवादोऽयम् । अमात्येष्वपि गुरुकुलात् समावृत्ताः स्नातकाः न केशादि वापयेरन् ॥ १२ ॥
    न विहारिण इत्यन्ये ॥ १३ ॥
    विहारिणो बालाः । तेऽपि न ॥ १३ ॥ इत्यधिकं० घ० पुस्तके०

#### 11 शुचीन् मन्त्रवतः सर्वकृत्येषु

शुचीन् मन्त्रवतः सर्व-कृत्येषु भोजयेत् ११

▼

## ⑤

>
▼ Bühler

11. At all religious ceremonies, he shall feed Brāhmaṇas who are pure and who have (studied and remember) the Veda. 9

▼ हरदत्त-टीका

## सूत्रम्⑥

शुचीन्मन्त्रवतस्सर्वकृत्येषु भोजयेत् ॥ ११ ॥

## टिप्पनी⑥

एकान्तेऽपि विधिप्रतिषेधानुसारिणः शुचयः, तान् । मन्त्रवतः 10अधीतवेदान् सर्वकृत्येषु श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु दैवेषु पित्र्येषु मानुषेषु च भोजयेत् । 11अन्ते 'ततो ब्राह्मणभोजन'मिति स्मृत्यन्तरे दर्शनात् ॥ ११ ॥

#### 12 देशतः कालतः शौचतः

देशतः *(→तीर्थस्थानेषु)* कालतः *(→ग्रहणादौ)* शौचतः *(→कृच्छ्रादेर् अन्ते)* सम्यक् प्रतिग्रहीतृत इति दानानि प्रतिपादयति १२

▼

## ⑤

>
▼ Bühler

12. He shall distribute his gifts at the proper places, at the proper times, at the occasion of purificatory rites, and to proper recipients. 12

▼ हरदत्त-टीका

## सूत्रम्⑥

देशतः कालतः शौचतः सम्यक्प्रतिग्रहीतृत इति दानानि प्रतिपादयति ॥ १२॥

## टिप्पनी⑥

सप्तम्यर्थे तसिल् । देशः प्रयागादिः । कालः सूर्यग्रहणादिः । 13शौचं कृच्छ्रादिपरिसमाप्तिः। सम्यक् समीचीनः प्रतिग्रहीता 'तुल्यगुणेषु वयोवृद्धश्श्रेया'नित्यादि । एतेषु दानानि देयान्यवश्यं प्रतिपादयति दद्यादिति ॥ १२ ॥

#### 13 यस्याग्नौ न क्रियते

यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यम् १३

▼

## ⑤

>

▼ Bühler

13. That food must not be eaten of which (no portion) is offered in the fire, and of which no portion is first given (to guests).

▼ हरदत्त-टीका

## सूत्रम्⑥

यस्याऽग्नौ न क्रियते यस्य चाऽयं न दीयते न तभोक्तव्यम् ॥१३॥

## टिप्पनी⑥

यस्याऽनस्यैकदेशः अग्नौ न क्रियते न हूयते 14यस्माद्वोद्धृत्याऽयं न दीयते न तद्भोक्तव्यम् ॥ १३॥

#### 14 न क्षारलवणहोमो विद्यते

न क्षारलवणहोमो विद्यते १४

▼

## ⑤

>
▼ Bühler

14. No food mixed with pungent condiments or salt can be offered as a burnt-offering. 15

▼ हरदत्त-टीका

## सूत्रम्⑥

न क्षारलवणहोमो विद्यते ॥ १४॥

## टिप्पनी⑥

यत् भक्ष्यमाणं पश्यतो लालोत्पद्यते तत् क्षारं गुड16मरीचिलिकुचादि । 17क्षारलवण संसृष्टं न होतव्यम् ॥ १४ ॥

#### 15 तथावरान्न संसृष्टस्य च

तथावरान्न संसृष्टस्य च १५

▼

## ⑤

>
▼ Bühler

15. Nor (can food) mixed with bad food (be used for a burnt-oblation). 18

▼ हरदत्त-टीका

## सूत्रम्⑥

तथाऽवरान्नसंसृष्टस्य च ॥ १८ ॥

## टिप्पनी⑥

अवरान्नं कुलुत्थादि । तत्संसृष्टस्याप्यन्नस्य होमो न विद्यते ॥ १५ ॥

#### 16 अहविष्यस्य होम उदीचीनमुष्णम्

अहविष्यस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिञ्जुह्यात्तद्धुतमहुतं चाग्नौ भवति १६

▼

## ⑤

>
▼ Bühler

16. If (he is obliged to offer) a burnt-offering of food unfit for that purpose, he shall take hot ashes from the northern part of his fire and offer the food in that. That oblation is no oblation in the fire.

▼ हरदत्त-टीका

## सूत्रम्⑥

अहविष्यस्य होम उदीचीनमुष्णं भस्माऽपोह्य तस्मिञ्जुहुयात्तद्धुतमहुतं चाग्नौ भवति ॥ १६ ॥

## प्रस्तावः⑥

अथ यस्यैवंविधमेव भोज्यमुपस्थितं 19तस्य कथं होमः ? तत्राह —

## टिप्पनी⑥

औपासनात् पचनाद्वा ऽग्नेरुदीचीनमुष्णं भस्माऽपोह्य तस्मिन् भस्मनि जुहुयात् वैश्वदेवमन्त्रैः । एषोऽहविष्यस्य होमः। तदेवं क्रियमाणं हुतं च भवति हवनार्थनिर्वृत्तेः । अहुतं चाऽग्नौ भवति । भस्ममात्रत्वादिति । अत्र बोधायनः —
20अथ यद्येतदेवान्नं स्यादुत्तरतो भस्ममिश्रानङ्गारान्निरूह्य तेषु जुहुयादिति ।
21अपर आह-यान्यहविष्याणि व्यञ्जनान्यहरहर्भोज्यानि तेषामेष संस्कारस्सकृच्च होमोऽमन्त्रक इति ॥ १६ ॥

#### 17 न स्त्री जुहुयात्

न स्त्री जुहुयात् १७

▼

## ⑤

>
▼ Bühler

17. A female shall not offer any burnt-oblation, 22

▼ हरदत्त-टीका

## सूत्रम्⑥

न स्त्री जुहुयात् ॥ १७॥

## प्रस्तावः⑥

उत्तरे द्वे सूत्रे स्पष्टे —

#### 18 नानुपेतः

नानुपेतः १८

▼

### ⑤

>
▼ Bühler

18. Nor a child, that has not been initiated. 23

▼ हरदत्त-टीका

## सूत्रम्⑥

नाऽनुपेतः॥ १८॥

#### 19 आन्नप्राशनाद्गर्भा नाप्रयता भवन्ति

आऽन्न-प्राशनाद् गर्भा नाप्रयता भवन्ति १९

▼

### ⑤

>
▼ Bühler

19. Infants do not become impure before they receive the sacrament called Annaprāśana (the first feeding).

▼ हरदत्त-टीका

## सूत्रम्⑥

आन्नप्राशनाद् गर्भा नाऽप्रयता भवन्ति ॥ १९ ॥

## टिप्पनी⑥

अन्नप्राशनात्प्राक् गर्भा बाला नाऽप्रयता भवन्ति रजस्वलादिस्पर्शनेऽपि । गौतमस्तु अपां मार्जनादिकमिच्छति । यथाह 24 'अन्यत्राऽपां मार्जनप्रधानावोक्षणेभ्यः' ॥ १९॥

#### 20 आ परिसंवत्सराद् इत्येके

आ परिसंवत्सराद् इत्येके २०

▼

## ⑤

>
▼ Bühler

20. Some (declare, that they cannot become impure) until they have completed their first year,

▼ हरदत्त-टीका

## सूत्रम्⑥

परिसंवत्सरादित्यके ॥ २० ॥

## टिप्पनी⑥

यावत् संवत्सरो न परिपूर्यते तावन्नाप्रयता गर्भा इत्यके मन्यते ॥२३॥

#### 21 यावता या दिशो

यावता या दिशो न प्रजानीयुः २१

▼

## ⑤

>
▼ Bühler

21. Or, as long as they cannot distinguish the points of the horizon.

▼ हरदत्त-टीका

## सूत्रम्⑥

याचता वा दिशो न प्रजानीयुः ॥ २१ ॥

## टिप्पनी⑥

यावद्दिग्विभागज्ञानं नाऽस्ति तावताऽप्रयता भवन्ति ॥ २१ ॥

#### 22 ओपनयनाद् इत्य् अपरम्

ओपनयनाद् इत्य् अपरम् २२

▼

### ⑤

>
▼ Bühler

22. The best (opinion is, that they cannot be defiled) until the initiation has been performed.

▼ हरदत्त-टीका

## सूत्रम्⑥

25ओपनयनादित्यपरम् ॥ २२ ॥

## टिप्पनी⑥

उपयनादर्वाक् नाऽप्रयता गर्भा 26इत्यपरदर्शनम् ॥ २२॥

#### 23 अत्र ह्यधिकारः शास्त्रैर्

अत्र ह्य् अधिकारः *(कर्मसु)* शास्त्रैर् *(दत्ता)* भवति २३

▼

### ⑤

>
▼ Bühler

23. For at that (time a child) according to the rules of the Veda obtains the right (to perform the various religious ceremonies).

▼ हरदत्त-टीका

## सूत्रम्⑥

अत्र ह्यधिकारश्शास्त्रैर्भवति ॥ २३ ॥

## प्रस्तावः⑥

अत्रोपपत्तिः—

## टिप्पनी⑥

हि यस्मादत्रोपनयने सति विधिनिषेधशास्त्रैरधिकारो भवति ॥२३॥

#### 24 सा निष्ठा

सा *(=उपनयनम्)* निष्ठा *(=कर्माधिकार-प्रारम्भः)*२४

▼

## ⑤

>
▼ Bühler

24. That ceremony is the limit (from which the capacity to fulfil the law begins).

▼ हरदत्त-टीका

## सूत्रम्⑥

सा निष्ठा ॥ २४ ॥

## टिप्पनी⑥

उपनयनमपि परामृशतस्तच्छब्दस्य निष्ठाशब्दसमानाधिकरण्यात् स्त्रीलिङ्गता । सा निष्ठा तदुपनयनमवसानमधिकारस्येति ॥२४॥

#### 25 स्मृतिश्च

स्मृतिश्च *(एवं विद्यते)* २५

▼

## ⑤

>
▼ Bühler

25. And the Smṛti (agrees with this opinion). 27

▼ हरदत्त-टीका

## सूत्रम्⑥

स्मृतिश्च ॥ २५ ॥

## टिप्पनी⑥

अस्मिन्नर्थे स्मृतिरपि भवति-28उताऽब्रह्मचारी यथोपपादमुत्रपुरीषो भवति नाऽस्याऽचमकल्पो विद्यते इति 29 प्रागुपनयनात्कामचारवादभक्ष' इति गौतमः ॥ २५॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने पञ्चदशी कण्डिका ॥१५॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने षष्ठः पटलः ॥ ६॥

इति षष्ठः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
5. Manu II, 35.↩
6. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
7. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
12. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

15. Manu II, 69; Yājñ. I, 15.↩

16. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

17. आप० ध० १.३०.८.↩

18. Manu II, 144.↩

19. मनु० रमृ० २.६↩

20. गौ० ध० १. १, २↩

21. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

22. Manu II, 146-148.↩

23. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

24. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

25. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

26. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

27. Manu II, 147.↩

28. आप० ध० १.३०.८.↩

29. मनु० रमृ० २.६↩

౦౮①

# १६①

## 01 सह देवमनुष्या अस्मिंल्④

सह देवमनुष्या अस्मिंल् लोके पुरा बभूवुः ।
अथ देवाः कर्मभिर् दिवं जग्मुर्,
अहीयन्त मनुष्याः ।
तेषां ये तथा कर्माण्य् आरभन्ते
सह देवैर् ब्रह्मणा चामुष्मिंल् लोके भवन्ति ।
अथैतन् मनुः श्राद्ध-शब्दं कर्म प्रोवाच १

▼

## ⑤

>
▼ Bühler

1. Formerly men and gods lived together in this world. Then the gods in reward of their sacrifices went to heaven, but men were left behind. Those men who perform sacrifices in the same manner as the gods did, dwell (after death) with the gods and Brahman in heaven. Now (seeing men left behind), Manu revealed this ceremony, which is designated by the word Śrāddha (a funeral-oblation). 1

▼ हरदत्त-टीका

## सूत्रम्⑥

सह देवमनुष्या अस्मिंल्लोके पुरा बभूवुः । अथ देवाः कर्मभिर्दिवं जग्मुरहीयन्त मनुष्याः । तेषां ये तथा कर्माण्यारभन्ते सह देवैर्ब्रह्मणा चाऽमुष्मिन् लोके भवन्ति । अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच । 2प्रजानिश्श्रेयसाय च ॥ १ ॥

## टिप्पनी⑥

3श्राद्धविधित्सया तस्य प्ररोचनार्थोऽयमर्थवादः ।
पुरा किल देवाश्च मनुष्याश्चाऽस्मिन्नेव लोके सहैव बभूवुः ।
अथ तं सहभावम् असहमाना **देवाः**
**कर्मभिः** श्रौतैस् स्मार्तैर् गार्ह्यैश् च
यथावद् अनुष्ठितैर् **दिवं जग्मुः**
**मनुष्यास् तु**
तथा कर्तुम् असमर्था **अहीयन्त**,
हीना अभवन् इहैव लोके स्थिताः ।
यत एवं कर्मणां सामर्थ्यम्
अत इदानीम् अपि
**तेषां** मनुष्याणां मध्ये **ये तथा कर्माण्य् आरभन्ते** कुर्वन्ति
यथारभन्त देवाः,
**ते देवैः ब्रह्मणा च सहामुष्मिन् लोके भवन्ति** त्रिविष्टपे मोदन्ते4 ।

अथैवं हीनान् मनुष्यान् दृष्ट्वा
**मनुर् वैवस्वतः श्राद्ध-शब्दं** श्राद्धम् इति शब्द्यमानम् एतत् कर्म प्रोवाच ।
किमर्थम् ?
प्रजानिःश्रेयसाय, तादर्थ्ये चतुर्थी ।
प्रजानां निःश्रेयसार्थम् ।
**निश्श्रेयसा चे**ति पाठे
छान्दसो यकारस्य चकारः।
अपर आह- छान्दसो लिङ्गव्यत्ययः ।
प्रजा-निश्श्रेयसं चाऽस्य कर्मणः फलम् इति ॥१॥
#### 02 प्रजानिःश्रेयसा च

प्रजानिःश्रेयसाय*(च)* २

▼

### ⑤

>
▼ Bühler

2. And (thus this rite has been revealed) for the salvation of mankind. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

6प्रजानिश्श्रेयसाय च ॥ १ ॥

## टिप्पनी⑥

*(पूर्वसूत्रे व्याख्यातम् ।)*

#### 03 तत्र पितरो देवता

तत्र पितरो देवता
ब्राह्मणास् त्वाहवनीयार्थे ३

▼

### ⑤

>
▼ Bühler

3. At that (rite) the Manes (of one's father, grandfather, and great-grand father) are the deities (to whom the sacrifice is offered). But the Brāhmaṇas, (who are fed,) represent the Āhavanīya-fire. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे ॥२॥

## टिप्पनी⑥

**तत्र** श्राद्धकर्मणि
**पितरः** पितृपितामहप्रपितामहाः **देवताः** ।
**ब्राह्मणास् तु** भुञ्जाना **आहवनीयार्थे** आहवनीयकृत्ये वेदितव्याः।
त्रीणि श्राद्ध-करणानि- होमो, ब्राह्मण-भोजनं, पिण्ड-दानं चेति ।
अत्र भोजनस्य8 प्रधानत्व-ख्यापनार्थो ऽयम् अर्थवादः ॥ २ ॥

#### 04 मासि मासि कार्यम्

मासि मासि कार्यम् *(यावज्जीवम्)* ४

▼

## ⑤

>
▼ Bühler

4. That rite must be performed in each month. 9

▼ हरदत्त-टीका

## सूत्रम्⑥

मासि मासि कार्यम् ॥ ३ ॥

## टिप्पनी⑥

तद् इदं कर्म
मासे मासे कर्त्तव्यम् ।
वीप्सा-वचनाद् यावज्-जीविको ऽभ्यासः।

#### 05 अपरपक्षस्यापराह्णः श्रेयान्

अपर-पक्षस्यापराह्णः श्रेयान् ५

▼

## ⑤

>
▼ Bühler

5. The afternoon of (a day of) the latter half is preferable (for it). 10

▼ हरदत्त-टीका

## सूत्रम्⑥

अपरपक्षस्याऽपराह्णः श्रेयान् ॥ ४॥

## टिप्पनी⑥

अपरपक्षस्य यान्य् अहानि
तेष्व् अपराह्णः प्रशस्ततरः ॥४॥

#### 06 तथापरपक्षस्य जघन्यान्यहानि

तथा ऽपरपक्षस्य जघन्यान्य् अहानि ६

▼

## ⑤

>
▼ Bühler

6. The last days of the latter half (of the month) likewise are (preferable to the first days).

▼ हरदत्त-टीका

## सूत्रम्⑥

तथाऽपरपक्षस्य जघन्यान्यहानि ॥ ५ ॥

## टिप्पनी⑥

यस्यैव पक्षस्य यान्य् अहानि पञ्चदश11
तेषाम् उत्तरम् उत्तरं प्रशस्ततरम् ॥ ५॥

#### 07 सर्वेष्वेवापरपक्षस्याहस्सु क्रियमाणे पितॄन्प्रीणाति

सर्वेष्व् एवापर-पक्षस्याहस्सु क्रियमाणे
**पितॄन् प्रीणाति** ।
कर्तुस्तु *(प्रतिपद्येव द्वितीयायाम् एवेत्यादि)* कालाभिनियमात् फल-विशेषः ७

▼

### ⑤

>
▼ Bühler

7. (A funeral-oblation) offered on any day of the latter half of the month gladdens the Manes. But it procures different rewards for the sacrificer according to the time observed. 12

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वेष्वेवाऽपरपक्षस्याऽहस्सु क्रियमाणे पितॄन् प्रीणाति । कर्तुस्तु कालाभिनियमात्फलविशेषः ॥ ६ ॥

## टिप्पनी⑥

**सर्वेष्व् एवाहस्सु** पितॄणां तृप्तिर् अविशिष्टा ।
यस्तु कर्ता प्रतिपदादिके काले नियमेन श्राद्धं करोति सर्वेषु मासेषु
प्रतिपद्येव द्वितीयायाम् एवेत्यादि
तस्य कर्तुस् तस्मात् **कालाभिनियमात् फल-विशेषो** भवति ॥६॥

#### 08 प्रथमेऽहनि क्रियमाणे स्त्रीप्रायमपत्ये

प्रथमेऽहनि क्रियमाणे स्त्री-प्रायम् अपत्ये जायते ८

▼

### ⑤

>
▼ Bühler

8. If it be performed on the first day of the half-month, the issue (of the sacrificer) will chiefly consist of females.

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रथमेऽहनि क्रियमाणे स्त्रीप्रायमपत्ये जायते ॥७॥

## प्रस्तावः⑥

कोऽसावित्याह—

## टिप्पनी⑥

यः प्रतिपदि नियमेन श्राद्धं करोति,
तस्यापत्ये प्रजासन्ताने स्त्रीप्रायं जायते ।
प्रायेण स्त्रियो जायन्ते ॥ ७ ॥

#### 09 द्वितीये ऽस्तेनाः

द्वितीये ऽस्तेनाः ९

▼

## ⑤

>
▼ Bühler

9. (Performed on the second day it procures) children who are free from thievish propensities.

▼ हरदत्त-टीका

## सूत्रम्⑥

द्वितीये स्तेनाः ॥ ८ ॥

## टिप्पनी⑥

जायन्ते (ऽ)चोराः पुत्राः ॥ ८॥

#### 10 तृतीये ब्रह्मवर्चसिनः

तृतीये ब्रह्मवर्चसिनः १०

▼

## ⑤

>
▼ Bühler

10. (If it is performed) on the third day children will be born to him who will fulfil the various vows for studying (portions of the Veda).

▼ हरदत्त-टीका

## सूत्रम्⑥

13तृतीये ब्रह्मवर्चसिनः ॥ ९ ॥

## टिप्पनी⑥

14व्रताध्ययन-सम्पत्तिर् **ब्रह्म-वर्चसम्** ॥ ९ ॥

#### 11 चतुर्थे क्षुद्र पशुमान्

चतुर्थे क्षुद्र-पशुमान् ११

▼

## ⑤

>
▼ Bühler

11. (The sacrificer who performs it) on the fourth day becomes rich in small domestic animals.

▼ हरदत्त-टीका

## सूत्रम्⑥

चतुर्थे क्षुद्रपशुमान् ॥१०॥

## टिप्पनी⑥

क्षुद्राः पशवोऽजाव्यादयः तद्वान् कर्ता भवति । उत्तरत्राप्येकवचने15 कर्तुर्वादो द्रष्टव्यः ॥ १०॥

#### 12 पञ्चमे पुमांसः बह्वपत्यो

पञ्चमे पुमांसः ।
बह्व्-अपत्यो,
न चानपत्यः प्रमीयते १२

▼

## ⑤

>
▼ Bühler

12. (If he performs it) on the fifth day, sons (will be born to him). He will have numerous and distinguished offspring, and he will not die childless. 16

▼ हरदत्त-टीका

## सूत्रम्⑥

पञ्चमे पुमांसो बह्वपत्यो न चाऽनपत्यः प्रमीयते ॥११॥

## टिप्पनी⑥

पुमास एव भवन्ति, 17 बहवश्च भवन्ति, न चाऽनपत्यः प्रमीयते जीवत्स्वेव पुत्रेषु सन्निहितेषु च स्वयं म्रियते । न तेषु मृतेषु, न देशान्तरं गतेषु, नाऽपि स्वयं देशान्तरं गत इति ॥ ११ ॥

#### 13 षष्ठेऽध्वशीलोऽक्षशीलश्च

षष्ठे ऽध्व-शीलो ऽक्ष-शीलश् च १३

▼

## ⑤

>

▼ Bühler

13. (If he performs it) on the sixth day, he will become a great traveller and gambler.

▼ हरदत्त-टीका

## सूत्रम्⑥

षष्ठेऽध्वशीलोऽक्षशीलश्च ॥ १२ ॥

## टिप्पनी⑥

अध्वशीलः पान्थः । अक्षशीलः कितवः ॥ १२ ॥

#### 14 सप्तमे कर्षे राद्धिः

सप्तमे *(भू-)*कर्षे राद्धिः*(=सिद्धिः)* १४

▼

## ⑤

>
▼ Bühler

14. (The reward of a funeral-oblation performed) on the seventh day is success in agriculture.

▼ हरदत्त-टीका

## सूत्रम्⑥

सप्तमे कर्षे राद्धिः ॥ १३ ॥

## टिप्पनी⑥

**कर्षः** कृषिः । **राद्धिः**, सिद्धिः ॥ १३ ॥

#### 15 अष्टमे पुष्टिः

अष्टमे पुष्टिः १५

▼

## ⑤

>
▼ Bühler

15. (If he performs it) on the eighth day (its reward is) prosperity

▼ हरदत्त-टीका

## सूत्रम्⑥

अष्टमे पुष्टिः ॥ १४ ॥

## टिप्पनी⑥

स्पष्टम् ॥ १४॥

#### 16 नवम एकखुराः

नवम एक-खुराः *(अश्वादयः)* १६

▼

## ⑤

>
▼ Bühler

16. (If he performs it) on the ninth day (its reward consists in) one-hoofed animals.

▼ हरदत्त-टीका

## सूत्रम्⑥

नवम एकखुराः ॥ १६ ॥

## टिप्पनी⑥

अश्वादयः ॥ १५ ॥

#### 17 दशमे व्यवहारे राद्धिः

दशमे व्यवहारे राद्धिः*(=सिद्धिः)* १७

▼

## ⑤

>
▼ Bühler

17. (If he performs it) on the tenth day (its reward is) success in trade.

▼ हरदत्त-टीका

## सूत्रम्⑥

दशमे व्यवहारे राद्धिः ॥ १६ ॥

## टिप्पनी⑥

व्यवहारो वाणिज्यम्, शास्त्रपरिज्ञानं वा ॥ १६ ॥

#### 18 एकादशे कृष्णायसन् त्रपुसीसम्

एकादशे कृष्णायसं त्रपु-सीसम् १८

▼

## ⑤

>
▼ Bühler

18. (If he performs it) on the eleventh day (its reward is) black iron, tin, and lead.

▼ हरदत्त-टीका

## सूत्रम्⑥

एकादशे कृष्णायसं त्रपुसीसम् ॥ १७ ॥

## टिप्पनी⑥

कृष्णमयः कृष्णायसम् । त्रपुसीसे लोहविशेषौ ॥ १७ ॥

#### 19 द्वादशे पशुमान्

द्वादशे पशु-मान् १९

▼

## ⑤

>
▼ Bühler

19. (If he performs a funeral-oblation) on the twelfth day, he will become rich in cattle.

▼ हरदत्त-टीका

## सूत्रम्⑥

द्वादशे पशुमान् ॥ १८ ॥

## टिप्पनी⑥

द्वादश्यां बहवः पशवो भवन्ति ॥ १८ ॥

#### 20 त्रयोदशे बहुपुत्रो बहुमित्रो

त्रयोदशे बहु-पुत्रो बहु-मित्रो दर्शनीयापत्यः । युव-मारिणस् तु भवन्ति २०

▼

## ⑤

>
▼ Bühler

20. (If he performs it) on the thirteenth day, he will have many sons (and) many friends, (and) his offspring will be beautiful. But his (sons) will die young. 18

▼ हरदत्त-टीका

## सूत्रम्⑥

त्रयोदशे बहुपुत्रो बहुमित्रो दर्शनीयापत्यो युवमारिणस्तु भवन्ति ॥ १९ ॥

## टिप्पनी⑥

त्रयोदश्यां बहवः पुत्रा मित्राणि च भवन्ति । अपत्यानि च दर्शनीयानि भवन्ति । किं तु ते पुत्रा युवमारिणः युवान एव म्रियन्ते19 ॥ १९ ॥

#### 21 चतुर्दश आयुधे राद्धिः

चतुर्दश आयुधे राद्धिः*(=सिद्धिः)* २१

▼

## ⑤

>
▼ Bühler

21. (If he performs it) on the fourteenth day (its reward is) success in battle. 20

▼ हरदत्त-टीका

## सूत्रम्⑥

चतुर्दश आयुधे राद्धिः ॥२०॥

## टिप्पनी⑥

संग्रामे जयः ॥२०॥

#### 22 पञ्चदशे पुष्टिः

पञ्चदशे पुष्टिः २२

▼

⑤

>
▼ Bühler

22. (If he performs it) on the fifteenth day (its reward is) prosperity.

▼ हरदत्त-टीका

## सूत्रम्⑥

पञ्चदशे पुष्टिः ॥ २१ ॥

## टिप्पनी⑥

स्पष्टम् ॥ २१ ॥

#### 23 तत्र द्रव्याणि तिलमाषा

तत्र द्रव्याणि तिल-माषा व्रीहि-यवा आपो मूल-फलानि २३

▼

⑤

>
▼ Bühler

23. The substances (to be offered) at these (sacrifices) are sesamum, māṣa, rice, yava, water, roots, and fruits. 21

▼ हरदत्त-टीका

## सूत्रम्⑥

तत्र द्रव्याणि तिलमाषा व्रीहियवा आपो मूलफलानि च ॥ २२ ॥

## टिप्पनी⑥

तत्र श्राद्धे तिलादीनि द्रव्याणि यथायथमवश्यमुपयोज्यानि ॥ २२ ॥

#### 24 स्नेहवति त्वेवान्ने तीव्रतरा

स्नेहवति त्व् एवान्ने तीव्रतरा पितॄणां प्रीतिर्द्राघीयांसं च कालम् २४

▼

⑤

>
▼ Bühler

24. But, if food mixed with fat (is offered), the satisfaction of the Manes is greater, and (lasts) a longer time,

▼ हरदत्त-टीका

## सूत्रम्⑥

स्नेहवति त्वेवाऽन्ने तीव्रतरा पितॄणां प्रीतिर्द्राघीयांसं च कालम् ॥ २३ ॥

## टिप्पनी⑥

यद्वा तद्वा अन्नं भवतु स्नेहवति तु तस्मिन्नाज्यादिभिरुपसिक्ते पितॄणां तीव्रतरा प्रकृष्टतरा प्रीतिर्भवति । सा च द्राघीयांसं च कालमनुवर्तते ॥२३॥

#### 25 तथा धर्माहृतेन द्रव्येण

तथा धर्माहृतेन द्रव्येण तीर्थे *(=सत्पात्रे)* प्रतिपन्नेन २५

▼

⑤

>
▼ Bühler

25. Likewise, if money, lawfully acquired, is given to worthy (persons).

▼ हरदत्त-टीका

## सूत्रम्⑥

तथा धर्माहृतेन द्रव्येण तीर्थे प्रतिपन्नेन ॥ २४ ॥

## टिप्पनी⑥

धर्मार्जितं यद्द्रव्यं पात्रे च प्रतिपादितं तेनाऽपि तथा तीव्रतरा पितॄणां प्रीतिर्द्राघीयांसं च कालमिति ॥ २४ ॥

#### 26 संवत्सरङ् गव्येन प्रीतिः

संवत्सरं गव्येन *(मांसेन)* प्रीतिः २६

▼

### ⑤

>
▼ Bühler

26. Beef satisfies (the Manes) for a year, 22

▼ हरदत्त-टीका

## सूत्रम्⑥

संवत्सरं गव्येन प्रीतिः ॥ २५ ॥

## टिप्पनी⑥

उत्तरत्र मांसग्रहणाद् इहापि मांसस्य ग्रहणम् ।
गव्येन मांसेन संवत्सरं पितृणां प्रीतिर्भवति ॥ २५ ॥

#### 27 भूयांसमतो माहिषेण

भूयांसम् अतो माहिषेण २७

▼

### ⑤

>
▼ Bühler

27. Buffalo's (meat) for a longer (time) than that.

▼ हरदत्त-टीका

## सूत्रम्⑥

भूयांसमतो माहिषेण ॥ २६ ॥

## टिप्पनी⑥

माहिषेण मांसेन, अतः सम्वत्सरात् भूयांसं बहुतरं कालं पितृणां प्रीतिर्भवति ॥ २६ ॥

#### 28 एतेन ग्राम्यारण्यानाम् पशूनाम्

एतेन *(माहिष-शब्देन)* ग्राम्यारण्यानां पशूनां मांसं *(श्राद्धे)* मेध्यं व्याख्यातम् २८

▼

⑤

>
▼ Bühler

28. By this (permission of the use of buffalo's meat) it has been declared that the meat of (other) tame and wild animals is fit to be offered.

▼ हरदत्त-टीका

## सूत्रम्⑥

एतेन ग्राम्यारण्यानां पशूनां मांसं मेध्यं व्याख्यातम् ॥२७॥

## टिप्पनी⑥

एतेन माहिषेण मांसेनाऽन्येषामपि **ग्राम्याणाम्** अजादीनामारण्यानां च
शशादीनां मांसं **मेध्यं** व्याख्यातम्-
पितॄणां प्रीतिकरमिति । **मेध्य**-ग्रहणं प्रतिषिद्धानां मा भूदिति ॥ २७ ॥

इत्यापस्तम्बधर्मसुत्रवृत्तौ द्वितीयप्रश्ने षोडशी कण्डिका ॥ १६ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
5. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
7. Manu II, 35.↩
8. आप० ध० १.३०.८.↩
9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

12. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

13. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

14. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

15. आप० ध० १.३०.८.↩

16. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

17. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

18. Manu II, 69; Yājñ. I, 15.↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. Manu II, 144.↩

21. Manu II, 146-148.↩

22. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

# १७①

## 01 खड्गोपस्तरणे खड्गमांसेनानन्त्यङ् कालम्④

खड्गोपस्तरणे खड्ग-मांसेनानन्त्यं कालम् *(पितृप्रीतिः)* १

▼

### ⑤

>
▼ Bühler

1. (If) rhinoceros' meat (is given to Brāhmaṇas seated) on (seats covered with) the skin of a rhinoceros, (the Manes are satisfied) for a very long time. 1

▼ हरदत्त-टीका

### सूत्रम्⑥

खड्गोपस्तरणे खड्गमांसेनाऽऽनन्त्यं कालम् ॥ १ ॥

### टिप्पनी⑥

खड्गचर्मोपस्तरणेष्वासनेषूपविष्टेभ्यो ब्राह्मणेभ्यो दत्तेन खड्गमांसेनाऽनन्तं कालं प्रीतिभवति । आनन्त्यमिनि पाठे स्वार्थ ष्यञ् ॥ १॥

#### 02 तथा शतबलेर्मत्स्यस्य मांसेन

तथा शत-बलेर् *(=बहु-शल्यस्य रोहितस्य)* मत्स्यस्य मांसेन २

▼

### ⑤

>
▼ Bühler

2. (The same effect is obtained) by (offering the) flesh (of the fish called) Śatabali, 2

▼ हरदत्त-टीका

### सूत्रम्⑥

तथा शतबलेर्मत्स्यस्य मांसेन ॥२॥

## टिप्पनी⑥

शतबलिर् बहुशल्यको रोहिताख्यः ॥ २ ॥

#### 03 वार्ध्राणसस्य च

वार्ध्राणसस्य *(क्रौञ्चनिभस्य)* च ३

▼

## ⑤

>
▼ Bühler

3. And by (offering the) meat of the (crane called) Vārdhrāṇasa.

▼ हरदत्त-टीका

## सूत्रम्⑥

वार्ध्राणस्य च ॥ ३ ॥

## टिप्पनी⑥

व्याख्यातो वार्ध्राणसः । तस्य मांसेनाऽऽनन्त्यं कालं प्रीतिर्भवति ॥३॥

#### 04 प्रयतः प्रसन्नमनाः सृष्टो

प्रयतः प्रसन्न-मनाः सृष्टो*(=उत्साहवान्)* भोजयेद्
ब्राह्मणान् ब्रह्म-विदो योनि-गोत्र-मन्त्रान्तेवास्य्-असंबन्धान् ४

▼

## ⑤

>
▼ Bühler

4. Pure, with composed mind and full of ardour, he shall feed Brāhmaṇas who know the Vedas, and who are not connected with him by marriage, blood relationship, by the relationship of sacrificial priest and sacrificer, or by the relationship of (teacher and) pupil. 3

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रयतः प्रसन्नमनास् सृष्टो भोजयेद् ब्राह्मणान् ब्रह्मविदो योनिगोत्रमन्त्रान्तेवास्यसम्बन्धान् ॥ ४ ॥

## टिप्पनी⑥

प्रयतः स्नानाचमनादिना शुद्धः । प्रसन्नमनाः अव्याकुलमनाः । **सृष्टः** उत्साहवान् । 4 'सृष्टश्चेद्ब्राह्मणवधे हत्वाऽपी'तिदर्शनात् । 5 वृत्तिसर्गतायनेषु क्रमः' इत्यत्र च सर्ग उत्साहः । एवंभूतो ब्राह्मणान् भोजयेत् । कीदृशान् ? ब्रह्मविदः आत्मविदः । योन्यादिभिरसम्बन्धान् योनिसम्बन्धा मातुलादयः । गोत्रसम्बन्धा सगोत्राः । मन्त्रसम्बन्धा ऋत्विजो याज्याश्च । अन्तेवासिसम्बन्धाश्शिष्या आचार्याश्च ॥ ४॥

#### 05 गुणहान्यान् तु परेषां

गुणहान्यां तु
परेषां समुदेतः सोदर्योऽपि भोजयितव्यः ५

▼

## ⑤

>
▼ Bühler

5. If strangers are deficient in the (requisite) good qualities, even a full brother who possesses them, may be fed (at a Śrāddha).

▼ हरदत्त-टीका

## सूत्रम्⑥

गुणहान्यां तु परेषां समुदेतः सोदर्योऽपि भोजयितव्यः ॥५॥

## टिप्पनी⑥

यदि परे योनिगोत्रादिभिरसम्बन्धा वृत्तादिगुणहीना एव लभ्यन्ते, तदा समुदेतो विद्यावृत्तादिभिर्युक्तः सोदर्योऽपि भोजयितव्यः किमुत मातुलादयः इत्यपिशब्दस्याऽर्थः ॥ ५॥

#### 06 एतेनान्तेवासिनो व्याख्याताः

एतेनान्तेवासिनो व्याख्याताः *(अन्यालाभे भोजनीया इति)* ६

▼

## ⑤

>
▼ Bühler

6. (The admissibility of) pupils (and the rest) has been declared hereby.

▼ हरदत्त-टीका

## सूत्रम्⑥

एतेनाऽन्तेवासिनो व्याख्याताः ॥ ६॥

## टिप्पनी⑥

एतेन सोदर्येण अन्तेवासिनः बहुवचननिर्देशात् पूर्वत्र निर्दिष्टा योन्यादिभिस्सम्बन्धास्सर्व एव व्याख्याताः-अन्येषामभावे समुदेता भोजयितव्या इति। अत्र मनुः—

6 एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
अनुकल्पस्तु विज्ञेयः सदा सद्भिरनुष्ठितः ॥

7मातामहं मातुलं च
स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं8 विट्पतिं बन्धुम्
ऋत्विग्याज्यौ च भोजयेत् ॥

इति ॥६॥

#### 07 अथाप्युदाहरन्ति

अथाप्य् उदाहरन्ति ... ७

▼

## ⑤

>
▼ Bühler

7. Now they quote also (in regard to this matter the following verse):

▼ हरदत्त-टीका

## सूत्रम्⑥

अथाप्युदाहरन्ति ॥७॥

## टिप्पनी⑥

सम्बन्धिनो न भोज्या इत्यस्मिन्नर्थे धर्मज्ञा वचनमुदाहरन्ति ॥ ७ ॥

#### 08 सम्भोजनी नाम पिशाचभिक्षा

संभोजनी *(=परस्पर-धर्म-भोजनम्)* नाम पिशाच-भिक्षा
नैषा पितॄन् गच्छति नोत देवान् ।
इहैव सा चरति क्षीण-पुण्या
शालान्तरे गौर् इव नष्ट-वत्सा ८

▼

### ⑤

>
▼ Bühler

8. The food eaten (at a sacrifice) by persons related to the giver is, indeed, a gift offered to the goblins. It reaches neither the Manes nor the 9 gods. Losing its power (to procure heaven), it errs about in this world as a cow that has lost its calf runs into a strange stable.

▼ हरदत्त-टीका

## सूत्रम्⑥

सम्भोजनी नाम पिशाचभिक्षा
नैषा पितॄन् गच्छति नोऽथ देवान् ।
इहैव सा चरति क्षीणपुण्या
शालान्तरे गौरिव नष्टवत्सा ॥८॥

## टिप्पनी⑥

परस्परं भुञ्जतेऽस्यामिति सम्भोजनी । अधिकरणे ल्युट् । नामेदमस्याः पिशाचभिक्षायाः । नैषा पितॄन् गच्छति नाऽपि देवान् । किं तु क्षीणपुण्या परलोकप्रयोजनरहिता सती इहैव चरति लोके यथा गौर्मृतवत्सा गृहाभ्यन्तर एव चरति न बहिर्गच्छति तद्वदेतत् ॥८॥

#### 09 इहैव सम्भुञ्जती दक्षिणा

"इहैव संभुञ्जती दक्षिणा कुलात् कुलं विनश्यती"ति ९

▼

### ⑤

>
▼ Bühler

9. The meaning (of the verse) is, that gifts which are eaten (and offered) mutually by relations, (and thus go) from one house to the other, perish in this world.

▼ हरदत्त-टीका

## सूत्रम्⑥

इहैव सम्भुञ्जतीति दक्षिणा कुलात् कुलं विनश्यति ॥९॥

## प्रस्तावः⑥

तद्व्याचष्टे—

## टिप्पनी⑥

सम्भुञ्जती परस्परभोजनस्य निमित्तभूता दक्षिणा श्राद्धे दानक्रिया गृहात् गृहं गत्वा इहैव लोके नश्यतीत्यर्थः ॥९॥

#### 10 तुल्यगुणेषु वयोवृद्धः श्रेयान्,

तुल्य-गुणेषु वयो-वृद्धः श्रेयान्,
द्रव्य-कृशश् चेप्सन् १०

▼

## ⑤

>
▼ Bühler

10. If the good qualities (of several persons who might be invited) are equal, old men and (amongst these) poor ones, who wish to come, have the preference.

▼ हरदत्त-टीका

## सूत्रम्⑥

तुल्यगुणेषु वयोवृद्धः श्रेयान्, द्रव्यकृशश् चेप्सन् ॥ १० ॥

## प्रस्तावः⑥

अथ बहुषु तुल्यगुणेषूपस्थितेषु कः परिग्राह्यः ?

## टिप्पनी⑥

यो वयसा वृद्धस्स तावद्ग्राह्यः । तत्रापि यो द्रव्येण कृशः ईप्सन् लिप्समानश्च भवति स ग्राह्यः10 । अद्रव्यकृशोऽपि अवृद्धोऽपि, द्वयोस्तु समवाये यथारुचीति ॥ १०॥

#### 11 पूर्वेद्युर्निवेदनम्

पूर्वेद्युर् निवेदनम् ११

▼

⑤

>
▼ Bühler

11. On the day before (the ceremony) the (first) invitation (must be issued). 11

▼ हरदत्त-टीका

## सूत्रम्⑥

पूर्वेद्युर्निवेदनम् ॥ ११ ॥

## टिप्पनी⑥

श्राद्धदिनात्पूर्वेद्युरेव ब्राह्मणेभ्यो निवेदयितव्यम्-श्वः श्राद्धं भविता तत्र भवताऽऽहवनीयार्थे प्रसादः कर्तव्य इति ॥ ११ ॥

#### 12 अपरेद्युर्द्वितीयम्

अपरेद्युर् द्वितीयम् १२

▼

⑤

>
▼ Bühler

12. On the following day the second invitation takes place. 12

▼ हरदत्त-टीका

## सूत्रम्⑥

अपरेद्युर्द्वितीयम् ॥ १२ ॥

## टिप्पनी⑥

अपरेद्युः श्राद्धदिने द्वितीयं निवेदनं कर्तव्यमद्य श्राद्धमिति ॥ १२ ॥

#### 13 तृतीयमामन्त्रणम्

तृतीयम् आमन्त्रणम् *(= अगारं प्रत्यानयनम्)* १३

▼

### ⑤

>
▼ Bühler

13. (On the same day also takes place) the third invitation (which consists in the call to dinner). 13

▼ हरदत्त-टीका

## सूत्रम्⑥

तृतीयमामन्त्रणम् ॥ १३॥

## टिप्पनी⑥

आमन्त्रणमाह्वानं भोजनकाले सिद्धमागम्यतामिति तत्तृतीयं भवति ॥१३॥

#### 14 त्रिःप्रायमेके श्राद्धमुपदिशन्ति

त्रिःप्रायम् एके श्राद्धम् उपदिशन्ति ... १४

▼

### ⑤

>
▼ Bühler

14. Some declare, that every act at a funeral sacrifice must be repeated three times.

▼ हरदत्त-टीका

## सूत्रम्⑥

त्रिःप्रायमेके श्राद्धमुपदिशन्ति ॥ १४ ॥

## टिप्पनी⑥

न केवलं निवेदनमेव त्रिर्भवति । किं तर्हि यच्च यावच्च श्राद्धे तत्सर्वं त्रिरावर्त्यमित्येके मन्यन्ते । अत्र पक्षे होमभोजनपिण्डानाम् अप्यावृत्तिस् तस्मिन्न् एवा ऽपराह्णे ॥ १४ ॥

#### 15 यथा प्रथममेवन् द्वितीयन्

यथा प्रथमम्, एवं द्वितीयं, तृतीयं च १५

▼

### ⑤

>
▼ Bühler

15. As (the acts are performed) the first time, so they must be repeated) the second and the third times.

▼ हरदत्त-टीका

## सूत्रम्⑥

यथाप्रथमम् एवं द्वितीयं तृतीयं च ॥ १५ ॥

## टिप्पनी⑥

येन प्रकारेण प्रथमश्राद्धं तथैव द्वितीयं तृतीयं च कर्तव्यम् ॥ १५ ॥

#### 16 सर्वेषु वृत्तेषु सर्वतः

*(उक्तेषु त्रिषु)* सर्वेषु वृत्तेषु,
सर्वतः समवदाय
शेषस्य ग्रासावरार्ध्यं प्राश्नीयाद् यथोक्तम् १६

▼

### ⑤

>
▼ Bühler

16. When all (the three oblations) have been 14 offered, he shall take a portion of the food of all (three), and shall eat a small mouthful of the remainder in the manner described (in the Gṛhya-sūtra).

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वेषु वृत्तेषु सर्वतस् समवदाय शेषस्य ग्रासं वरार्ध्यं प्राश्नीयाद् यथोक्तम् ॥ १६ ॥

## टिप्पनी⑥

सर्वेषु श्राद्धेषु त्रिष्वपि वृत्तेषु समाप्तेषु सर्वतस्त्रयाणां श्राद्धानां य ओदनशेषस्ततस्समवदाय ग्रासवरार्ध्यं प्राश्नीयात् यथोकं गृह्ये15 'उत्तरेण यजुषा शेषस्य ग्रासवरार्ध्यं प्राश्नीया'दिति। तत्र प्रयोगः16पूर्वेद्युर्निवेदनम् । तद्वत् परेद्युः प्रातर्भोजनकाले आमन्त्रणं-सिद्धमागम्यतामिति । ततो होमादिपिण्डनिधानान्तमेकैकमपवृज्य ततः सर्वतस्समवदाय ग्रासावरार्ध्यस्य17 प्राणे निविष्टे'ति प्राशनमिति ॥ १६॥

#### 17 उदीच्यवृत्तिस्त्वासनगतानां हस्तेषूदपात्रानयनम्

उदीच्य-वृत्तिस् त्व् - आसन-गतानां हस्तेषूदपात्रानयनम् *("अर्घ्यम्" इति)* १७

▼

## ⑤

>
▼ Bühler

17. But the custom of the Northerners is to pour into the hands of the Brāhmaṇas, when they are seated on their seats, (water which has been taken from the water-vessel.) 18

▼ हरदत्त-टीका

## सूत्रम्⑥

उदीच्यवृत्तिस्त्वासनगतानां हस्तेषूदपात्रानयनम् ॥१७॥

## टिप्पनी⑥

प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥'
इति वैयाकरणाः । तस्याः शरावत्या उदक्तीरवर्तिन उदीच्याः । तेषां वृत्तिराचार आसनेषुपविष्टानां ब्राह्मणानां हस्तेषूदपात्रादर्घ्यपात्रादादायाऽर्घ्यदानमिति । 19पितरिदं तेऽर्घ्यम्, पितामहेदं तेऽर्घ्यं, प्रपितामहेदं तेऽर्घ्यमिति मन्त्रा आश्वलायनके20 । यद्यप्युदीच्यवृत्तिरित्युक्तं, तथापि प्रकरणसामर्थ्यात् सर्वेषामपि भवति ॥ १७ ॥

#### 18 उद्ध्रियतामग्नौ च क्रियतामित्यामन्त्रयते

"उद्ध्रियताम् अग्नौ च क्रियताम्"
इत्य् आमन्त्रयते १८

▼

## ⑤

>
▼ Bühler

18. (At the time of the burnt-offering which is offered at the beginning of the dinner) he addresses the Brāhmaṇas with this Mantra: 'Let it be taken out, and let it be offered in the fire.' 21

▼ हरदत्त-टीका

## सूत्रम्⑥

'उध्रियतामग्नौ च क्रियता'मित्यामन्त्रयते ॥ १८ ॥

## टिप्पनी⑥

होमकाल उद्ध्रियतामग्नौ च क्रियतामित्यनेन मन्त्रेण ब्राह्मणानामन्त्रयते । मन्त्रे22 'अधीष्टे चे'ति लोट्प्रत्ययः ॥ १८ ॥

#### 19 काममुद्ध्रियताङ् काममग्नौ क्रियतामित्यत्तिसृष्ट

> कामम् उद्ध्रियतां,
> कामम् अग्नौ क्रियताम्

इत्य् अतिसृष्ट
उद्धरेद् जुहुयाच् च १९

▼

## ⑤

>
▼ Bühler

19. (They shall give their permission with this Mantra): 'Let it be taken out at thy pleasure, let it be offered in the fire at thy pleasure.' Having received this permission, he shall take out (some of the prepared food) and offer it.

▼ हरदत्त-टीका

## सूत्रम्⑥

'काममुध्रियतां काममग्नौ च क्रियता'मित्यतिसृष्ट उद्धरेज्जुहुयाच्च ॥ १९ ॥

## टिप्पनी⑥

अथ ब्राह्मणाः काममुध्रियतां काममग्नौ च क्रियतामित्यतिसृजेयुः अनुजानीयुः । तश्चातिसृष्ट उद्धरेज्जुहुयाच्च । उद्धरणं नाम ब्राह्मणार्थं पक्वादन्नादन्यस्मिन् पात्रे पृथक्करणम् । तत्सूत्रकारेण ज्ञापितमष्टकाश्राद्धे ॥१९॥

#### 20 श्वभिरपपात्रैश्च श्राद्धस्य दर्शनम्

श्वभिर् अपपात्रैश् च
श्राद्धस्य दर्शनं परिचक्षते २०

▼

⑤

>
▼ Bühler

20. They blame it, if dogs and Apapātras are allowed to see the performance of a funeral-sacrifice.

▼ हरदत्त-टीका

## सूत्रम्⑥

श्वभिरपपात्रैश्च श्राद्धस्य दर्शनं परिचक्षते ॥ २० ॥

## टिप्पनी⑥

(श्वभिरिति बहुवचनात् ग्रामसूकरादीनां तादृशानां ग्रहणम्। ) अपपात्राः पतितादयः, प्रतिलोमादयश्च । तैः श्राद्धस्य दर्शनं परिचक्षते गर्हन्ते शिष्टाः । अतो यथा ते न पश्येयुस्तथा23परिश्रिते कर्तव्यमिति ॥२०॥

- () कुण्डलान्तर्गतो भागः घ. पुस्तके एवास्ति ।

#### 21 श्वित्रः शिपिविष्टः परतल्पगाम्यायुधीयपुत्रः

श्वित्रः *(=श्वेतकुष्टः)* शिपि-विष्टः*(=खल्वाटः)* परतल्प-गाम्य् आयुधीय-पुत्रः, शूद्रोत्पन्नो ब्राह्मण्याम्

इत्य् एते श्राद्धे भुञ्जानाः
**पङ्क्ति-दूषणा** भवन्ति २१

▼

⑤

>
▼ Bühler

21. The following persons defile the company if they are invited to a funeral-sacrifice, viz. a leper, a bald man, the violator of another man's bed, the son of a Brāhmaṇa who follows the profession of a Kṣatriya, and the son of (a Brāhmaṇa who by marrying first a Śūdra wife had himself become) a Śūdra, born from a Brāhmaṇa woman. 24

▼ हरदत्त-टीका

## सूत्रम्⑥

श्वित्रश्शिपिविष्टः परतल्पगाम्यायुधीयपुत्रश्शूद्रोत्पन्नो ब्राह्मण्यामित्येते श्राद्धे भुञ्जानाः पङ्क्तिदूषणा भवन्ति ॥ २१ ॥

## टिप्पनी⑥

25श्वित्र-श्वित्री श्वेतकुष्ठी । शिपिविष्टः खलतिः। विवृतशेफ इत्यन्ये । परतल्पगामी यः परतल्पं गत्वा अकृतप्रायश्चित्तः तस्य ग्रहणम् । आयुधीयपुत्रः क्षत्रियवृत्तिमाश्रितो य आयुधेन जीवति ब्राह्मणः, तस्य पुत्रः। शूद्रेण ब्राह्मण्यामुत्पन्नश्चण्डालः । न तस्य प्रसङ्गः । 'ब्राह्मणान् ब्रह्मविद' इत्युक्तत्वाद् । तस्मादेवं व्याख्येयम्-क्रमविवाहे यः शुद्रायां पूर्वमुत्पाद्य पश्चात् ब्राह्मण्यामुत्पादयति तस्य पुत्रः शूद्रोत्पन्नो ब्राह्मण्यामिति । स हि पिता शुद्रः सम्पन्नः । श्रूयते हि26 'तज्जाया जाया भवति यदस्यां जायते पुनरि'ति । स्मर्यते च—
27 यदुच्यते द्विजातीनां शूद्राद्दारपरिग्रहः ।
न तन्मम मतं यस्मात्तत्राऽयं जायते स्वयम् ॥' इति ।

28एते श्वित्र्यादयः श्राद्धे भुञ्जानाः पङ्क्तिं दूषयन्ति । अतस्ते न भोज्या इति ॥ २१ ॥

#### 22 त्रिमधुस्त्रिसुपर्णस्त्रिणाचिकेतश्चतुर्मेधः पञ्चाग्निर्ज्येष्ठसामगो वेदाध्याय्यनूचानपुत्रः

त्रिमधुस् त्रिसुपर्णस् त्रिणाचिकेतश् चतुर्मेधः पञ्चाग्निर् ज्येष्ठसामिको वेदाध्याय्य् अनूचानपुत्रः श्रोत्रिय इत्येते
श्राद्धे भुञ्जानाः पङ्क्ति-पावना भवन्ति २२

▼

### ⑤

>
▼ Bühler

22. The following persons sanctify the company if they eat at a funeral-sacrifice, viz. one who has studied the three verses of the Veda containing the word 'Madhu,' each three times; one who has studied the part of the Veda containing the word 'Suparṇa' three times; a Triṇāciketa; one who has studied the Mantras required for the four sacrifices (called Aśvamedha, Puruṣamedha, Sarvamedha, and Pitṛmedha); one who keeps five fires; one who knows the Sāman called Jyeṣṭha; one who fulfils the duty of daily study; the son of one who has studied and is able to teach the whole Veda with its Aṅgas, and a Śrotriya. 29

▼ हरदत्त-टीका

## सूत्रम्⑥

त्रिमधुस् त्रिसुपर्णस् त्रिणाचिकेतश् चतुर्मेधः पञ्चाग्निर् ज्येष्ठसामिको वेदाध्याय्य् अनूचानपुत्रः श्रोत्रिय इत्येते
श्राद्धे भुञ्जानाः पङ्क्तिपावना भवन्ति ॥२२॥

## टिप्पनी⑥

'मधुवाता ऋतायत' इत्येष तृचः30त्रिमधुः । तत्र हि प्रत्यृचं त्रयो मधुशब्दाः । इह तु तदध्यायी पुरुषस्त्रिमधुः । त्रिसुपर्णः 31 'चतुष्कपर्दा युवतिः सुपेशा' इत्यादिकस्तृचो बाह्वृचः । अन्ये तु तैत्तिरीयके32 ब्रह्ममेतु मा'मित्यादयः त्रयोऽनुवाका इत्याहुः । तत्र हि 'य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यादि'ति श्रूयते 'आसहस्रात् पङ्क्ति पुनन्ती'ति च । पूर्ववत्पुरुषे वृत्तिः । त्रिणाचिकेतः नाचिकेताऽग्निर्बह्वीषु शखासु विधीयते 33तैत्तिरीयके, कठवल्लीषु, शतपथे च । तं यो वेद मन्त्रबाह्मणेन सह स त्रिनाचिकेत 34नाचिकेताग्नेस्त्रिश्चेतेत्यन्ये । विरजानुवाकाध्यायीत्यन्ये, 35प्राणापानेत्यदि । चतुर्मेधः अश्वमेधः, सर्वमेधः, पुरुषमेधाः, पितृमेध, इति चत्वारो मेधाः । तदध्यायी चतुर्मेधः । चतुर्णां यज्ञानामाहर्तेत्यन्ये ।

पञ्चाग्निः सभ्यावसभ्याभ्यां सह । 36पञ्चानां काठकाग्नीनामध्येता वा ज्येष्ठसाम तलवकारिणां प्रसिद्धं उदु त्यं, चित्रमित्येतयोर्गीतम् । तद्गायतीति ज्येष्ठसमागः । ज्येष्ठसामिक इति पाठे व्रीह्यादित्वात् ठन् । वेदाध्यायी स्वाध्यायपरः । अनूचानपुत्रः त्रैविद्यपुत्रः । श्रोत्रिय इत्यपि पठन्ति । तदादरार्थं द्रष्टव्यम् । एते श्राद्धे भुञ्जानाः पङ्क्तिं शोधयन्ति । वेदाध्यायीत्यस्याऽनन्तरमितिशब्दं पठन्ति । सोऽपपाठः । एतेन पञ्चाग्नीत्यविभक्तिकपाठो व्याख्यातः ॥२२॥

#### 23 न च नक्तं

न च नक्तं श्राद्धं कुर्वीत २३

▼

### ⑤

>
▼ Bühler

23. He shall not perform (any part of) a funeral sacrifice at night. 37

▼ हरदत्त-टीका

## सूत्रम्⑥

न च नक्तं श्राद्धं कुर्वीत ॥ २३ ॥

## टिप्पनी⑥

श्राद्धकर्मण्यारब्धे कारणाद्विलम्बे मध्ये यदादित्योऽस्तमियात् तदा श्राद्धशेषं न कुर्वीत, अपरेद्युर्दिवैव कुर्वीतेति ॥ २३ ॥

#### 24 आरब्धे चाभोजनमा समापनात्

आरब्धे चाभोजनम् - आ समापनात् २४

▼

### ⑤

>
▼ Bühler

24. After having begun (a funeral-sacrifice), he shall not eat until he has finished it. 38

▼ हरदत्त-टीका

## सूत्रम्⑥

आरब्धे चाऽभोजनमासमापनात् (अन्यत्र राहुदर्शनात्) ॥ २४ ॥

## टिप्पनी⑥

पूर्वेद्युर्निवेदनप्रभृत्यापिण्डनिधानान्मध्ये कर्तुर्भोजनप्रतिषेधः ।

अनन्तरमन्यत्र राहुदर्शनादिति पठन्ति ।

'न च नक्त'मित्यस्यापवादः राहुदर्शने नक्तमपि कुर्वीतेति ।
उदीच्यास् त्व् एतत् प्रायेण न पठन्ति । तथा च पूर्वैर्न व्याख्यातम् । प्रत्युत 'न च नक्त'मित्येतत् सोमग्रहणविषयम् इति व्याख्यातम् ।

पठ्यमानं तु न च नक्तमित्यस्यानन्तरं पठितुं युक्तम् ॥२४॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने सप्तदशी कण्डिका ॥ १७ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने सप्तमः पटलः ॥७॥

#### 25 अन्यत्र राहुदर्शनात्

अन्यत्र राहु-दर्शनात् *(यदा नक्तम् अपि कुर्वीत)* २५

▼ विश्वास-टिप्पनी

"उदीच्यास् त्व् एतत् प्रायेण न पठन्ति । तथा च पूर्वैर्न व्याख्यातम् ।" इति हरदत्तः।

▼

## ⑤

>
▼ Bühler

25. (He shall not perform a funeral-sacrifice at 39 night), except if an eclipse of the moon takes place.

▼ हरदत्त-टीका

## सूत्रम्⑥

अन्यत्र राहुदर्शनात् ॥ २४ ॥

## टिप्पनी⑥

*(पूर्वसूत्रे द्रष्टव्यम्।)*

इति सप्तमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

3. Manu II, 35.↩

4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

5. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

6. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

10. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

11. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

12. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

13. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

14. Manu II, 69; Yājñ. I, 15.↩

15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

17. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

18. Manu II, 144.↩

19. आप० ध० १.३०.८.↩

20. मनु० रमृ० २.६↩

21. Manu II, 146-148.↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

24. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

25. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

26. आप० ध० १.३०.८.↩

27. मनु० रमृ० २.६↩

28. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

29. Manu II, 147.↩

30. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

31. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

32. आप० ध० १.३०.८.↩

33. मनु० रमृ० २.६↩

34. गौ० ध० १. १, २↩

35. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

36. आप० ध० १. ३१. १.↩

37. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

38. Manu II, 37.↩

39. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

**oし①**

# १८①

## 01 विलयनम् मथितम् पिण्याकम्④

विलयनं *(=नवनीत-मलम्)*, मथितं, पिण्याकं, *(=तैलोत्पादनावशेषः)* मधु, मांसं च वर्जयेत् १

▼

### ⑤

>
▼ Bühler

1. He shall avoid butter, butter-milk, oil-cake, honey, meat. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

विलयनं मथितं पिण्याकं मधु मांसं च वर्जयेत् ॥ १ ॥

## टिप्पनी⑥

विलयनं नवनीतमलम् । यस्य दध्नो हस्तादिना मन्थनमात्रं न जलेन मिश्रणं तन्मथितम् । तथा च नैघण्टुकाः—
2 तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलमिति।
यन्त्रपीडितानां तिलानां कल्कः पिण्याकम् । मधुमासे प्रसिद्धे मांसमप्रतिषिद्धमपि । एतद्विलयनादिकं वर्जयेत् ॥ १ ॥

#### 02 कृष्णधान्यं शूद्रान्नं ये

कृष्ण-धान्यं, शूद्रान्नं, ये चान्ये नाश्य-संमताः २

▼

### ⑤

>
▼ Bühler

2. And black grain (Such as kulittha), food given by Śūdras, or by other persons, whose food is not considered fit to be eaten.

▼ हरदत्त-टीका

## सूत्रम्⑥

कृष्णधान्यं शूद्रान्नं ये चान्येऽनाश्यसम्मताः ॥ २ ॥

## टिप्पनी⑥

कृष्णधान्य3माषादिः । न कृष्णा व्रीहयः । शूद्रान्न पक्वमपक्वं च। ये चान्येऽनाश्यत्वेनाभोज्यत्वेन सम्मताः तांश्च वर्जयेत् ॥ २ ॥

#### 03 अहविष्यमनृतङ् क्रोधं येन

अहविष्यम्, अनृतं, क्रोधं,
येन च क्रोधयेत् ।
स्मृतिम् इच्छन् यशो मेधां स्वर्गं पुष्टिं द्वादशैतानि *(प्राक्तनसूत्रोक्त-सहितानि)* वर्जयेत् ३

▼

## ⑤

>
▼ Bühler

3. And food unfit for oblations, speaking an untruth, anger, and (acts or words) by which he might excite anger. He who desires a (good) memory, fame, wisdom, heavenly bliss, and prosperity, shall avoid these twelve (things and acts);

▼ हरदत्त-टीका

## सूत्रम्⑥

4अहविष्यमनृतं क्रोधं येन च क्रोधयेत् ॥ ३॥

## टिप्पनी⑥

अहविष्य कोद्रवादि । अनृतं मिथ्यावचनम् । क्रोधः कोपः येन च कृतेनोक्तेन वा परं क्रोधयेत्, तच्च वर्जयेत् ॥३॥

## सूत्रम्⑥

स्मृतिमिच्छन् यशो मेधां स्वर्गं पुष्टिं द्वादशैतानि वर्जयेत् ॥ ४ ॥

## टिप्पनी⑥

स्मृतिरधिगतस्य स्मरणम् । यशः ख्यातिः । मेधा प्रज्ञा । द्वादशैतानि विलयनादीनि वर्जयेत् स्मृत्यादिकमिच्छन् । पुनर्वर्जयेदिति गुणार्थोऽनुवादः स्मृत्यादिकं फलं विधातुम् । द्वादशैतानीति वचनं विलयनादेरपि परिग्रहार्थम्, अहविष्यादिकमेवानन्तरोक्तं मा ग्राहीदिति ॥४॥

#### 04 अधोनाभ्युपरिजान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्न् अनग्निपक्ववृत्तिरच्छायोपगः

अधो-नाभ्य्--उपरि-जान्व्-आच्छाद्य त्रि-षवणम् उदकम् उपस्पृशन्न्
अनग्नि-पक्व-वृत्तिर् अच्छायोपगः स्थानासनिकः संवत्सरम् एतद् व्रतं चरेत् ।
एतद् अष्टा-चत्वारिंशत् संमितम् इत्य् आचक्षते ४

▼

### ⑤

>
▼ Bühler

4. Wearing a dress that reaches from the navel to the knees, bathing morning, noon, and evening, living on food that has not been cooked at a fire, never seeking the shade, standing (during the day), and sitting (during the night), he shall keep this vow for one year. They declare, that (its merit) is equal to that of a studentship continued for forty-eight years.

▼ हरदत्त-टीका

## सूत्रम्⑥

अधोनाभ्युपरि जान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्ननग्निपक्ववृत्तिरच्छायोपगतस्थानासनिकस्संवत्सरमेतद्व्रतं चरेदेतदष्टाचत्वारिंशत्सम्मितमित्याचक्षते ॥ ५॥

## टिप्पनी⑥

अधोनाभ्युपरि जान्वाच्छाद्येति व्याख्यातम् (१.२४.११) त्रिषवणं त्रिषु सवनेषु प्रातर्मध्यन्दिने सायमिति उदकमुपस्पृशन् स्नानं कुर्वन् । अनग्निपक्ववृत्तिः, वृत्तिः शरीरयात्रा, सा अग्निपक्वेन न कार्या । अग्निग्रहणात् कालपक्वस्याऽऽम्रादेरदोषः । अच्छायोपगतः छायामनुपगच्छन् । स्थानासनिकः स्थानासनवान् । दिवास्थानं रात्रावासनं न कदाचिच्छयनम् । एतत् 'विलयनं मथित'मित्यारभ्याऽनन्तरमुक्तं संवत्सरं व्रतं चरेत् । एतद्व्रतमष्टाचत्वारिंशद्वर्षसाध्येन ब्रह्मचारिव्रतेन सम्मितं सदृशं यावत्तस्य फलं तावदस्यापीत्याचक्षते धर्मज्ञाः । न केवलं स्मृत्यादिकमेव प्रयोजनमिति।
अपर आह- 'विलयनं मथित'मित्यादिकं व्रतान्तरं स्मृत्यादिकामस्य। 'अधोनाभी'त्यादिकं तु सम्मितं व्रतमिति । एतच्च ब्रह्मचारिणो गृहस्थस्य च भवति ।
तथा च बौधायनः 5 'अष्टाचत्वारिंशत्सम्मितमित्याचक्षते तस्य सक्षेपः संवत्सरः। तं संवत्सरमनुव्याख्यास्यामः-स यदि ब्रह्मचारी स्यान्नियमेव प्रतिपद्येत । अथ यद्यपि ब्रह्मचारी स्यात् केशाश्मश्रुलोमनखानि वापयित्वा तीर्थं गत्वा स्नात्वे'त्यादि ॥ ५ ॥

#### 05 नित्यश्राद्धम्

नित्य-श्राद्धम् ५

▼

### ⑤

>
▼ Bühler

5. (Now follows) the daily funeral-oblation. 6

▼ हरदत्त-टीका

## सूत्रम्⑥

नित्यश्राद्धम् ॥ ६॥

## टिप्पनी⑥

अथाऽहरहः कर्तव्यं श्राद्धमुच्यते । तस्य नित्यश्राद्धमिति नाम ॥ ६ ॥

#### 06 बहिर्ग्रामाच्छुचयः शुचौ देशे

बहिर्ग्रामाच् छुचयः शुचौ देशे संस्कुर्वन्ति ६

▼

## ⑤

>
▼ Bühler

6. Outside the village pure (men shall) prepare (the food for that rite) in a pure place. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

बहिर्ग्रामाच्छुचयः शुचौ देशे संस्कुर्वन्ति ॥ ७॥

## टिप्पनी⑥

तन्नित्यश्राद्धं बहिर्ग्रामात्कर्तव्यं तस्याऽन्नसंस्कारः शुचौ देशे अन्नं संस्कुर्वन्ति । शुचय इति वचनमाधिक्यार्थम् । आर्याः प्रयता इति पूर्व मेव प्रायत्यस्य विहितत्वात् ॥ ७॥

#### 07 तत्र नवानि द्रव्याणि

तत्र नवानि द्रव्याणि *(=वक्ष्यमाणानि भाण्डादीनि)* ७

▼

## ⑤

>
▼ Bühler

7. New vessels are, used for that, 8

▼ हरदत्त-टीका

## सूत्रम्⑥

तत्र नवानि द्रव्याणि ॥ ८ ॥

## टिप्पनी⑥

तत्र नित्यश्राद्धे द्रव्याणि नवान्येव ग्राह्याणि ॥ ८॥

#### 08 यैरन्नं संस्क्रियते येषु

यैर् अन्नं संस्क्रियते येषु च भुज्यते ८

▼

## ⑤

>

▼ Bühler

8. In which the food is prepared, and out of which it is eaten.

▼ हरदत्त-टीका

## सूत्रम्⑥

यैरन्नं संस्क्रियते येषु च भुज्यते ॥९॥

## प्रस्तावः⑥

कानि पुनस्तानि ?

## टिप्पनी⑥

यैर्भाण्डैरत्नं संस्क्रियते येषु च कांस्यादिषु भुज्यते तानि नवानीति ॥९॥

#### 09 तानि च भुक्तवद्भ्यो

तानि च भुक्तवद्भ्यो दद्यात् ९

▼

⑤

>
▼ Bühler

9. And those (vessels) he shall present to the (Brāhmaṇas) who have been fed.

▼ हरदत्त-टीका

## सूत्रम्⑥

तानि च भुक्तवद्भ्यो दद्यात् ॥ १० ॥

## टिप्पनी⑥

तानि भाण्डानि कांस्यादीनि च भुक्तवद्भ्यो ब्राह्मणेभ्यो दद्यात् । एवं प्रत्यहम् ॥१०॥

#### 10 समुदेतांश्च भोजयेत्

समुदेतांश् च भोजयेत् १०

▼

⑤

>
▼ Bühler

10. And he shall feed (Brāhmaṇas) possessed of all (good qualities).

▼ हरदत्त-टीका

## सूत्रम्⑥

समुदेतांश्च भोजयेत् ॥ ११ ॥

## टिप्पनी⑥

समुदेतवचनं गुणाधिक्यार्थम् ॥ ११ ॥

#### 11 न चातद्गुणायोच्छिष्टम् प्रयच्छेत्

न चातद्गुणायोच्छिष्टं प्रयच्छेत् ११

▼

⑤

>
▼ Bühler

11. And he shall hot give the residue (of that funeral-dinner) to one who is inferior to them in good qualities.

▼ हरदत्त-टीका

## सूत्रम्⑥

न चाऽतद्गुणायोच्छिष्टं प्रयच्छेत् ॥ १२ ॥

## टिप्पनी⑥

भाण्डेषु यत भुक्तशिष्टं तदिहोच्छिष्टम् । तदप्यतद्गुणाय भुक्तवतां ये गुणास्तद्रहिताय न दद्यात् तद्गुणायैव दद्यादिति9 ॥ १२ ॥

#### 12 एवं संवत्सरम्

एवं संवत्सरम् १२

▼

⑤

>
▼ Bühler

12. Thus (he shall act every day) during a year.

▼ हरदत्त-टीका

## सूत्रम्⑥

एवं संवत्सरम् ॥ १३ ॥

## टिप्पनी⑥

एवमेतन्नित्यश्राद्धं सवत्सरं कर्तव्यमहरहः ॥ १३ ॥

#### 13 तेषामुत्तमं लोहेनाजेन कार्यम्

तेषाम् उत्तमं लोहेनाजेन कार्यम् १३

▼

### ⑤

>
▼ Bühler

13. The last of these (funeral-oblations) he shall perform, offering a red goat. 10

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषामुत्तमं लोहेनाजेन कार्यम् ॥ १४ ॥

## टिप्पनी⑥

तेषां संवत्सरस्याऽह्नां उत्तममहस्समाप्तिदिनम् । लोहेन लोहितवर्णन अजेन श्राद्धं कर्तव्यम् । दृश्यते चाप्यन्यत्राऽस्मिन्नर्थे लोहशब्दः-11 'लोहस्तूपरो भवत्यप्यतूपरः कृष्णसारङ्गो लोहितसारङ्गो वेति । चमकेषु च भवति 12 'श्यामं च मे लोहं च म' इति ॥ १४ ॥

#### 14 मानञ् च कारयेत्प्रतिच्छन्नम्

मानं *(=वेदीं)* च कारयेत् प्रतिच्छन्नम् १४

▼

### ⑤

>
▼ Bühler

14. And let him cause an altar to be built, concealed (by a covering and outside the village).

▼ हरदत्त-टीका

## सूत्रम्⑥

मानं च कारयेत्प्रतिच्छन्नम् ॥ १५ ॥

## टिप्पनी⑥

मानं धिष्ण्वं वेदिका । दृश्यते हि मिनोतेरस्मिन्नर्थे प्रयोगः अग्रेणाऽऽग्नीध्रं चतुर उपस्नावं विमितं विमिन्वन्ति पुरस्तादुन्नतं पश्चान्निनुतमि'ति । स एवायमुपसर्गरहितस्य प्रयोगः । तं मानं कारयेत् कर्मकरैः, प्रतिच्छन्नं च तद्भवति तिरस्करिण्यादिना । इदमपि ग्रामाद्बहिरेव ॥

#### 15 तस्योत्तरार्धे ब्राह्मणान्भोजयेत्

तस्योत्तरार्धे ब्राह्मणान्भोजयेत् १५

▼

### ⑤

>
▼ Bühler

15. Let him feed the Brāhmaṇas on the northern half of that.

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्योत्तरार्धे ब्राह्मणान् भोजयेत् ॥ १६ ॥

## टिप्पनी⑥

तस्य मानस्योत्तरस्मिन्नर्धे ब्राह्मणा भोजयितव्याः ॥ १६ ॥

#### 16 उभयान्पश्यति ब्राह्मणांश्च भुञ्जानान्माने

> उभयान् पश्यति - ब्राह्मणांश् च भुञ्जानान्, माने च पितॄन्

इत्य् उपदिशन्ति १६

▼

### ⑤

>
▼ Bühler

16. They declare, that (then) he sees both the Brāhmaṇas who eat and the Manes sitting on the altar.

▼ हरदत्त-टीका

## सूत्रम्⑥

उभयान्पश्यति ब्राह्मणांश्च भुञ्जानान् माने च पितॄन्नित्युपदिशन्ति ॥१७॥

## टिप्पनी⑥

तस्यैवं कृतस्य कर्मणो महिम्ना उभयान् पश्यति, कांश्च कांश्च ब्राह्मणान्भुञ्जानान् तस्मिन्नेव च माने पितॄन् यथा ब्राह्मणान् भुजानान् प्रत्यक्षेण पश्यति तथा माने समागतान् पितॄनपि प्रत्यक्षेण पश्यतीत्युपदिशन्ति धर्मज्ञाः ॥ १७॥

#### 17 कृताकृतमत ऊर्ध्वम्

कृताकृतम् अत ऊर्ध्वम् १७

▼

⑤

>
▼ Bühler

17. After that he may offer (a funeral-sacrifice once a month) or stop altogether.

▼ हरदत्त-टीका

## सूत्रम्⑥

कृताकृनम् अत ऊर्ध्वम् ॥ १८ ॥

## टिप्पनी⑥

अत ऊर्ध्वं मासिश्राद्धं क्रियताम्, मा वा कारि । अकरणेऽपि न प्रत्यवाय इति ॥ १८॥

#### 18 श्राद्धेन हि तृप्तिं

श्राद्धेन हि तृप्तिं वेदयन्ते पितरः १८

▼

⑤

>
▼ Bühler

18. For (by appearing on the altar) the Manes signify that they are satisfied by the funeral offering.

▼ हरदत्त-टीका

## सूत्रम्⑥

श्राद्धेन तृप्तिं निवेदयन्ते पितरः ॥ १९ ॥

## टिप्पनी⑥

हि यस्मादन्त्येऽहनि यद्दर्शनमुपगच्छन्ति, तच्छ्राद्धेन तृप्तिं हि वेदयन्ते ज्ञापयन्ति कर्तारम् । तस्मात् तत् कृताकृतमिति ॥ १९ ॥

#### 19 तिष्येण पुष्टिकामः

तिष्येण पुष्टि-कामः १९

▼

## ⑤

>
▼ Bühler

19. Under the constellation Tiṣya he who desires prosperity,

▼ हरदत्त-टीका

## सूत्रम्⑥

तिष्येण पुष्टिकामः ॥ २० ॥

## प्रस्तावः⑥

अथ पुष्टिकामस्य प्रयोगस्तिष्येणेत्यादिरुच्छिष्टं दद्युरित्यन्त एकः ।

## टिप्पनी⑥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्नेऽष्टादशी कण्डिका ॥ १८ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

7. Manu II, 35.↩

8. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

# १९①

## 01 गौरसर्षपाणाञ् चूर्णानि कारयित्वा④

गौर-सर्षपाणां चूर्णानि कारयित्वा
तैः पाणि-पादं प्रक्षाल्य
मुखं कर्णौ प्राश्य च
यद्-वातो नातिवाति तद्-आसनो
ऽजिनं बस्तस्य *(=अजस्य)* प्रथमः कल्पो
वाग्यतो दक्षिणा-मुखो भुञ्जीत १

▼

### ⑤

>
▼ Bühler

1. Shall cause to be prepared powder of white mustard-seeds, cause his hands, feet, ears, and mouth to be rubbed with that, and shall eat (the remainder). If the wind does not blow too violently, he shall eat sitting, silent and his face turned towards the south, on a seat (facing the) same (direction)the first alternative is the skin of a he-goat. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

गौरसर्षपाणां चूर्णानि कारयित्वा तैः पाणिपादं प्रक्षाल्य मुखं कर्णौ प्राश्य च यद्वातो नातिवाति तदा सनोऽजिनं वस्तस्य प्रथमः कल्पो वाग्यतो दक्षिणामुखो भुञ्जीत ॥ १॥

## टिप्पनी⑥

पुष्टिकामः पुरुषो वक्ष्यमाणं प्रयोगं कुर्यात् । तिष्येण2 "नक्षत्रे च लुपी"त्यधिकरणे तृतीया । तिष्ये नक्षत्रे गौराणां सर्षपाणां चूर्णानि कर्मकरैः कारयेत् । कारयित्वा तच्चूर्णैः पाणी पादौ प्रक्षाल्य मुखं कर्णौ च प्रक्षाल्य चूर्णशेषं प्राश्नीयात् । प्रास्येदिति पाठे प्रास्येत् विकिरेत् । एतावत् प्रतितिष्यं विशेषकृत्यम् । परं तु प्रत्यहं कर्तव्यम् । प्राश्य च यदासनं वातो नातिवाति अधो नातीत्य वाति तदासनस्तादृशासनः भुञ्जीतेति वक्ष्यमाणेन सम्बन्धः। तत्र वस्ताजिनमासनं स्यादिति मुख्य कल्पः । वाग्यतो दक्षिणां दिशमभिमुखो भुञ्जीत ॥ १॥

#### 02 अनायुष्यन् त्वेवम्मुखस्य भोजनम्

> अनायुष्यं त्व् एवं-मुखस्य भोजनं मातुर्

इत्य् उपदिशन्ति *(येन जीवन्-मातृको नैतत् कुर्यात्)* २

▼

### ⑤

>
▼ Bühler

2. But they declare, that the life of the mother of that person who eats at this ceremony, his face turned in that direction, will be shortened. 3

▼ हरदत्त-टीका

## सूत्रम्⑥

अनायुष्यं त्वैवंमुखस्य भोजनं मातुरित्युपदिशन्ति ॥२॥

## टिप्पनी⑥

यदेवंमुखस्य दक्षिणामुखस्य भोजनं तत् भोक्तुर्या माता तस्या अनायुष्यमनायुष्यकरमिति धर्मज्ञा उपदिशन्ति । तस्मान्मातृमता नैतद्व्रतं कार्यमिति ॥२॥

#### 03 औदुम्बरश्चमसः सुवर्णनाभः प्रशास्तः

औदुम्बरश् चमसः सुवर्ण-नाभः प्रशास्तः ३

▼

## ⑤

>
▼ Bühler

3. A vessel of brass, the centre of which is gilt, is best (for this occasion).

▼ हरदत्त-टीका

## सूत्रम्⑥

औदुम्बरश्चमसः सुवर्णनाभः प्रशास्तः ॥३॥

## टिप्पनी⑥

चमु भक्षणे । यत्र चम्यते स चमसो भोजनपात्रम् । औदुम्बरस्ताम्रमयः सुवर्णेन मध्येऽलंकृतस्स प्रशास्तः प्रशस्तो भोजने ॥३॥

#### 04 न चान्येनापि भोक्तव्यः

न चान्येनापि भोक्तव्यः ४

▼

⑤

>
▼ Bühler

4. And nobody else shall eat out of that vessel. 4

▼ हरदत्त-टीका

## सूत्रम्⑥

नचाऽन्येनाऽपि भोक्तव्यम् ॥ ४ ॥

## टिप्पनी⑥

नचान्येनापि कर्तुः पित्रापि तत्र पात्रे भोक्तव्यम् । अपिर्धात्वार्थानुवादी । भोक्तव्य इति पुंलिङ्गपाठेऽप्येष एवार्थः ॥ ४ ॥

#### 05 यावद्ग्रासं सन्नयन्

यावद्-ग्रासं संनयन् ५

▼

⑤

>
▼ Bühler

5. He shall make a lump of as much (food) as he can swallow (at once). 5

▼ हरदत्त-टीका

## सूत्रम्⑥

यावद्ग्रासं सन्नयन्

## टिप्पनी⑥

*(अग्रे व्याख्यातम्।)*

#### 06 अस्कन्दयन्

अस्कन्दयन् ६

▼

## ⑤

>
▼ Bühler

6. (And he shall) not scatter anything (on the ground).

▼ हरदत्त-टीका

## सूत्रम्⑥

अस्कन्दयन् ॥ ६ ॥

## टिप्पनी⑥

*(अग्रे व्याख्यातम्।)*

#### 07 नापजहीत

नापजहीत *(सव्य-पाणिना पात्रम्)* [७]

▼

## ⑤

>
▼ Bühler

7. He shall not let go the vessel (with his left hand);

▼ हरदत्त-टीका

## सूत्रम्⑥

नापजहीत *(=सव्यपाणिना न विमुञ्चेत्)* [७]

## टिप्पनी⑥

*(अग्रे व्याख्यातम्।)*

#### 08 अपजहीत वा

अपजहीत वा *(प्राणाहुत्य्-ऊर्ध्वम्)*[८]

▼

## ⑤

>
▼ Bühler

8. Or he may let it go. 6

▼ हरदत्त-टीका

## सूत्रम्⑥

अपजहीत वा ८

## टिप्पनी⑥

*(अग्रे व्याख्यातम्।)*

#### 09 कृत्स्नङ् ग्रासङ् ग्रसीत

कृत्स्नं ग्रासं ग्रसीत सहाङ्गुष्ठम् ९

▼

## ⑤

>
▼ Bühler

9. He shall swallow the whole mouthful at once, introducing it, together with the thumb, (into the mouth.)

▼ हरदत्त-टीका

## सूत्रम्⑥

कृत्स्नं ग्रासं ग्रसीत सहाङ्गुष्ठम् ९

## टिप्पनी⑥

यावदेव सकृत् ग्रसितुं शक्यं तावदेव सन्नयन् पिण्डीकुर्वन् । अस्कन्दयन् भूमावन्नलेपानपातयन् कृत्स्नं ग्रासं ग्रसीतेन्यन्वयः । सहाङ्गुष्ठम् आस्येऽपि ग्रासप्रवेशे यथाङगुष्ठोऽप्यनुप्रविशति तथा सर्वानेव ग्रासानुक्तेन प्रकारेण ग्रसति ग्रसतो मध्ये क्रियान्तरविधिः-नाऽपजिहीत भोजन पात्रं सव्येन

पाणिना न विमुञ्चेत् । अपजिहीत वा विमुञ्चेद्वा । किमर्थमिदम् यावता न प्रकारान्तरं सम्भवति, सत्यं, 'प्रक्रमात्तु नियम्यत' इति न्यायेन य एव प्रकारः प्रथमे भोजने स एवाऽऽन्तादनुष्ठातव्य इत्येवर्थमिदम् ॥ ५॥

#### 10 न च मुखशब्दङ्

न च मुख-शब्दं कुर्यात् १०

▼

⑤

>
▼ Bühler

10. He shall make no noise with his mouth (whilst eating).

▼ हरदत्त-टीका

## सूत्रम्⑥

न च मुखशब्दं कुर्यात् ॥ ६ ॥

## टिप्पनी⑥

भोजनदशायामिदम् । एवमुत्तरम् ॥ ६॥

#### 11 पाणिञ् च नावधूनुयात्

पाणिं च नावधूनुयात् ११

▼

⑤

>
▼ Bühler

11. And he shall not shake his right hand (whilst eating).

▼ हरदत्त-टीका

## सूत्रम्⑥

पाणिं च नाऽवधूनुयात् ॥ ७ ॥

## टिप्पनी⑥

पाणिरत्र दक्षिणः ॥७॥

#### 12 आचम्य चोर्ध्वौ पाणी

आचम्य चोर्ध्वौ पाणी धारयेद् आ प्रोदकी-भावात् *(=शुष्कभावात्)* १२

▼

### ⑤

>

▼ Bühler

12. After he (has eaten and) sipped water, he shall raise his hands, until the water has run off (and they have become dry).

▼ हरदत्त-टीका

## सूत्रम्⑥

आचम्य चोर्ध्वौ पाणी धारयेदाप्रोदकीभावात् ॥ ८॥

## टिप्पनी⑥

भुक्त्वाऽऽचम्य पाणी ऊर्ध्वौ धारयेत् यावत् प्रगतोदकौ शुष्कोदकौ भवतः ॥ ८॥

#### 13 ततो ऽग्निमुपस्पृशेत्

ततो ऽग्निम् उपस्पृशेत् १३

▼

### ⑤

>

▼ Bühler

13. After that he shall touch fire.

▼ हरदत्त-टीका

## सूत्रम्⑥

ततोऽग्निमुपस्पृशेत् ॥ ९ ॥

## टिप्पनी⑥

भुक्त्वा नियमेनाग्निरुपस्प्रष्टव्यः ॥ ९॥

#### 14 दिवा च न

दिवा च न भुञ्जीतान्यन् मूलफलेभ्यः १४

▼

## ⑤

>
▼ Bühler

14. And (during this ceremony) he shall not eat in the day-time anything but roots and fruit.

▼ हरदत्त-टीका

## सूत्रम्⑥

दिवाच न भुञ्जीताऽन्यन्मूलफलेभ्यः ॥ १० ॥

## टिप्पनी⑥

मूलानि कन्दाः । फलान्याम्रादीनि । तेभ्योऽन्यद्दिवा न भुञ्जीत । तद्भक्षणे न दोषः ॥ १०॥

#### 15 स्थालीपाकानुदेश्यानि च वर्जयेत्

स्थालीपाक*(दान-)*+अनुदेश्यानि *(=देवपितृभ्यः सङ्कल्पितानि)* च वर्जयेत् १५

▼

## ⑤

>
▼ Bühler

15. And let him avoid Sthālīpāka-offerings, and food offered to the Manes or to the Gods.

▼ हरदत्त-टीका

## सूत्रम्⑥

स्थालीपाकानुदेश्यानि च वर्जयेत् ॥ ११ ॥

## टिप्पनी⑥

7'तेन सर्पिष्मता ब्राह्मणं भोजये'दित्यादौ ब्राह्मणो भूत्वा न भुञ्जीत अनुदेश्यानि च पितृभ्यो देवताभ्यश्च सङ्कलिपनानि च न भुञ्जीत ॥११॥

१. आप०गृ० ७. १५.

#### 16 सोत्तराच्छादनश्चैव यज्ञोपवीती भुञ्जीत

सोत्तराच्छादनश् चैव यज्ञोपवीती *(=उत्तरीयं यज्ञोपवीतवत् कृत्वा)* भुञ्जीत १६

▼

## ⑤

>
▼ Bühler

16. He shall eat wearing his upper garment over his left shoulder and under his right arm. 8

▼ हरदत्त-टीका

## सूत्रम्⑥

सोत्तराच्छादनश्चैव यज्ञोपवीती भुञ्जीत ॥ १२ ॥

## टिप्पनी⑥

उत्तराच्छादनमुपरिवासः । तेन यज्ञोपवीतेन यज्ञोपवीतं कृत्वा भुञ्जीत । नाऽस्य भोजने "अपि वा सूत्रमेवोपवीतार्थ" इत्ययं कल्पो भवतीत्येके । समुच्चय इत्यन्ये ॥ १२ ॥

#### 17 नैय्यमिकन् तु श्राद्धं

नैय्यमिकं *(→मासि मासि क्रियमाणं)* तु श्राद्धं स्नेहवद्
एव दद्यात् १७

▼

## ⑤

>
▼ Bühler

17. At the (monthly) Śrāddha which must necessarily be performed, he must use (food) mixed with fat.

▼ हरदत्त-टीका

## सूत्रम्⑥

नैयमिकं तु श्राद्धं स्नेहवदेव दद्यात् ॥ १३ ॥

## टिप्पनी⑥

यन्नियमेन कर्तव्यं मासि श्राद्धं, तत् स्नेहद्रव्ययुक्तमेव दद्यात् । न शुष्कम् ॥ १३ ॥

#### 18 सर्पिर्मांसमिति प्रथमः कल्पः

सर्पिर् मांसम् इति प्रथमः कल्पः १८

▼

## ⑤

>
▼ Bühler

18. The first (and preferable) alternative (is to employ) clarified butter and meat.

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्पिर्मांसमिति प्रथमः कल्पः ॥ १४ ॥

## प्रस्तावः⑥

तत्र विशेषः—

## टिप्पनी⑥

स्पष्टम् ॥ १४ ॥

#### 19 अभावे तैलं शाकमिति

अभावे तैलं शाकम् इति १९

▼

## ⑤

>
▼ Bühler

19. On failure (of these), oil of sesamum, vegetables, and (similar materials may be used).

▼ हरदत्त-टीका

## सूत्रम्⑥

अभावे तैलं शाकमिति ॥ १५ ॥

## टिप्पनी⑥

सर्पिषोऽभावे तैलं मांसस्याऽभावे शाकम् । इतिशब्दाद्यच्चान्यदेवं युक्तम् ॥ १५ ॥

#### 20 मघासु चाधिकं श्राद्धकल्पेन

मघासु चाधिकं श्राद्ध-कल्पेन
सर्पिर् ब्राह्मणान् भोजयेत् २०

▼

## ⑤

>
▼ Bühler

20. And under the asterism Maghā he shall feed the Brāhmaṇas more (than at other times) with (food mixed with) clarified butter, according to the rule of the Śrāddha.

▼ हरदत्त-टीका

## सूत्रम्⑥

मघासु चाधिकं श्राद्धकल्पेन सर्पिर् ब्राह्मणान् भोजयेत् ॥१६॥

## टिप्पनी⑥

मघासु पूर्वपक्षेऽपि श्राद्धविधानेन सर्पिर्मिश्रमन्नं ब्राह्मणान् भोजयेत् ॥१६॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकोनविंशी काण्डिका ॥ १९ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

4. Manu II, 35.↩

5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

6. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

# २०①

## 01 मासिश्राद्धे तिलानान् द्रोणन्④

मासि-श्राद्धे
तिलानां द्रोणं द्रोणं येनोपायेन *(= अभ्यङ्ग-पाकादौ)* शक्नुयात्
तेनोपयोजयेत् १

▼

### ⑤

>
▼ Bühler

1. At every monthly Śrāddha he shall use, in whatever manner he may be able, one droṇa of sesamum. 1

▼ हरदत्त-टीका

## सूत्रम्⑥

मासि श्राद्धे तिलानां द्रोणंद्रोणं येनोपायेन शक्नुयात् तेनोपयोजयेत् ॥ १॥

## टिप्पनी⑥

येनोपायेनोपयोजयितुं शक्नुयात् अभ्यङ्गे, उद्वर्तने, भक्ष्ये, भोज्ये चेति तेनोपायेन मासिश्राद्धे तिलानां द्रोणं द्रोणमुपयोजयेत् । तत्रैकैकस्य ब्राह्मणस्य तिलानां द्रोणं द्रोणमुपयोजयितुमशक्यत्वात् समुदितानुपयोजयेत् । द्रोणंद्रोणमिति वीप्सावचनं तु प्रतिमासिश्राद्धमुपयोजनार्थमिति केचित् । अन्ये तु एवंभूताः प्रबलाः प्रयत्नेनान्विष्य भोजयितव्या इति ॥ १ ॥

#### 02 समुदेतांश्च भोजयेन्न चातद्गुणायोच्छिष्टन्

समुदेतांश्च भोजयेन्, न चातद्गुणायोच्छिष्टं दद्युः २

▼

### ⑤

>
▼ Bühler

2. And he shall feed Brāhmaṇas endowed with all (good qualities), and they shall not give the fragments (of the food) to a person who does not possess the same good qualities (as the Brāhmaṇas).

▼ हरदत्त-टीका

## सूत्रम्⑥

समुदेतांश्च भोजयेन्न चाऽतद्गुणायोच्छिष्टं दद्युः ॥२॥

## टिप्पनी⑥

व्याख्यातमिदम् । दद्युरिति बहुवचनं तथाविधकर्तृबहुत्वापेक्षम् । वचनव्यत्ययो वा ॥२॥

#### 03 उदगयन आपूर्यमाणपक्षस्यैकरात्रमवरार्ध्यमुपोष्य तिष्येण

उदगयन आपूर्यमाण-पक्षस्यैकरात्रम् अवरार्ध्यम् उपोष्य
तिष्येण पुष्टिकामः स्थालीपाकं श्रपयित्वा
महाराजम्*(=कुबेरम्)* इष्ट्वा
तेन सर्पिष्मता ब्राह्मणं भोजयित्वा
पुष्ट्य्-अर्थेन सिद्धिं वाचयीत ३

▼

## ⑤

>
▼ Bühler

3. He who desires prosperity shall fast in the half of the year when the sun goes to the north, under the constellation Tiṣya, in the first half of the month, for (a day and) a night at least, prepare a Sthālīpāka-offering, offer burnt-oblations to Kubera (the god of riches), feed a Brāhmaṇa with that (food prepared for the Sthālīpāka) mixed with clarified butter, and make him wish prosperity with (a Mantra) implying prosperity. 2

▼ हरदत्त-टीका

## सूत्रम्⑥

उदगयन आपूर्यमाणपक्षस्यैकरात्रमवरार्ध्यमुपोष्य तिष्येण पुष्टिकामः स्थालीपाकं श्रपयित्वा महाराजमिष्ट्वा तेन सर्पिष्मता ब्राह्मणं भोजयित्वा पुष्ट्यर्थेन सिद्धिं वाचयीत ॥३॥

## प्रस्तावः⑥

अथ पुष्टिकामस्यैवाऽपरः प्रयोग आ पटलसमाप्तेः —

## टिप्पनी⑥

पुष्टिकामः पुरुष एकरात्रावरमुपवासं कृत्वा उदगयनं आपूर्यमाणपक्षस्य पूर्वपक्षस्य सम्बन्धिना तिष्येण तस्मिन्नक्षत्रे स्थालीपाकं श्रपयित्वा 3महाराजं वैश्रवणं यजेत । आज्यभागान्ते महाराजाय स्वाहेति प्रधानहोमः । स्विष्टकृदादिजयादयः । परिषेचनान्ते तेन सर्पिष्मता स्थालीपाकेन ब्राह्मणं भोजयेत् । उत्तरविवक्षयेदं वचनम् । भोजयित्वा सिद्धिं वाचयीत पुष्टिरस्त्विति ॥ ३ ॥

#### 04 एवमहरहरा परस्मात्तिष्यात्

एवम् अहर् अहर् आ परस्मात् तिष्यात् ४

▼

### ⑤

>
▼ Bühler

4. This (rite he shall repeat) daily until the next Tiṣya(-day).

▼ हरदत्त-टीका

## सूत्रम्⑥

एवमहरहरापरस्मात्तिष्यात् ॥ ४॥

## टिप्पनी⑥

एवमिदं स्थालीपाकश्रपणादिसिद्धिवाचनान्तमहरहः कर्तव्यमापरस्मातिष्यात् यावदपरस्तिष्य आगच्छति ॥ ४ ॥

#### 05 द्वौ द्वितीये

द्वौ द्वितीये ५

▼

### ⑤

>
▼ Bühler

5. On the second (Tiṣya-day and during the second month he shall feed) two (Brāhmaṇas).

▼ हरदत्त-टीका

## सूत्रम्⑥

द्वौ द्वितीये ॥ ५ ॥

## टिप्पनी⑥

द्वितीये तिष्ये प्राप्ते द्वौ भोजयेत् । अन्यत्समानम् । एवमातृतीयात् ॥५॥

#### 06 त्रींस्तृतीये

त्रींस्तृतीये ६

▼

## ⑤

>
▼ Bühler

6. On the third (Tiṣya-day and during the third month he shall feed) three (Brāhmaṇas).

▼ हरदत्त-टीका

## सूत्रम्⑥

श्रीस्तृतीये ॥ ६ ॥

## टिप्पनी⑥

तृतीये तिष्ये त्रीन् भोजयेदाचतुर्थात् ॥ ६ ॥

#### 07 एवं संवत्सरमभ्युच्चयेन

एवं संवत्सरम् अभ्युच्चयेन ७

▼

## ⑤

>
▼ Bühler

7. In this manner (the Tiṣya-rite is to be performed) for a year, with a (monthly) increase (of the number of Brāhmaṇas fed).}

▼ हरदत्त-टीका

## सूत्रम्⑥

एवं संवत्सरमभ्युच्चयेन ॥ ७ ॥

## टिप्पनी⑥

एवमेतत्कर्म यावत्संवत्सरः पूर्यते तावत् कर्तव्यम् । ब्राह्मणभोजनं चाऽभ्युच्चयेन भवति । चतुर्थीप्रभृति चत्वारः, पञ्चमप्रभृति पञ्चेत्यादि ॥७॥

#### 08 महान्तम् पोषम् पुष्यति

महान्तं पोषं पुष्यति ८

▼

## ⑤

>
▼ Bühler

8. (Thus) he obtains great prosperity.

▼ हरदत्त-टीका

## सूत्रम्⑥

महान्तं पोषं पुष्यति ॥ ८॥

## प्रस्तावः⑥

एवं कृते फलमाह—

## टिप्पनी⑥

महत्या पुष्टया युक्तो भवति ॥ ८ ॥

#### 09 आदित एवोपवासः

आदित एवोपवासः ९

▼

## ⑤

>
▼ Bühler

9. But the fasting takes place on the first (Tiṣya-day) only.

▼ हरदत्त-टीका

## सूत्रम्⑥

आदित एवोपवासः ॥ ९ ॥

## टिप्पनी⑥

उपवासस्त्वादित एव पुष्ये भवति । न प्रतिपुष्यम् ॥९॥

#### 10 आत्ततेजसाम् भोजनं वर्जयेत्

आत्त-तेजसां भोजनं वर्जयेत् १०

▼

## ⑤

>
▼ Bühler

10. He shall avoid to eat those things which have lost their strength (as butter-milk, curds, and whey).

▼ हरदत्त-टीका

## सूत्रम्⑥

आत्ततेजसा भोजनं वर्जयेत् ॥ १० ॥

## टिप्पनी⑥

आत्ततेजांसि तक्रवाजिनादीनि । तानि नोपभुञ्जीत ॥ १०॥

#### 11 भस्मतुषाधिष्ठानम्

भस्म-तुषाधिष्ठानम् ११

▼

## ⑤

>
▼ Bühler

11. He shall avoid to tread on ashes or husks of grain. 4

▼ हरदत्त-टीका

## सूत्रम्⑥

भस्मतुषाधिष्ठानम् ॥ ११ ॥

## टिप्पनी⑥

वर्जयेदित्येव । भस्मतुषांश्च नाऽधितिष्ठेत् नाऽऽक्रामेत् ॥ ११ ॥

#### 12 पदा पादस्य प्रक्षालनमधिष्ठानञ्

पदा पादस्य प्रक्षालनम् अधिष्ठानं च वर्जयेत् १२

▼

## ⑤

>
▼ Bühler

12. To wash one foot with the other, or to place one foot on the other,

▼ हरदत्त-टीका

## सूत्रम्⑥

पदा पादस्य प्रक्षालनमधिष्ठानं च वर्जयेत् ॥ १२ ॥

## टिप्पनी⑥

एकेन पादेन पादान्तरस्य प्रक्षालनं अधिष्ठानं च वर्जयेत् न कुर्यात् ॥१२॥

#### 13 प्रेङ्खोलनञ् च पादयोः

प्रेङ्खोलनं च पादयोः १३

▼

## ⑤

>
▼ Bühler

13. And to swing his feet,

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रेङ्खोलनं च पादयोः ॥ १३ ॥

## टिप्पनी⑥

प्रेङ्खोलनं दोलनमितस्ततश्चालनम् ॥ १३ ॥

#### 14 जानुनि चात्याधानञ् जङ्घायाः

जानुनि चात्याधानं जङ्घायाः १४

▼

## ⑤

>
▼ Bühler

14. And to place one leg crosswise over the knee (of the other),

▼ हरदत्त-टीका

## सूत्रम्⑥

जानुनि चाऽत्याधानं जङ्घायाः ॥ १४ ॥

## टिप्पनी⑥

एकस्मिन् जानुनि इतरस्या जङ्घायाः अत्याधानमवस्थापनं च वर्जयेत् ॥ १४ ॥

#### 15 नखैश्च नखवादनम्

नखैश् च नखवादनम् १५

▼

## ⑤

>
▼ Bühler

15. And to make his nails

▼ हरदत्त-टीका

## सूत्रम्⑥

नखैश्च नखवादनः ॥ १५ ॥

## टिप्पनी⑥

स्पष्टम् ॥ १५॥

#### 16 स्फोटनानि चाकारणात्

स्फोटनानि चाकारणात् १६

▼

## ⑤

>
▼ Bühler

16. Or to make (his finger-joints) crack without a (good) reason, 5

▼ हरदत्त-टीका

## सूत्रम्⑥

स्फोटनानि चाऽकारणात् ॥ १६ ॥

## टिप्पनी⑥

पर्वसन्धीनां स्फोटनानि वर्जयेत् अकारणात्, कारणं श्रमवातादि । वादनस्फोटनानीति समासपाठेऽप्येष एवार्थः ॥ १६ ॥

#### 17 यच्चान्यत्परिचक्षते

यच् चान्यत् परिचक्षते १७

▼

## ⑤

>
▼ Bühler

17. And all other (acts) which they blame.

▼ हरदत्त-टीका

## सूत्रम्⑥

यच्चान्यत्परिचक्षते ॥ १७ ॥

## टिप्पनी⑥

यच्चान्यदेवं उक्तव्यतिरिक्तं तृणच्छेदनादि शिष्टाः परिचक्षते गर्हन्ते तदपि वर्जयेत् ॥ १७ ॥

#### 18 योक्ता च धर्मयुक्तेषु

योक्ता च धर्म-युक्तेषु द्रव्य-परिग्रहेषु च १८

▼

## ⑤

>
▼ Bühler

18. And let him acquire money in all ways that are lawful.

▼ हरदत्त-टीका

## सूत्रम्⑥

योक्ता च धर्मयुक्तेष्ठ द्रव्यपरिग्रहेषु च ॥ १८ ॥

## टिप्पनी⑥

एकश्चशब्दोऽनर्थकः । केचिन्नैव पठन्ति । धर्माविरुद्धा ये द्रव्यपरिग्रहास्तेषु च योक्ता उत्पादयिता स्यान्निरीहस्स्यात् ॥ १८ ॥

#### 19 प्रतिपादयिता च तीर्थे

प्रतिपादयिता च तीर्थे १९

▼

## ⑤

>
▼ Bühler

19. And let him spend money on worthy (persons or objects). 6

▼ हरदत्त-टीका

## सूत्रम्⑥

प्रतिपादयिता च तीर्थे ॥ १९॥

## टिप्पनी⑥

तीर्थं गुणवत् पात्रं, यज्ञो वा । तत्र द्रव्यस्याऽर्जितस्य प्रतिपादयिता स्यात् ॥ १९ ॥

#### 20 यन्ता चातीर्थे यतो

*(दानस्य नि)*यन्ता चातीर्थे - यतो न भयं स्यात् २०

▼

## ⑤

>
▼ Bühler

20. And let him not give anything to an unworthy (person), of whom he does not stand in fear.

▼ हरदत्त-टीका

## सूत्रम्⑥

यन्ता चाऽतीर्थे यतो न भयं स्यात् ॥ २० ॥

## टिप्पनी⑥

यन्ता नियन्ता अप्रदाता अतीर्थे अप्रदाता च स्यात् । यतः पुरुषादप्रदानेऽपि न भयं स्यात् । भयसम्भवे तु पिशुनादिभ्यो देयम् ॥ २० ॥

#### 21 सङ्ग्रहीता च मनुष्यान्

संग्रहीता च मनुष्यान् *(हितवचनादिभिः)* २१

▼

## ⑤

>
▼ Bühler

21. And let him conciliate men (by gifts or kindness).

▼ हरदत्त-टीका

## सूत्रम्⑥

सङ्ग्रहीता च मनुष्यान् ॥ २१ ॥

## टिप्पनी⑥

अर्थप्रदानप्रियवचनानुसरणादिभिर् मनुष्याणां सङ्ग्रहणशीलस् स्यात् ॥ २१ ॥

#### 22 भोक्ता च धर्माविप्रतिषिद्धान्भोगान्

भोक्ता च धर्माविप्रतिषिद्धान् भोगान् *(5)*२२

▼

## ⑤

>
▼ Bühler

22. And he may enjoy the pleasures which are not forbidden by the holy law.

▼ हरदत्त-टीका

## सूत्रम्⑥

भोक्ता च धर्माविप्रतिषिद्धान् भोगान् ॥ २२ ॥

## टिप्पनी⑥

धर्माविरुद्धा ये भोगाः स्रक्चन्दनस्वभार्यासेवनादयः, तेषां च भोगशीलस्स्यात् ॥ २२ ॥

#### 23 एवमुभौ लोका वभिजयति

एवम् उभौ लोका वभिजयति २३

▼

## ⑤

>
▼ Bühler

23. (Acting) thus he conquers both worlds.

▼ हरदत्त-टीका

## सूत्रम्⑥

एवमुभौ लोकावभिजयति ॥ २३ ॥

## टिप्पनी⑥

एवं महत्या पुष्ट्या युक्त उक्तप्रकारमनुतिष्ठन्नुभौ लोकावभिजयति भोगेनेमं लोकं, तीर्थे प्रतिपादनेन चाऽमुं लोकमिति ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने विंशी कण्डिका ॥ २० ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्नेऽष्टमः पटलः ॥ ८॥

इत्यष्टमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. Manu II, 35.↩
5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
6. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

**०९①**

# २१①

## 01 चत्वार आश्रमा गार्हस्थ्यमाचार्यकुलम्④

चत्वार आश्रमा गार्हस्थ्यम् आचार्यकुलं मौनं *(=मुनिता/ सन्यासः)* वानप्रस्थ्यम् इति १

▼

### ⑤

>
▼ Bühler

1. There are four orders, viz. the order of householders, the order of students, the order of ascetics, and the order of hermits in the woods. 1

▼ हरदत्त-टीका

### सूत्रम्⑥

चत्वार आश्रमा गार्हस्थ्य, माचार्यकुलं, मौनं, वानप्रस्थ्यमिति ॥१॥

### प्रस्तावः⑥

'सर्वाश्रमाणां समयपदानी'त्युक्तं पुरस्तात् । के पुनस्ते आश्रमाः? इत्यत आह—

### टिप्पनी⑥

आश्राम्यन्त्येषु श्रेयोऽर्थिनः पुरुषा इत्याश्रमाः । एषा सामान्यसंज्ञा । गृहे तिष्ठति कुटुम्बरक्षणपर इति गृहस्थः । तस्य भावो गार्हस्थ्यम् । स एक आश्रमः । आचार्यकुलं तत्र वासो लक्षणया सोऽप्येकः। 'मनु अवबोधन' मनुत इति मुनिर्ज्ञानपरः । तस्य भावो मौनम् । सोऽपरः। वनं प्रतिष्ठत इति वनप्रस्थः। स एव वानप्रस्थः। प्रज्ञादित्वादण् । तस्य भावो वानप्रस्थ्यम् । इतिशब्दः परिसमाप्त्यर्थः । एतावन्त एवाऽऽश्रमा इति । चतुर्णामेवोपदेशेऽपि चत्वार इति वचनं "2ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्ये"ति स्मृत्यन्तरोक्तं मा ग्राहीदिति ॥ १॥

#### 02 तेषु सर्वेषु यथोपदेशमव्यग्रो

तेषु सर्वेषु यथोपदेशम् अव्यग्रो वर्तमानः क्षेमं गच्छति २

▼

### ⑤

>
▼ Bühler

2. If he lives in all these four according to the rules (of the law), without allowing himself to be disturbed (by anything), he will obtain salvation. 3

▼ हरदत्त-टीका

## सूत्रम्⑥

तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति ॥

## टिप्पनी⑥

तेष्वाश्रमेषु चतुर्ष्वपि यथाशास्त्रमव्यग्रस्समाहितमना भूत्वा यो वर्तते, स क्षेममभयं पदं गच्छति । अनेनाऽऽश्रमविकल्प उक्तो वेदितव्यः निःश्रेयसार्थिनाऽन्यतमस्मिन्नाश्रमे यथाशास्त्रमवहितेन वर्तितव्यमिति । तथा च गौतमः-4 'तस्याऽश्रमविकल्पमेके ब्रुवत' इति ॥ २ ॥

#### 03 सर्वेषामुपनयनप्रभृति समान आचार्यकुले

सर्वेषाम् उपनयन-प्रभृति समान आचार्य-कुले वासः ३

▼

## ⑤

>

▼ Bühler

3. The duty to live in the teacher's house after the initiation is common to all of them. 5

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वेषामुपनयनप्रभृति समान आचार्यकुले वासः ॥ ३ ॥

## टिप्पनी⑥

उपनयनप्रभृति य आचार्यकुले वासोऽष्टाचत्वारिंशद्वर्षादीनामन्यतमस्स सर्वेषामाश्रमाणां समानः ॥३॥

#### 04 सर्वेषामनूत्सर्गो विद्यायाः

सर्वेषाम् अनूत्सर्गो विद्यायाः ४

▼

## ⑤

>
▼ Bühler

4. Not to abandon sacred learning (is a duty common) to all.

▼ हरदत्त-टीका

## सूत्रम्⑥

सर्वेषामनूत्सर्गो विद्यायाः ॥ ४ ॥

## टिप्पनी⑥

अनूत्सर्गः छान्दसो दीर्घः । विद्याया अनूत्सर्गोऽपि सर्वेषामाश्रमाणां समानः । तस्मादाचार्यकुले वासस्समान इति ॥ ४॥

#### 05 बुद्ध्वा कर्माणि यत्कामयेत

बुद्ध्वा कर्माणि यत् कामयेत तद् आरभेत ५

▼

## ⑤

>
▼ Bühler

5. Having learnt the rites (that are to be performed in each order), he may perform what he wishes.

▼ हरदत्त-टीका

## सूत्रम्⑥

बुद्ध्वा कर्माणि यत्कामयते तदारभेत ॥ ५ ॥

## टिप्पनी⑥

प्रत्याश्रमं यानि कर्माणि विहितानि, तानि बुद्ध्वा गृहस्थस्यैतानि कर्तव्यानि । एषामननुष्ठाने प्रत्यवायः । फलं चेदमेषाम्, एतानि शक्यान्यनुष्ठातुं, नैतानीत्याचार्यादुपश्रुत्य यत्कर्म फलं वा कामयेत तदारभेत तमाश्रमं प्रतिपद्यतेति ॥५॥

#### 06 यथा विद्यार्थस्य नियम

यथा विद्यार्थस्य नियम,
एतेनैवान्तम् अनूपसीदत*(ः= उपसदनतः)*
आचार्य-कुले शरीर-न्यासो ब्रह्मचारिणः *(नैष्ठिकस्य)*६

▼

## ⑤

>
▼ Bühler

6. Worshipping until death (and living) according to the rule of a (temporary) student, a (professed) student may leave his body in the house of his teacher.

▼ हरदत्त-टीका

## सूत्रम्⑥

यथा विद्यार्थस्य नियम एतेनैवान्तमनूपसीदत आचार्यकुले शरीरन्यासो ब्रह्मचारिणः ॥६॥

## प्रस्तावः⑥

तत्र गार्हस्थ्यस्य पूर्वमेव प्रपञ्चितत्वाद्
अध्ययनानन्तरं प्रतिपित्सितस्याऽऽचार्यकुलस्य स्वरूपम् आह—

## टिप्पनी⑥

यथा विद्यार्थस्य उपकुर्वाणस्य ब्रह्मचारिणः
'अथ ब्रह्मचर्यविधि'र् इत्य् आरभ्याऽग्नीन्धनादिनियम उक्तः,
अतस्तेनैव नियमेनाऽऽन्तम् आशरीरपाताद्
**अनूपसीदतः** उपसदनम् एवानूपसीदनं तत्कुर्वतः
**आचार्य-कुले शरीर-न्यासः** परित्यागो भवति ब्रह्मचारिणो नैष्ठिकस्य । तत्रैवाऽऽमरणात्तिष्ठेत्, नाऽऽश्रमान्तरं गच्छेत् । यदि तमेवाश्रममात्मनः क्षेमं मन्येतेति मनुः—
6 आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एषु त्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः। स गच्छत्युत्तमं स्थानं न चेहाऽऽजायते पुनः ॥' इति ॥६॥

#### 07 अथ परिव्राजः

अथ परिव्राजः ७

▼

## ⑤

>
▼ Bühler

7. Now (follow the rules) regarding the ascetic (Saṃnyāsin).

▼ हरदत्त-टीका

## सूत्रम्⑥

अथ परिव्राजः ॥ ७ ॥

## टिप्पनी⑥

अथाऽनन्तरं परिव्राजो धर्म उच्यते । दृष्टादृष्टार्थान् सर्वानेवाऽऽरम्भान् परित्यज्याऽऽत्मलाभाय सन्यासाश्रमं परिव्रजतीति परिव्राट् सन्यासी ॥७॥

#### 08 अत एव ब्रह्मचर्यवान्प्रव्रजति

अत एव ब्रह्मचर्यवान्प्रव्रजति ८

▼

## ⑤

>

▼ Bühler

8. Only after (having fulfilled) the duties of that (order of students) he shall go forth (as an ascetic), remaining chaste. 7

▼ हरदत्त-टीका

## सूत्रम्⑥

अत एव ब्रह्मचर्यवान् प्रव्रजति ॥ ८॥

## टिप्पनी⑥

अत एव ब्रह्मचर्याश्रमादेव ब्रह्मचर्यवानविप्लुतब्रह्मचर्यः प्रव्रजति परिव्रज्यां कुर्याद्यदि तथैव पक्वकषायो भवति । श्रूयते च8 'ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति, 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'ति च । अत्र केचिदाहुः-'अत एवे'ति वचनात् गृहाश्रमं प्रविष्टस्य तत्परित्यागेनाश्रमान्तरप्राप्तिराचार्यस्याऽनभिमतैवेति लक्ष्यते । तत्रायमभिप्रायः– दारपरिग्रहे सति 'यावज्जीवमग्निहोत्रं जुहुयादि'ति श्रुत्या विरुध्यते।

स कथं प्रव्रजेदिति । तस्मात्सत्यपि वैराग्ये काम्यस्य कर्मणः परित्यागेन नित्यानि नैमित्तिकानि च कर्माणि कुर्वन् प्रतिषिद्धानि वर्जयन् गृहस्थ एव मुच्यत इति । तथाऽऽह याज्ञवल्क्यः—<br>
9 'न्यायार्जितधनस्तत्वज्ञाननिष्ठोऽतिथिप्रियः ।<br>
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥' इति ।<br>
अथ योऽनाहिताग्निस्तेस्य विरक्तस्य मुन्याश्रमप्रवेशे को विरोधः? ऋणश्रुतिविरोधः—'10जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य' इति । मनुरपि—<br>
11 ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।

अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥ इति ।
मोक्षो मोक्षाश्रमः। नन्वेवं ब्रह्मचर्यादपि प्रव्रज्या नोपपद्यते । अथ तत्र12 'यदहरेव विरजेदि'ति श्रुत्या युक्तं प्रव्रजितुं तदा विरक्तस्य, 13गार्हस्थ्यादपि भविष्यति । स्मर्यते च—
14 प्राजापत्यां निरूपयेष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहादिति ॥
तथा यो गृहस्थो वृद्धो मृतभार्यः पुनर्दारक्रियायामसमर्थः, तस्यापि युज्यते प्रव्रज्या। तस्मा'द्यदहरेव विरजे'दि15त्येषएव कालः प्रव्रज्यायाः, सर्वमन्यदविरक्तस्येति युक्तम् । एवकारस्तु सूत्रे श्रुत्यनुसारेण प्रयुक्तः । यथा 'गृहाद्वा वनाद्वे'ति ब्रुवाणैव श्रुतिब्रह्मचर्यादेव प्रव्रजेदित्याह, तथेति ॥ ८॥

#### 09 तस्योपदिशन्ति

तस्योपदिशन्ति ९

▼

### ⑤

>
▼ Bühler

9. For him (the Saṃnyāsin) they prescribe the following rules).

▼ हरदत्त-टीका

## सूत्रम्⑥

तस्योपदिशन्ति ॥ ९॥

## टिप्पनी⑥

तस्य परिव्राजः कर्तव्यमुपदिशन्ति धर्मज्ञाः ॥९॥

#### 10 अनग्निरनिकेतः स्यादशर्माशरणो मुनिः

अनग्निर् अनिकेतः स्याद्
अशर्माशरणो मुनिः
स्वाध्यायैवोत्सृजमानो वाचं
ग्रामे प्राण-वृत्तिं प्रतिलभ्य
+अनिहो ऽनमुत्रश् चरेत् १०

▼

### ⑤

>
▼ Bühler

10. He shall live without a fire, without a house, Without pleasures, without protection. Remaining silent and uttering speech only on the occasion of the daily recitation of the Veda, begging so

much food only in the village as will sustain his life, he shall wander about neither caring for this world nor for heaven. 16

▼ हरदत्त-टीका

## सूत्रम्⑥

अनग्निरनिकेतस्स्यादशर्माऽशरणो मुनिःस्वाध्याय एवोत्सृजमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्याऽनिहोऽनमुत्रश्चरेत् ॥ १० ॥

## टिप्पनी⑥

